

TRIKĀNDA MANDANAM

OR

ĀPASTAMBA SUTRA DHVANITĀRTHA KĀRIKĀ

BY

BĀDI MUDGARA KUTHĀRA KUMĀRA SWĀMI'S

SON

TRIKĀNDA MANDAṆA BHĀSKARA MICRA

A

SOMA-YĀJI.

BEING

AN EXPOSITION OF THE SOMA-YĀGA APHORISMS OF ĀPASTAMBA.

WITH AN

ANONYMOUS COMMENTARY

EDITED BY

BANDYAGHATEEYA MAHAMAHOPADHYAYA
CANDRAKĀNTA TARKĀLANKĀRA BHATTĀCHĀRYA,

Late Professor of the Government Sanskrit College, Calcutta,
Honorary Member, Asiatic Society of Bengal, &c.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1903.

त्रिकाण्डमण्डन

वा

आपस्तम्बसूत्रध्वनितार्थकारिका



वादिमुञ्जरकुठारकुमारस्वामिसूरिसुत-त्रिकाण्डमण्डन-

भास्करमिश्रसोमयाजिकृता,

व्याख्यया समलङ्कृता ।


राजकीयसंस्कृतविद्यालयाध्यापकवर-

वन्द्यघटीय-

महामहोपाध्याय-

श्रीचन्द्रकान्त तर्कालङ्कार भट्टाचार्य्येण

परिशोधिता ।




आशियातिकसमाजानुमत्या

कलिकातामहानगर्य्यां

बाप्तिष्ट मिशन यन्त्रे मुद्रिता ।

शाकाः १८२५ ।



अवतरणिका ।



अथैष त्रिकाण्डमण्डननामा प्रख्यातो ग्रन्थो मुद्रयित्वा प्रकाशतां नीतः । यानि पुस्तकान्यवलम्ब्यैतस्य शोधनमुद्रणे अकरवं, तानि तावत् प्रदर्श्यन्ते । एकं तावदस्मदीयं पुस्तकं टीकारहितं क-चिह्नितम् । द्वितीयं मिथिला-प्रदेशादाहृतं टीकासमलङ्कृतं ख-चिह्नपरिचितम् । तृतीयं काशीस्थसंस्कृत-विद्यामन्दिरपुस्तकालयादानीतं मूलमात्रं ग-चिह्नाङ्कितम् । चतुर्थं जयपुरात् संगृहीतं सटीकं घ-चिह्नोपेतम् । पञ्चमं कलिकातावास्तव्य श्रीयुक्त बाबु प्रतापचन्द्र घोषमहाशयस्य पुस्तकालयादधिगतं सटीकं ङ-चिह्न-विनिर्दिष्टम् । तेषु प्रथमं पुस्तकमतीव समीचीनम् । द्वितीयन्तु पुस्तकं प्रायस्तादृशमेव समीचीनम् ।

पुस्तकेऽस्मिन् चत्वारि काण्डानि प्रकरणानि वा सन्ति । तानि च यथाक्रमं अधिकारिनिरूपण-प्रतिनिधिनिरूपण-पुनराधेयनिमित्तनिर्णय-प्रकीर्णकाख्यानि । काण्डत्रयाणां मुख्य प्रतिपाद्यविषयः तत्तन्नाम्नैव सुगमः । चतुर्थकाण्डे तु पाकयज्ञादीनामाश्रयणाश्रयादिकं निरूपितम् । सर्व्वत्रैव प्रसङ्गादन्येऽप्यर्था निरूपिताः सन्ति । प्रथमे काण्डे सार्द्धसप्ताशीत्युत्तरशत-संख्यकाः कारिकाः, द्वितीये सार्द्धाष्टादशोत्तरद्विशतसंख्यकाः, तृतीये सार्द्धैकचत्वारिंशदधिकशतमिताः, चतुर्थे एकोनत्रिंशत्संख्यकाः सन्ति । मिलित्वा सार्द्धचतुःसप्तत्यधिकपञ्चशतमिताः कारिकाः सन्त्यस्मिन् ग्रन्थे । परन्तु तृतीयकाण्डान्ते भ्रमादेकाधिकचत्वारिंशदुत्तरशतसंख्या मुद्रिता-ऽस्ति । एवं द्वितीयकाण्डे क्वचित् क्वचित् पत्रे प्रथमकाण्डमित्यपि मुद्रितम् । कृपया सुधीभिः क्षन्तव्यमेतत् ।

ग्रन्थोऽयमसम्पूर्ण इति प्रतिभाति । तृतीयकाण्डेऽपि
पुनराधिप्रसङ्गेन किञ्चिदत्र निरूपितम् ।
प्रायश्चित्तान्तरं नव्ये स्वस्थाने बहुविस्तरम् ॥

इति प्रतिज्ञातस्य प्रायश्चित्तान्तरस्याप्यनुपलम्भात् । ग्रन्थस्यास्य नाम आपस्तम्बसूत्रध्वनितार्थकारिकेति तत्र तत्र पुष्पिकायां दर्शनादवगम्यते । परं ग्रन्थकृन्नामानुसारेण त्रिकाण्डमण्डननाम्नैव प्रसिद्धिमुपागतोऽयं ग्रन्थः । कर्त्ता ह्यस्य कुमारस्वामिसूरिसुतो भास्करमिश्रः । तस्यापि ग्रन्थकर्त्तुः त्रिकाण्डमण्डन इति नामान्तरमासीदिति पुष्पिकादर्शनादवसीयते । तन्नाम्नैवास्य प्रसिद्धिः । कस्मिन् समये अयं भास्करमिश्र आविरासीदिति न निश्चेतुं शक्यते । स्वग्रन्थे तावदयं कर्क-महदत्त-दामोदर-भवनाग-वामन-भरद्वाजसूत्रभाष्यकार-मन्त्रब्राह्मणभाष्यकारादीनां, केशवस्वामि-कल्प-भाष्य-भवभाष्य-लौगाक्षिकारिकादिग्रन्थानां चोल्लेखं कृतवान् । तेऽपि ग्रन्थाः ग्रन्थकृतश्च अतीव प्राचीना इत्यत्र नास्ति सन्देहः । मदनपारिजातादिषु प्राचीननिबन्धेषु ग्रन्थस्यास्य समुल्लेखात् अनन्तकारिकाया उद्धृतत्वाच्च ग्रन्थोऽयमतिप्राचीनः प्रामाणिकश्चेति ज्ञायते । ग्रन्थकृता स्वयमेव वाजपेयादिकारिकाऽपि विरचिता । वाजपेयकारिका तु दृष्टैवास्माभिः । टीकाकृता तु स्वनाम नैव प्रकटितम् । अतः केन कदेयं टीका विरचितेति न ज्ञायते । परन्तु टीकायां रामाण्डारपरार्कप्रयोगपारिजातादीनामुल्लेखदर्शनात् टीकेयं नातीव प्राचीनेति शक्यते वक्तुमिति शिवम् ।

कलिकातामहानगर्याम् ।
शाका १८२२ । चैत्रे मासि । } श्रीचन्द्रकान्तदेवशर्म्मा ।

त्रिकाण्डमण्डनस्याकारादिक्रमेण विषयसूची।

अ।

आ।

त्रिकाण्डमण्डनटीकोक्तविषयाणामकारादिक्रमेण सूची।

त्रिकाण्डमण्डनोल्लिखितग्रन्थकारनाम्नामकारादिक्रमेण प्रज्ञापनपत्रम् ।

त्रिकाण्डमण्डनोल्लिखितग्रन्थनाम्नामकारादिक्रमेण प्रज्ञापनपत्रम् ।

त्रिकाण्डमण्डनटीकोल्लिखितग्रन्थकर्तृनाम्नामकारादिक्रमेण प्रज्ञापनपत्रम् ।

त्रिकाण्डमण्डनटीकोल्लिखितग्रन्थनाम्नामकारादिक्रमेण प्रज्ञापनपत्रम् ।

शुद्धिपत्रम् ।

पृष्ठ ।	पङ्क्ती ।	अशुद्धम् ।	शुद्धम् ।
७	८	विवितिमन्तीति	विविदिषन्तीति
९	१६	स्थिवम्	स्थितम्
१०	१५	तया	तथा
११	५	पुरुषोय	पुरुषोप
१४	२	प्रौत्रामणी	सौत्रामणी
१५	१९	नित्यत्वार्था	व्यावृत्त्यर्था
१६	१४	रुदविहितो	रुदभिहितो
३१	१०	स्तोभ्रखाणि	स्तोत्रप्रस्त्राणि
३५	१	विप्रोषितो	विप्रोषितो
७६	१६	पुरुषत्रमध्ये	पुरुषत्रयमध्ये
९५	३	बह्वचे	बह्वृचे
१००	१५	पुष्प	पुष्पे
११०	१२	देकभि	देभि
१३२	२	द्रियत	द्रियेत
१३२	६	सद्यनाम	सद्मनाम्
१३८	३	जुङ्ग्यौप	जुहोत्यौप
१६८	१४	उदतो	उदात्तो
१७५	८	व्यतिक्रान्त	व्यतिक्रान्त
१८२	१	भारद्वाजा	भरद्वाजा
१८४	३	प्रोषितया	प्रोषितायां
१९७	१८	ग्राम्या	ग्राम्या
१९८	९	प्रत्यर्थे	प्रत्यर्थे
१९८	१९	स्यरमय	स्यरमय
२०६	२१	ऊयते	हूयते
२१५	१७	छित्वा	क्रित्वा (गव पर्यन्त)
२२२	१५	क्रियता	क्रियता
२२५	१२	त्युदिना	त्यादिना
२२७	१६	निर्मर्थ्यै	निर्मथ्ये
२२९	११	विप्रेगा	विप्रयोगा
२३०	६	हतो	हतो

त्रिकाण्डमण्डनम् ।

प्रथमकाण्डम् ।

(अधिकारिनिरूपणम्)

श्रीगणेशाय नमः ।

श्रीलक्ष्मीनृसिंहाय नमः ।

(टीकाकारोपक्रमणिका)

भुजगाभुजगा यस्य वामगा* वामलोचना ।
सर्वदः सर्वदा दिश्यात् सशिवः स शिवः शिवम्[1] ॥१॥

उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत्
तच्च प्रमा† च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदृशश्च‡ गुरोः सकाशा-
त्तस्मात्तमेनमहमादरतो§ नमामि ॥२॥

---

* यस्य स्याद् – इति ख० पु० पाठः ।

† प्रभा – इति क० पाठः ।

‡ प्रकाशनदृशा च – इति ख० पाठः ।

§ तस्मात्तमेवमहमादरतो – इति क० पाठः ।

---

(1) सशिवः शिवया सहितः स पूर्वोक्तलक्षणः शिवो महादेवः शिवं मङ्गलं दिश्यादित्यर्थः ।

व्याख्याऽनपेक्षः सुधियां प्रबन्धो*
व्याख्याव्यपेक्षोऽल्पधियां निबन्धः ।
दुरूहशब्दार्थविधानयुक्ता
सा चेद्वृथा तद्रचनप्रयासः ॥३॥
त्रिकाण्डमण्डनव्याख्यामतः पदप्रकाशिकाम् ।
स्फुटां स्फुटप्रबोधाय कुर्वे सद्भिःप्रयुक्तिभिः ॥४॥

चिकीर्षितस्य ग्रन्थस्य प्रत्यूहापोहद्वारा परिसमाप्त्यर्थं स्मृति-शिष्टाचारपरिकल्पितश्रुतिबोधितकर्त्तव्यताकं स्वेष्टदेवतानमस्कार-रूपं मङ्गलमाचरन् शिष्यशिक्षायै निबन्धस्याभिधेयं प्रतिजानीते ।

श्रियं वागीश्वरीं देवीं सम्प्रणम्य विनायकम् ।
गुरूंश्च† सोमयागस्य प्रयोगः प्रवितन्यते ॥ १ ॥

श्रियमित्यादिना ।

नन्वन्वयव्यतिरेकाभ्यां व्यभिचारात् मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसं प्रति वा न कारणत्वमिति चेत् । न, अविगीतशिष्टा-चारविषयत्वेन "सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते"— इत्यादिस्मृतिभिश्च मङ्गलस्यावश्यकर्त्तव्यतासिद्धौ तत्र फलजिज्ञासा-यामर्थवादगतस्य दृष्टस्यैव फलस्य न्याय्यत्वात् ।

तत्र समाप्तिरेव फलं, विघ्नध्वंसस्तु द्वारमिति प्राञ्चः । नव्यास्तु विघ्नध्वंस एव मङ्गलफलं समाप्तिस्तु प्रतिभाबुद्ध्यादिकारणकलापात् ।

---

* निबद्धो – इति ख॰ पाठ ।
† गुरूंश्च – इति ग॰ पुस्तकपाठ: ।

तच मङ्गलतेनापि एकदेवतानमस्कारेण सिद्धावपि किरणावल्यादिग्रन्थेषु सत्यपि मङ्गले तददर्शनाद् बलवत्तरविघ्नप्राचुर्यसम्भावनायां तन्निरासार्थमनेकासां देवतानां नतिरिति न पौनरुक्त्यम्[१]।

तच तावदुपासकानामतिप्रागल्भ्यदात्रीं भारतीमेव नौति। वागीश्वरीमिति। वाचामीश्वरीं अधिष्ठातृदेवतां, वाग्रूपां वा ईश्वरीं, देवीं द्योतमानां, श्रियं लक्ष्मीपदाढ्लेन लक्ष्मीरूपाम्। तदुक्तम्। काव्यं यशसेऽर्थकृते इत्यादि। विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनमिति च। यद्वा, श्लेषरूपां श्रियं महालक्ष्मीं, वागीश्वरीं महासरस्वतीं, देवीं महाकालीं संप्रणम्य। समित्यनेन साष्टाङ्गप्रणामोऽभ्यन्यते। विघ्नविघाताय विघ्नराजस्यैव समाख्यया शक्तिमत्त्वात्[२] तमपि नौति। विनायकमिति। विनायकं विघ्नराजम्। अविघ्नो विघ्नकर्त्ता च इत्येते षड्विनायकाः। विनायको विघ्नराज इति च वचनात्। यतो विघ्नानोपलब्धिस्तमपि ग्रन्थस्य प्रचरद्वख्यार्थे* प्रणमति। गुरुमिति। गुरुं कुमारस्वामिनं। तस्यैव महा-

* प्रचरद्वख्यतार्थे — इति ख॰ पाठः।

(१) सिद्धावपीति मङ्गलाचरणस्येति शेषः। अथवा, तत्र फले सिद्धावपि सिद्धेऽपीत्यर्थः। फलविषयिण्या सिद्धौ सत्यामपीति वा। किरणावल्यादिग्रन्थादौ सत्यपि मङ्गलाचरणे समाप्तेरदर्शनात् तत्र विघ्नप्राचुर्यं सम्भाव्यते। प्रचुरो हि विघ्न प्रचुरेणैव मङ्गलेन ध्वस्यते न स्वल्पेन। अतः प्रकृतेऽपि बलवत्प्रचुरविघ्नसम्भावनयाऽनेकदेवतानमस्कार इति तात्पर्य्यार्थः।

(२) समाख्ययाऽनुगतार्थेन नाम्ना विघ्नराजस्य विघ्नविघातशक्तिमत्त्वात् विघ्नविघाताय तमपि नौतीत्यर्थः।

गुरुत्वात् । जनकत्वेन सोमद्रव्यवान् यागोऽग्निष्टोमाख्यस्तस्य प्रयोगः, प्रयुज्यते अनेनेति प्रयोगो नियमः प्रवितन्यते । प्रवीत्युपसर्गद्वयोपेतस्य तनुधातोः सूत्रसूत्रान्तरोक्तसकलधर्मपुरस्कृतविस्तारोऽर्थः[१] ।

ननु दर्शपूर्णमासाभ्यामिष्ट्वाऽग्नेन यजेतेति श्रुतेः पूर्वं दर्शपूर्णमासौ वक्तव्यौ । तदर्थञ्च आधानमेव प्रथमं निरूपणविषयं* न तु सोमयागस्यादाववसर इति चेत् । सत्यं, महातन्त्रे अल्पतन्त्रनिवेशनस्य[२] शास्त्रसिद्धत्वात्, लोके च तदेवाद्रियते यदेकक्रिययाऽनेककार्यसम्पत्तिसम्पादनदक्षं बुधैरिति[३] अग्निष्टोमे दीक्षणीयादिद्वारा पौर्णमासतन्त्रनिवेशस्य लभ्यमानतया, प्रसङ्गाच्चाधानस्यापि तत्र तत्र क्वचित् निरूपणीयत्वेनात्रैव आदरो युक्तः, न तथा आधानाद्युपक्रमे पुनरुक्त्यादिविचारसम्भवः । एतेन अधिकारिसम्बन्धविषयप्रयोजनरूपानुबन्धचतुष्टयं दर्शितम् ।

ननु आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्या सकलवैदिकधुरीणानामात्मज्ञानसाध्यपरमपुरुषार्थोप-

---

* प्रथमनिरूपणविषयं — इति क० पाठः ।

---

(१) सूत्रमापस्तम्बसूत्रं, सूत्रान्तराणि बोधायनादिसूत्राणि । तदुक्ताधिकार्यादिसकलधर्मपुरस्कृतविस्तार इत्यर्थः ।

(२) तन्त्रमितिकर्त्तव्यता । महातन्त्रे महेतिकर्त्तव्यताके, अल्पतन्त्रस्य अल्पेतिकर्त्तव्यताकस्य यत् निवेशनं तस्येत्यर्थः ।

(३) एकक्रियया अनेककार्यसम्पादनदक्षं यद्भवति, तदेव लोके बुधैराद्रियते इति हेतोरित्यर्थः ।

वर्गमुख्योपायात्मानात्मविचार एव श्रेयस्कर इति किमुत[१] कर्म-चितो लोकः क्षीयते इत्यादिश्रुत्या धूमार्चिरादिमार्गप्रदर्शनेन[२] च चुद्रफलकोऽयमारम्भ इति चेत्। उच्यते। ये तु नित्यसुखाभि-व्यक्तिं येऽपि दुःखध्वंसं वा अविद्यानिवृत्तिं वा लिङ्गशरीरक्षयं वाऽपवर्गमाहुस्तेषामपि शरीरपरिग्रहाभावे अविवाद एव। एत-द्विरुद्धायास्तु वात्स्यायनस्मृतेर्द्विष्वर्षकामिनीनीविमोच एवापवर्ग इति, तस्याः काममूलत्वेनाप्रामाण्यनिश्चयादेवर्जनाधिकरणन्यायेन[३] श्रुत्यकल्पनात्। अतःसर्ववादिसम्मतमिदमेवापवर्गलक्षणं कर्काचार्यै-

---

(१) उत पुनरर्थे। किं पुनरयमारम्भ इति वक्ष्यमाणेनास्य सम्बन्ध। तद्-यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति छान्दोग्योपनिषत्पठितां श्रुतिमेकदेशमात्रेण पठति कर्म्मचित-इति। कर्म्मणा कृष्यादिना चितः लोको भोग्य शस्यादिरित्यर्थः।

(२) केवलकर्म्मिणां धूमादिमार्गेण, देवताविद्यानादियुक्तानां कर्म्मिणा-मार्चिरादिमार्गेण गमनम्। उभयत्रापि नास्ति मोक्षप्राप्तिः। धूमा-र्चिरादिमार्गौ च छान्दोग्योपनिषदादिषु पठितौ, शारीरकादौ व्याख्यातौ च।

(३) स च न्यायो मीमांसादर्शनस्य प्रथमाध्यायस्य तृतीयपादे चतुर्थसूत्रे भाष्यकारादिभिर्युक्त्यादिभिः। तत्र हि दृष्टमूलकस्मृतेर्न प्रामाण्यमतो-न तया श्रुतिकल्पनमिति सिद्धान्तितम्। वात्स्यायनीयं कामशास्त्रमपि दृष्टमूलकमिति न तेन श्रुतिकल्पनम्। अधिकरणञ्च, विषयो विशय-श्चैव पूर्व्वपक्षस्तथोत्तरम्। निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मत-मित्युक्तलक्षणम्। विषयो विचारार्हवाक्यम्। विशयः संशयः। पूर्व्व-पक्षः प्रकृतार्थविरोधितर्कोपन्यासः। उत्तरं सिद्धान्तानुकूलतर्कोप-न्यासः। निर्णयो वाक्यतात्पर्यार्थनिश्चयः।

रुदाहृतम्। शुभाशुभकर्मोपभोगनिमित्तनैरन्तर्येण प्राणिनां शरीरपरिग्रहाभावोऽपवर्ग इति। अयञ्चापवर्गो निषेध[१]काम्यवर्जनाश्रित्यानुष्ठानाच्च जायते नेतरथा।

[२]नन्विदमयुक्तं, कर्मणां तावत्कर्मणा पितृलोक इति फलान्तरविधानेन निराकाङ्क्षत्वात्, प्रत्युत एतदेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति, न कर्मणा न प्रजया, नास्त्यकृतः कृतेनेत्यादिश्रुतिसहस्रैर्मुमुक्षोः कर्मणां त्यागविधानात्। अतो न कर्मसाध्यत्वमिति[३] चेत्। सत्यं। तथापि कर्मणां विविदिषावाक्येन मोक्षे उपादानात्। तथा हि, यथाऽश्वेन जिगमिषतीत्यत्र गमनफले ग्रामसंयोगेऽश्वोपादानं, तथा तमेतं वेदानुवचनेन विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेत्यनेनापवर्गोद्देशेन तृतीयाश्रुत्या[४] कर्मणां संयोगपृथक्त्वाधिकरणन्यायेन[५] तादर्थ्येन प्रयोगान्तरानुपादानात्[६] मुक्तेः

(१) निषिध्यते इति निषेधो निषिद्ध इत्यर्थः।

(२) नित्यानुष्ठानादपवर्गो जायते इत्यत्र शङ्कते नन्विति।

(३) न कर्मसाध्यत्वमपवर्गस्येति शेषः।

(४) यज्ञेनेत्यादि तृतीयाश्रुत्येत्यर्थः। श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्येत्यत्र द्वितीयामदं कारकविभक्त्युपलक्षणम्।

(५) स च न्यायो मीमांसादर्शनस्य चतुर्थाध्यायस्य तृतीयपादे पञ्चमसूत्रे व्युत्पादितः।

(६) तादर्थ्येन मुक्त्यर्थत्वेन। प्रयोगान्तरमनुष्ठानान्तरम्। नित्यविध्युत्थिविधया अनुष्ठितानामेव नित्यकर्मणां मुक्तिसाधनत्वम्। न तु मुक्त्यर्थं तेषामनुष्ठानान्तरमित्यर्थः।

कर्मसाध्यत्वम् । न च पदश्रुत्या इच्छावेदनयोरन्यतरस्य भाव्यत्वं[1] स्यान्न मुक्तेरिति वाच्यम् । तयोरपुरुषार्थत्वात्, विधिश्रुत्या पुरुषार्थस्यैव भाव्यत्वात्, पदश्रुत्यपेक्षया तस्या बलीयस्त्वात्[2] । तत्र कथं कर्मणा मोक्षः साध्यत इत्यपेक्षायां पूर्वोक्तोपभोगाभावद्वारेणेति सर्वं समञ्जसम् । अस्ति चात्मज्ञानस्यापि परम्परयोपयोगः[3] । [4]अस्तु चात्मज्ञानस्यापि मुक्तिव्यापारत्वं, व्यापारस्तु तज्जन्यत्वे सति तज्जन्यजनक इति । तच्च नित्यकर्मणैवेति सङ्क्षेपः ।

---

(१) पदश्रुत्या विविदिषन्तीति पदश्रुत्या । विविदिषन्तीति श्रुत्या विविदिषैव भाव्यत्वेन प्रतीयते । विविदिषा च वेदनेच्छा । तत्र प्रकृत्यर्थस्य प्राधान्यविवक्षायां वेदनस्य, प्रत्ययार्थस्य प्राधान्यविवक्षायां चेच्छाया भाव्यत्वं भवितुमर्हति । अयमभिप्रायः । विविदिषन्तीति विध्यर्थे लट् । भट्टनये च भावनैव विध्यर्थः । भावना च किं केन कथमित्यपेक्षितांशत्रयवती । किमिति भाव्याकाङ्क्षा, केनेति करणाकाङ्क्षा, कथमितीति कर्त्तव्यताकाङ्क्षा इति विभागः ।

(२) तथाच पदश्रुत्या इच्छावेदनयोरन्यतरस्य भाव्यत्वसम्भवेऽपि तयोरपुरुषार्थत्वात् तदुपेक्ष्य विधिश्रुत्या वेदनफलस्यापवर्गस्यैव भाव्यत्वमवधार्यते । अपुरुषार्थे विधेः प्रवर्त्तकत्वायोगादिति भावः ।

(३) मुक्ताविति शेषः । ज्ञानकर्मणोः समुच्चयेनानुष्ठानान्मोक्ष इति मते नेदम् । अथवा । देहादिव्यतिरिक्तात्मज्ञानमन्तरेण कर्मानुष्ठानायोगात् कर्मानुष्ठानमन्तरेण च मुक्त्यसम्भवात् देहादिव्यतिरिक्तात्मज्ञानस्य परम्परया मुक्तावुपयोगः ।

(४) अयमेव क्रियायोगो ज्ञानयोगस्य साधक इति स्मृतिमाश्रित्याह अस्तु चेति । चकारो वाऽर्थे । अस्तु वेति तु समीचीनो पाठः । तच्चेति ज्ञानमित्यर्थः ।

ननु तथापि धर्मे,—

पुराण-न्यायमीमांसा-धर्मशास्त्राङ्गमिश्रिताः ।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इत्यादिवाक्यैः प्रमाणत्वेनोपक्रान्तानां[(१)] सदाचारसहितानामेषामभ्यसनीयतया तैरेव प्रतिपादितानामेव कर्मणामनुष्ठेयतया प्रसिद्धौ तद्भिन्नशाक्यादिग्रन्थानामिवास्य न धर्मे प्रामाण्यमिति चेत् । न, इदानीन्तनानामपि माधवप्रभृतीनां मन्वादिवद्वेदानामेव धर्मे प्रामाण्यमभ्युपगन्तॄणां आप्तत्वेन शाक्यवैलक्षण्यतया तत्प्रणीतानां श्रुतिस्मृत्यविरुद्धानां कालमाधवादिनिबन्धानां व्याख्याग्रन्थानाञ्च क्वचिदेकान्तरितस्य द्व्यन्तरितस्य*[(२)] सदाचाराधिकरणन्यायेन[(३)] धर्मे प्रामाण्यं निर्विवादम् ।

आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् ।

---

* द्व्यन्तरितस्य — इति नास्ति क॰पुस्तके ।

---

(१) श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणमिति मनुस्मृतिमनुरुध्याह सदाचारसहितानामिति । आत्मतुष्टेर्वैकल्पिकविषयतया नेह समुल्लेखः ।

(२) स्मृतीनां प्रामाण्यमेकान्तरितमनुमीयमानश्रुतिसापेक्षत्वात् । व्याख्याग्रन्थानां प्रामाण्यं द्व्यन्तरितं, व्याख्येयस्मृतितन्मूलश्रुत्युभयसापेक्षत्वात् ।

(३) स च न्यायो मीमांसादर्शनस्य प्रथमाध्यायतृतीयपादगतः । सदाचाराणां प्रामाण्यं द्व्यन्तरितं, आचारेण स्मृतेः, तया च श्रुतेरनुमानात् । यत्रेदमुक्तम् । आचारात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् । तेन द्व्यन्तरितं तेषां प्रामाण्यं विप्रकृष्यते इति ।

इत्युक्तेः सदाचारस्यापि प्रमाणतया स्वीकरणात् किमुत* तत्प्रणीतानां ग्रन्थानाम् । दृश्यते हि भक्तस्यास्य कल्पसूत्रप्रणीतः सर्वोऽप्यर्थः । तेन कल्पोपजीव्यप्रामाण्यस्यास्य क्वचित्परप्रत्यक्षवेदमूलकत्वं क्वचित् स्वप्रत्यक्षवेदमूलकत्वं चावश्यमभ्युपेयम् । न चैवमस्य प्रणयनं तथापि निरर्थकमेवेति[1] वाच्यम् । अष्टकादिस्मृतीनामिवेष्वपि नानाशाखासमधिगम्यानेककल्पसूत्रोपस्थितानेक-कर्मोपष्टंभकतत्तदितिकल्पानामङ्गप्रधानकर्मणां तत्तद्धर्मणाञ्च विप्रकीर्णतया अल्पपुरुषैरल्पमत्या सुखेन बोद्धुमशक्यत्वात्परमकरुणया सर्वसङ्ग्रहार्थोऽयमारम्भः ।

स्यादेतत् । ननु तथापि स्वाध्यायविध्युत्थापिताध्ययनविधौ उपादेयस्वाध्यायगतस्यैकत्वस्य विवक्षितत्वेन[2] स्वपूर्वजपरिगृहीतस्य वेदावयवैकशाखायामेव स्वाध्यायशक्तौ पारम्पर्यस्यैकवेदस्य द्वयोस्त्रयाणां वा प्रत्येकं एकैकशाखाऽध्ययनविषयत्वेन प्रतिज्ञाता, न त्वन्या । एवञ्च सति अध्ययनस्य दृष्टार्थता सङ्गच्छते । अन्यथाऽदृष्टार्थताप्रसङ्गः स्यात् । तथा कल्पसूत्राणामपि वेदाङ्गत्वेनाध्ययनं स्वाध्यायवद् व्यवस्थितम् । एवञ्चानेकसूत्रार्थसंग्रहः किंफलायेति चेत् । सत्यम् । अधिकारिपरत्वेनात्र वैषम्यात्[3] । न चापस्तम्बव्यनितार्थ-

* किमु — इति क० पुस्तके ।

(१) वेदमूलकतया प्रामाण्ये वेदादेव निर्व्वाहे किमेतत्प्रणयनेनेति भावः ।

(२) स्वाध्यायोऽध्येतव्य इति स्वाध्यायगतमेकत्वं प्रत्येकत्ववदुपादेयगततया विवक्षितमिति भावः ।

(३) तथाचाधिकारिभेदाभिप्रायेणानेकसूत्रार्थसंग्रह इति भावः ।

कारिकास्विति वक्ष्यमाणत्वात् कथमेतदिति[१] वाच्यम् । छत्र्यधिकरणन्यायेनास्यापि सुवचत्वात्[२] । तदुक्तम् ।

> तत्सिद्धिजातिसारूप्यप्रशंसालिङ्गभूमतः ।
> षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पते ॥ इति ।

यद्वा, साकाङ्क्षस्यान्यतः पूरणाय शाखान्तराधिकरणन्याय[३]-मूलकोऽयं संग्रहः ॥ १ ॥ अवान्तरप्रकरणान्याह,—

तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरमतं वक्ष्ये सोमयागं क्वचित् क्वचित् ॥ २ ॥

तत्रेति । अधिकारोनाम कर्मजन्यफलभोक्तृत्वम् । अधि फलेभ्य-उपरि क्रियते अनेनेत्यधिकार इति व्युत्पत्तेः । तत्र सोमप्रयोगे, प्रथमं अधिकारः कस्मिन् कर्मणि कस्याधिकार इति निरूपणम् । कालोवसन्तादिः । स च,

> कालदोषोऽधिकारस्य हानिं वितनुते क्वचित् ।

इत्यादिना वक्ष्यते । आदिपदात् पत्न्यादिनिरूपणम् । प्रथमं, प्रथमपरिच्छेद इति यावत् । प्रतिपाद्यते उच्यते । तया सोमयागं

---

(१) अनेकसूत्रार्थसंग्रहे हि बोधायनादिसूत्रप्रतिपादितार्थकारिकास्वित्यपि वक्तुमुचितमित्यभिमानः ।

(२) तथाचापस्तम्बसूत्रप्रतिपादितार्थानां बाहुल्यात् तथोक्तमिति भावः । छत्र्यधिकरणन्यायस्य, मीमांसादर्शनस्य प्रथमाध्यायस्य चतुर्थपादे व्युत्पादितः।

(३) शाखान्तराधिकरणन्यायस्य मीमांसादर्शनस्य द्वितीयाध्यायस्य चतुर्थपादे चिन्तितः ।

प्रति सूत्रान्तरमतम्। सूत्रान्तराणि बोधायनादीनि, तेषां मतं तदुक्तार्थं, क्वचित् साकाङ्क्षादिस्थले, प्रतिपाद्यते। वीप्साकरणमनियमप्रदर्शनार्थं ॥ २ ॥

प्रसङ्गभङ्गयाह,—

प्रसङ्गादग्निहोत्रेष्टिपश्वाधानोपयोगि यत्।
तत्रापि लेशतः किञ्चित् प्रवक्ष्ये तत्र तत्र च ॥ ३ ॥

प्रसङ्गादिति । प्रसङ्गात् प्रसङ्गसङ्गत्या(१)। अग्निहोत्रं तन्नामककर्मविशेषः । इष्टिर्दर्शपूर्णमासाग्रयणेष्ट्यादिः । पशुरग्निषोमीयादिः । आधानम्। एतेषु उपयोगि यत् देशकालद्रव्यप्रतिनिध्यादि। तत्प्रवक्ष्ये। एतदपि न साकल्येनेत्याह। तत्रापीति। लेशतः सङ्क्षेपेण। सार्वविभक्तिकस्तसिः । न तु क्रमेणापीत्याह । तत्र तत्रेति। तस्मिन् तस्मिन् प्रसङ्गे ॥३॥

तत्र प्रथमोद्दिष्टमधिकारं निरूपयति*,—

अधिकारास्त्रिधा नित्यकाम्यनैमित्तिकत्वतः ।
ते च श्रौतार्थवादोत्थकल्पत्वेन त्रिधा पुनः ॥ ४ ॥

अधिकारा इति। कर्मणां त्रैविध्यादधिकारस्यापि त्रैविध्यमिति भावः। नित्यादीनां लक्षणानि वक्ष्यन्ते। पुनस्ते अधिकाराः श्रौतार्थवादकल्पत्वेन त्रिविधा भवन्ति। एतदुक्तं भवति। सौर्यं चरुं निर्वपेदित्यादिः श्रौतोऽधिकारविधिः। प्रतितिष्ठन्ति ह वा य एता रात्री-

* नास्त्येतत् ख० पुस्तके।

(१) स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग ।

रूपयन्तीत्यादिरार्थवादिकोऽधिकारः । विश्वजिता यजेतेत्यादौ कल्पो[1] विधिरित्याद्यूह्यम् ॥४॥

अथ पितृयज्ञे अधिकारचिन्ता । तदर्थमिदं विचार्यते । किं पितृयज्ञोदर्शाङ्गमुत नेति । तत्र मतभेदेनोभयमपि सिद्धान्तयति ।

पितृयज्ञस्य चाङ्गत्वमापस्तम्बेन दूषितम् ।
साधितं तु भरद्वाजसूत्रभाष्यकृता श्रुतेः* ॥ ५ ॥

पितृयज्ञस्येति । पितृयज्ञ इति तत्प्रख्यशास्त्रात्कर्मनाम[2] । अङ्गत्वं दर्शाङ्गत्वम् । कात्यायनोऽपि । प्रकरणलिङ्गानुग्रहवचनानाहिताग्निश्रुतिभ्योऽनङ्गमिति पूर्वपक्षसूत्रेणानङ्गत्वमाह । श्रुतेरिति । हेतौ पञ्चमीयम् । पूर्वेद्युः पितृभ्यो निष्क्रीय प्रातर्देवेभ्यः प्रतनुते इति श्रुतेः । कात्यायनस्तु । अङ्गं वा समभिव्याहारादिति सिद्धान्तमाह ॥५॥

---

* पञ्चमषष्ठश्लोकौ व्यत्ययेन लिखितौ ग० पुस्तके ।

---

(१) कल्प्यते इति कल्पः । कल्प्य इति तु समीचीनः पाठः । विश्वजिता यजेतेत्यादौ फलश्रवणाभावात् निष्फले च नित्यातिरिक्ते प्रवृत्त्यसम्भवात् तत्तत्फलविशेषकल्पनायाञ्च विनिगमनाऽभावात् सर्व्वेषामिच्छागोचरः स्वर्ग एव फलत्वेन कल्प्यते । तेन स्वर्गकामस्य तत्राधिकारः । स्पष्टमिदं मीमांसादर्शनस्य चतुर्थाध्यायस्य तृतीयपादे ।

(२) एतच्च मीमांसादर्शनस्य प्रथमाध्यायस्य चतुर्थपादे तत्प्रख्यञ्चान्यशास्त्रमित्यस्मिन् सूत्रे विचारितम् ।

एवमङ्गत्वपचे आधानपितृयज्ञयोरधिकारसाधर्म्यार्थमाह ।

आधानं नित्यमेवेष्टं पितृयज्ञोऽपि तादृशः ।
कैश्चिन्मीमांसकैः काम्यः पितृयज्ञो निरूपितः* ॥ ६ ॥

आधानमिति । आधानं नित्यमिति याज्ञिकसिद्धान्तः । हवि-र्यज्ञसंख्यासु पाठात्पुरुषोपयोगित्वात् । चिन्ताप्रयोजनं तु यथा-ऽधिकारं विनियोगज्ञापनेति । तेनाङ्गहीनानामप्यधिकार इति । एवमाधानपितृयज्ञयोर्नित्याधिकारमुक्त्वा मतान्तरेण काम्याधिका-रमाह । कैश्चिदिति । वार्तिकमते पिण्डपितृयज्ञस्यानङ्गत्वपचेण काम्यत्वम् ॥६॥

मतान्तरेणाधानस्यापि काम्यत्वमाह ।

आधानस्यापि काम्यत्वं बोधायनमताद् भवेत् ।
सर्वकामार्थमाधानमिति तेन निरूपितम् ॥ ७ ॥

आधानमिति[†]। बोधायनीये आधानस्य काम्यत्वमुक्तं, तेनो-भयोः काम्याधिकारोऽप्यस्त्येव ॥७॥

अथेदं श्रूयते। पौर्णमास्यां पौर्णमास्या यजेत, वसन्ते[‡] ज्योतिषा यजेतेत्यादि च। तत्र केषु चिन्नित्यकाम्याधिकारः, केषु चित्का-म्यनैमित्तिकाधिकारः, केषु चिन्नित्याधिकार इत्याह।

---

† इत्यमेव पाठः सर्व्वत्र। परन्तु आधानस्येति — इति भवितुमुचितम्।

‡ वसन्ते वसन्ते — इति क० पुस्तके पाठः।

द्विप्रकाराधिकाराणि कर्माण्यन्यानि कानिचित् ।
ज्योतिष्टोमोनिरूढश्च पशुः शौत्रामणी तथा ॥ ८ ॥
चातुर्मास्यानि दर्शश्च पौर्णमासोऽग्निहोत्रकम् ।
वाजपेय इतीमे स्युर्नित्याः काम्या इति द्विधा ॥ ९ ॥

द्विप्रकाराधिकाराणीति । नित्यकाम्यभेदेन द्वौ प्रकारौ । अन्याम्याधानभिन्नानि । कानिचित्, न सर्वाणि । आग्रयणादीनां नैमित्तिककाम्यत्वस्य वक्ष्यमाणत्वात् । तान्येवाह । ज्योतिष्टोम-इति । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, स्वाराज्यकामो वाजपेयेन यजेतेत्यादि तत्तद्वाक्येषु फलश्रवणादिति भावः ॥९॥

ज्योतिष्टोमे नित्यकाम्यत्वस्य विशेषमाह ।

ज्योतिष्टोमस्य चाप्यग्निष्टोमसंस्थस्य नित्यता ।
अथ वोक्थ्यादिसंस्थस्यापीच्छन्त्यन्ये तु* नित्यताम् ॥१०॥

ज्योतिष्टोमस्येति । अग्निष्टोमः सामविशेषः समाप्तौ यस्य सोऽग्निष्टोमसंस्थो ज्योतिष्टोमः । स नित्यः । अन्ये त्वग्निष्टोमादयोऽनित्याः काम्या इति यावत् । मतान्तराश्रयणेनाह । अथ वेति । उक्थ्यादीनामपि संस्थासु पाठान्नित्यतेति भावः ॥१०॥

वसन्ते वसन्त इति वीप्साश्रवणात् नियतनिमित्तकालाच्च ज्योतिष्टोमस्य नित्यत्वम् । कामनाऽधीनत्वाच्च काम्यत्वम् । तत्र *नित्यत्वे सोमस्यार्त्तिः सहत्करणं वेति* मतभेदेन पद्यद्वयमाह ।

* अन्येऽपि, — इति क॰ ख॰ पुस्तकयोः पाठः ।

ज्योतिष्टोमस्य नित्यत्वादावृत्तिः प्रतिवत्सरम् ।
अथ वा सकृदेव स्यान्नित्योऽप्याधानकर्मवत् ॥ ११ ॥

ज्योतिष्टोमस्येति । प्रतिवत्सरं वसन्तं* प्राप्येत्यर्थः । अथ वा शब्दो-विकल्पे । वीप्सा आदरार्था[1] । पुरुषसंस्कारत्वेन गौतमस्मृतौ संस्काराणां पाठात् नित्यानां सकृदेवानुष्ठानं दृष्टान्तेनाह । आधानेति ॥ ११ ॥

काम्येन नित्यसिद्धिमाह ।

काम्यबुद्ध्या यदैतानि कर्माणि कुरुते तदा ।
तेनैव नित्यसिद्धिः स्यान्न नित्यार्था† पृथक् क्रिया ॥ १२ ॥

काम्येति । स्पष्टम् ॥ १२ ॥

क्वचित्कामनिमित्ताभ्यामधिकारस्तत्रोदाहरणमाह ।

क्वचित्कामनिमित्ताभ्यां सहिताभ्यामधिक्रिया ।
यथैवाग्रयणे‡ यागे यथा जातेष्टिकर्मणि ॥ १३ ॥

क्वचिदिति । अत्र शरत्कालीननवशस्यागमो निमित्तम् । तदशनं

---

* वसन्तं वसन्तं, — इति क० पुस्तके पाठः ।

† नित्यार्थं, — इति ग० पुस्तके पाठः ।

‡ यथैवाग्रयणे, — इति क० पुस्तके पाठः ।

---

(१) तथाच पुरुषसंस्कारस्याधानवत् सकृदनुष्ठानेनैवोपपत्तेः न नित्यस्यापि ज्योतिष्टोमस्य प्रतिवत्सरमावृत्तिः । वसन्ते वसन्ते इति वीप्सा तु न नित्यत्वार्था किन्त्वादरार्थेति भावः ।

कामः । एवं पुत्रोत्पत्तिर्निमित्तम् । पूतत्वादिकं कामना । तत्र सकृदनुष्ठानेनोभयसिद्धिः[1] ॥ १३ ॥

अथ नैमित्तिकाधिकार एवेति एकदेशिमतमाह ।

केचिन्निमित्तमात्रेणैवाधिकारमिहाब्रुवन् ।
पूतत्वोत्पत्त्यन्नवाप्ती*कामाभावेऽपि सिध्यतः ॥ १४ ॥

केचिदिति । पूतत्वान्नवाप्ती †[2] आनुषङ्गिकं फलम् । तत्तु कामनां विनैव सम्भवति ॥ १४ ॥

उद्भिदादिष्वधिकारस्वरूपमाह ।

अन्ये नैमित्तिकाः केचित् यागाः काम्यास्तथाऽपरे ।
काम्यनैमित्तिकाः केचिदिति त्रैधं प्रकीर्त्तितम् ॥ १५ ॥

अन्ये इति । उक्थ्यादिभ्योऽन्ये विश्वजिदादयः । सत्रायागूर्या-

---

* पुत्रोत्पत्तिरन्नवाप्तिः', — इति ग० पुस्तके पाठः ।

† पूतत्वान्नावाप्ति', — इति क० पुस्तके पाठ' ।

---

(१) काम्यते इति कामः फलम् । कामना इत्यत्रापि छदविहितो भावोऽव्यवत् प्रकाशते इति न्यायेन फलमेवार्थः । तथाचैतन्मते व्यायव्योऽष्टि-र्जातेष्टिश्च नैमित्तिकी काम्या च । द्वयोरधिकारयोः संवलनात् सकृदनुष्ठानमिति भावः ।

(२) पुत्रपूतत्वमन्नावाप्तिश्चेत्यर्थः । वृद्धि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति-नेनाकारलोप' ।

शक्तौ विश्वजितोऽतिरात्रेणेत्यादिवाक्यैर्नैमित्तिकत्वम् । अपरे श्येनयागादयः । उपसंहरति इतीति ॥ १५ ॥

अस्मिन्नर्थे भरद्वाजमतमाह ।

काम्यतापि हि सोमानां वैकृतानामशेषतः ।
नित्यतोक्ता भरद्वाजेनाधिकारमखैर्विना ॥ १६ ॥

काम्येति । अशेषाणामित्यशेषतः वैकृतानां विश्वजिदादीनां सर्वेषां यागानां नित्यकाम्यत्वं भरद्वाजसूत्रोक्तं, अधिकारमखा ऐन्द्राग्नाश्विनादयः, तान् वर्जयित्वा । तेषां नैमित्तिकत्वमेवेति भावः ॥ १६ ॥

निमित्तमधिकारकमुक्तं[1], तच्चोभयनिष्ठम् अन्यतरनिष्ठं वोभयोरप्यधिकारं जनयतीत्याह ।

जायापुरुषसम्बन्धि निमित्तमधिकारकृत् ।
जीवनादि यथा होमे गेहदाहादि वा यथा ॥ १७ ॥

जायेति । उदाहरति । जीवनादीति । उभयसम्बन्धि यावज्जीवत्वं होमाधिकारनिमित्तम् । तेनैकतरस्तौ नाधिकारः । यदा त्वग्नयः सन्ति, तदा, तदाऽऽऋरपत्नीकोऽप्यग्निहोत्रमाहरेदिति वचनादग्निहोत्रेऽधिकारः, न तु दर्शपूर्णमासादौ, तथा व्यवहाराभावादिति तत्त्वरत्ने । अन्ये दर्शपूर्णमासाग्रयणहोमनैमित्तिकेष्टिष्वपि अपत्नीकस्याधिकार इत्याहुः । गेहदाहोऽपि उभयनिमित्तम् । पाणिग्रहणाद्धि सहत्वं कर्मसु तथा द्रव्यपरिग्रहेषु चेति स्मृतेः ॥ १७ ॥

---

(१) अधिकारकमधिकारहेतु ।

अन्यतरस्योदाहरणमाह ।

क्वचिदन्यतरस्थेन निमित्तेनोभयोरपि ।
साधारणोऽधिकारः स्याद् भार्यासङ्क्रमणेष्टिवत् ॥ १८ ॥

क्वचिदिति । भार्यासंक्रमणेष्टिराहिताग्नेर्द्वितीयपाणिग्रहणोत्तर-मान्नाता इष्टिः । अत्र यष्टृगतमेव* निमित्तमुभयाधिकारकम् ॥१८॥

क्वचिदेकस्थं द्वयस्थं वा अधिकारकमुदाहरति† ।

क्वचिदन्यतरस्थं वा द्वयस्थं वाऽधिकारकम् ।
यथा मांसाशने वाऽस्रुकर्मण्यन्तभापणे ॥ १९ ॥

क्वचिदिति । मांसाशनादि द्वयस्थमेकस्थं वा स्नातपत्नीस्नात-व्रत्याद्याः प्रयोजयति,—इति भावः ॥१९॥

प्रधानकर्मण्यधिकृतस्यापि गुणकर्मण्यधिकारान्तरं भवतीत्याह ।

क्वचित्त्वधिकृतस्यैव चाधिकारान्तरं भवेत् ।
यथा गोदोहनाद्येषु पशुकामोऽधिकारभाक् ॥ २० ॥

क्वचिदिति । गोदोहनेन पशुकामः प्रणयेदिति वचनात् ॥२०॥

अथ निषेधवाक्येषु निवृत्तेरेव फलत्वात्तस्याश्च प्रवृत्तं प्रत्येव सार्थकत्वात्‡ स च रागतः शास्त्रतो वा भवति । अतस्तमप्रत्येव निषेधशास्त्रमधिकारकृद्भवति न सर्वानित्याह ।

---

* यष्टृपत्नमेव,— इति ख० पुस्तके पाठः ।

† अधिकारमुदाहरति, — इति ख० पुस्तके पाठः ।

‡ समर्थत्वात्, — इति ग० पुस्तके पाठः ।

निषिद्धेषु* प्रवृत्तः सन्निषेधेष्वधिकारवान् ।
मन्त्रशून्योऽपि† भावार्थे विद्वानेवाधिकारवान् ॥ २१ ॥

निषिद्धेष्विति । विद्वत्त्वस्याधिकारितावच्छेदकमिति वक्ष्यति । दर्विहोमादौ मन्त्राभावाद्विद्वत्त्वमव्याप्तं स्यात्तदर्थमाह । मन्त्र इति ॥२१॥

यावज्जीवमग्निहोत्रं‡ जुहोति, शुचिना कर्म कर्त्तव्यमुपवासवता§ बद्धकच्छेन कर्त्तव्यमित्यादिवाक्यैः कालशौचादिमज्जीवनं निमित्तमधिकारकमित्याह ।

होमादौ कालशौचादिमन्निमित्तन्तु(१) जीवनम्‖ ।
अग्निहोत्रादिकं तस्मात् काले शौचे¶ विधीयते ॥ २२ ॥

होमादाविति । आदिपदाद्दर्शपूर्णमासादि । द्वितीयादिपदाद्भुक्त्यादि । उपसंहरति । अग्निहोत्रादिकमिति ॥२२॥

अकाले कृतमकृतमिति न्यायेन विहितमकाले कृतस्य पुनःकरणम् । अशुचित्वादिकृते सन्देहः । तदर्थं मतान्तराभिप्रायेण(२) पद्यद्वयमुपन्यस्यति ।

---

* निषिद्धेषु, – इति क० ख० पुस्तकयोः पाठः । एवं परत्र टीकायाम् ।
† न्यूनेऽपि, – इति क० ख० पुस्तकयोः पाठः ।
‡ यावज्जीवमग्निहोत्रं, – इति क० पुस्तके पाठः ।
§ मुभयवासवता, – इति ख० पुस्तके पाठः ।
‖ जीवितम्, – इति ग० पुस्तके पाठः ।
¶ तस्य काले शौचे, – इति क० ख० पुस्तकयोः पाठः ।

---

(१) कालस्य शौचस्येत्यादिविग्रहः ।
(२) अन्तरशब्दो भेदार्थः । मतभेदाभिप्रायेणेत्यर्थः ।

अज्ञानादशुचिः कर्म कृत्वाऽशुचिधनेन वा ।
नावर्तयेत्पुनः कर्म प्रायश्चित्तेन शुध्यति ॥ २३ ॥

अज्ञानादिति । अशुचिधनेन,

स्त्वलिगात्मा धनं जाया शुद्धं यस्य चतुष्टयम् इति ।

स्मरणात् । चोरितद्रव्यस्यैवाशुचित्वमिति वक्ष्यति । नावर्त्तयेदिति । कृतस्य पुनः करणं नास्तीति वचनात् । तथा च निदानसूत्रम् । अङ्गमपरिसमाप्ते प्रधाने क्रियते परिसमाप्ते तु न(१) कर्तव्यमित्यादि ॥२३॥

पक्षान्तरमाह ।

अपरे त्वशुचिद्रव्यकर्त्रादिकृतकर्मणः ।
आवृत्तिः सर्वथा कार्येत्येवमाहुर्विपश्चितः ॥ २४ ॥

अपरे त्विति । स्पष्टम्*। अचाऽऽहुः। परस्यां व्याख्यायां ज्ञानाज्ञानव्यवस्थाभेदेन विकल्पमाहुः । तथाचाज्ञानादशुचिना कर्मणि† ज्ञानोत्तरं प्रायश्चित्तमात्रं नावृत्तिः । ज्ञानात्करणे तु पुनरावृत्तिरिति ॥२४॥

प्रसङ्गात् क्वचित्कर्मणि दीक्षितस्यानधिकारमाह ।

---

* नास्त्येतत् क० पुस्तके ।

† इत्यमेव पाठः सर्वत्र । कर्मणि कृते, — इति तु भवितुमुचितम् ।

---

(१) प्रधानपरिसमाप्तेः पूर्वं वैगुण्येऽवगते, पुनः सर्वमेव कर्त्तव्यम् । समाप्ते तु प्रधाने नावृत्तिरित्यर्थः ।

दीक्षितोऽनङ्गभूतेष्टिहोमपश्वादि नाचरेत् ।
होमेष्टिपशुमध्येऽपि काम्यं कर्मान्तरं न च ॥ २५ ॥
नित्यं नैमित्तिकं तन्त्रं* प्राप्तकालं समाचरेत् ।

दीक्षित इति । दीक्षितो न जुहोतीत्यादिवाक्यात् पुरुषार्थभूतहोमादीनां बाधः क्रियते । न त्वङ्गभूतहोमप्रायश्चित्तेष्ट्यादीनां बाधः। अथ प्रवृत्ते नियतं दोषविशेषादित्यधिकरणन्यायेनाह । होम इति। कर्मान्तरनिषेधेन गुणान्तरन्तु भवति। प्राप्तकालमिति। पश्विष्ट्यादौ क्रियमाणे दैवात्सायङ्काले समागते मध्ये सायं होमं समाप्यैव पूर्वप्रवृत्तसमाप्तिः। एवमग्निहोत्रार्थमुद्धरणे कृते सन्ध्याकालप्राप्तौ सन्ध्यां कृत्वैव होमः ॥२५॥

विशेषमाह ।

अल्पतन्त्रे† महातन्त्रं यदि सन्निपतेत् क्वचित् ॥ २६ ॥
तन्मध्ये तन्न कर्त्तव्यं तत्समाप्य तदाचरेत् ।

अल्पतन्त्रे इति। यथा होमे क्रियमाणे रासभान्तरा[1]गमने समाप्यैवेष्टिः। श्वैडकवराहादीनामन्तरागमनेऽल्पतन्त्र प्रायश्चित्तमुदकधाराद्यं कृत्वैवाद्ये कर्मण्यधिकार इति भावः। एतदुक्तं भवति। प्रवृत्ते कर्मणि नित्यं नैमित्तिकं वा कर्मान्तरं अल्पतन्त्रं समानतन्त्रं वाऽऽपतति तदोत्तरकर्माधिकारार्थं बादरायणिन्याय बाधि-

* तन्त्र, — इति ग॰ पुस्तके पाठ ।

† तन्त्रे, — इति क॰ पुस्तके पाठः। एवं परत्र टीकायाम् ।

(१) रासभस्य अन्तरा मध्ये गमने इत्यर्थः ।

त्वाऽऽगन्तुकं कृत्वैव शेषस्य करणम्। मध्यतन्त्रपाते* तु अङ्गाङ्गं प्रधानाङ्गेनेति न्यायेन प्रवृत्तं समाप्य तत्कार्यमिति ॥२६॥

समानं तन्त्रमपि पश्चादेव कार्यमिति एकदेशमनेनाह† ।

कैश्चित्पश्विष्टिमध्येऽन्यत्पश्विष्ट्यादि समागतम् ॥ २७ ॥
तन्मध्ये तन्न कर्त्तव्यं‡ पाश्चात्यं कार्यमिष्यते ।

कैश्चिदिति । स्पष्टम् ॥२७॥

कृतप्रकृतियागत्वञ्च विकृतिष्वधिकारप्रयोजकमित्याह ।

प्रयुक्तप्रकृतेरेव विकृतावधिकारिता ॥ २८ ॥
नायं नियम इत्यन्ये यथाकामं प्रयुञ्जते§ ।

प्रयुक्तेति। दर्शपूर्णमासाभ्यामिष्ट्वाऽन्येन यजेत, एष वाव प्रथमो-यज्ञोयज्ञानामित्यादि||वचनात् ॥२८॥

एकदेशिमतमाह। नायमिति। अकृतसोमयागस्यातिरात्रा-दिकं, अकृतदर्शपूर्णमासस्यापि पर्जन्यादिकामनायां कारीर्यादिकं भवति। अपरा व्याख्या। असोमयाजिनोऽप्यग्निषोमीयविकारा-मतभेदेन विकल्पिता इति ।

एवं श्रूयते। पुत्रे जाते वैश्वानरं द्वादशकपालं निर्वपेदिति। तत्र संशयः। अनेकभार्यस्यैकस्यामपि पुत्रोत्पत्तौ एकस्या एवाधि-

---

* इत्यमेव पाठः सर्व्वत्र। मध्यतन्त्रपाते, — इति तु भवितुमुचितम् ।

† इत्यमेव पाठ सर्व्वत्र। एकदेशिमतेनाह इति तु भवितुमुचितम् ।

‡ न कार्य्यं तत् समाप्यैव, — इति ग० पुस्तके पाठः ।

§ प्रयुज्यते, —'इति क० ग० पुस्तकयोः पाठः ।

|| यज्ञानां यज्ज्योतिष्टोम इत्यादि, — इति क० पुस्तके पाठ· ।

कार उत सर्वासामप्यधिकार इति। तत्रैकस्या अनल्पोपनिमित्तमेकस्या आतपतीतिन्यायेन प्राप्तं पूर्वपक्षं निराकरोति।

बह्वीनामेकपत्नीनामेकस्याः* पुत्रजन्मनि ॥ २९ ॥
सर्वासां तेन जातेन जातेष्टावधिकारिता।

बह्वीनामिति। एकपत्नीनामित्यवधारणे(१) षष्ठी ॥२९॥

ननु

भ्रातॄणामेकजातानां यद्येकः पुत्रवान् भवेत्।
सर्वे ते तेन पुत्रेण पुत्रिणोमनुरब्रवीत् ॥

इति मनूक्तेरेकस्य भ्रातुः पुत्रे जाते सर्वेषामप्यधिकारो न वेति सन्देहे सिद्धान्तमाह।

भ्रातॄणां यद्यनेकेषामेकस्योत्पद्यते सुतः ॥ ३० ॥
स एवैकोऽधिकारी स्यात् जातेष्टावितरे न तु।

भ्रातॄणामिति ॥३०॥

ननु श्रुतौ विशेषश्रवणात्† पुत्रशब्दस्य चापत्यवाचकत्वेन पुमान् पुत्रोजायत इत्यत्र दृष्टत्वात् क्षेत्रजाद्युत्पत्तौ कन्याजनने चेष्टिसिद्धिः स्यान्न वेति सन्देहे सिद्धान्तमाह।

क्षेत्रजादिसुतोत्पत्तौ पुत्रिकातनयोद्भवे ॥ ३१ ॥
यमौ जातौ पुमांसौ चेत् तयोरेकोऽपि वा पुमान्।

---

* मेकस्यां, — इति ग॰ पुस्तके पाठः।

† इत्यमेव पाठः सर्वत्र। विशेषाश्रवणात्, — इति तु भवितुमुचितम्।

---

(१) निर्धारणार्थेत्यर्थः।

दुहितुर्जनने वाऽपि न जातेष्टिर्विधीयते ॥ ३२ ॥
हुत्वा वैश्वानरीं कुर्यान्मारुतीमिष्टिमप्यथ ।

क्षेत्रजादीति । स्पष्टम् ॥३१॥ प्रायश्चित्तसमुच्चयार्थमाह ।
यमाविति ।

मरुद्देवताकचरुद्रव्यकोयागः ॥३२॥

यमयोर्मरणे विशेषमाह ।

मारुत्येकैव मरणे स्त्रीत्वे वा यमयोर्द्वयोः ॥ ३३ ॥
पुमानन्यतरः सोऽपि मृतस्तत्रापि सैव हि ।

मारुतीति । अधिकारात् यमयोरित्यध्याहारः । एकैव मारुती ।
न जननिमित्तजातेष्टिः । एकलिङ्गयोर्भिन्नलिङ्गयोर्वा यमापत्य-
योर्मरणे केवला मारुतेष्टिरित्यर्थः ॥३३॥

एवं साधारणमधिकारं निरूप्य विशेषाधिकारार्थं प्रतिज्ञापयति ।

एवमुच्चावचेषूक्तेष्वधिकारोपयोगिषु ॥ ३४ ॥
पुनः सङ्क्षेपतः सोमस्याधिकारी निरूप्यते ।

एवमिति । उच्चा असाधारणाः, अग्निहोत्रादिषु अधिकारोप-
योगिनः । अवचाः साधारणाः । यथैकस्याः पुत्रोत्पत्तौ सर्वासाञ्जा-
तेष्टावधिकारोपयोगिनः । तेषु अधिकारोपयोगिषु अधिकारे
फलभुक्तौ उपयोगो येषान्तेषु उक्तेषु, प्रसक्तानुप्रसक्ततयेति शेषः ।
पुनः प्रकृतमेव सङ्क्षेपेण सोमाधिकारिणं निरूपयिष्यामः । सङ्क्षेप-
ग्रहणाच्च यानि अधिकारिविशेषणानि नोक्तानि, तानि उपल-
क्षणेन ज्ञातव्यानीत्यर्थः । यथा पवित्रपाण्यादि ॥३४॥

तत्र सोमेज्याऽधिकारिविशेषणान्याह ।

आहिताग्निः शुचिः शक्तः सश्रद्धोऽपतितोद्विजः ॥ ३५ ॥
स्वर्गं कामयमानोऽन्यत् यत्किञ्चिद्वा फलान्तरम् ।

आहिताग्निरिति । सिद्धाग्निमत्त्वमेव सर्वक्रतूनां प्रवृत्तेर्न ततः प्राक्[१] । एवं शुचित्वं शक्तत्वं सश्रद्धत्वं अपतितत्वं द्विजत्वं चाधिकारितावच्छेदकम् । अश्रद्धया हुतञ्चत्तमित्यादि वचनात् । ब्राह्मणराजन्यवैश्यानामिति श्रुतिरिति कात्यायनोक्तेर्द्विजानामेवाधिकारः । स्वर्गकामत्वमप्यधिकारितावच्छेदकं, ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवचनात् । यत्किञ्चित्कामनावत्त्वमपि तत् । स्त्रीपुत्रकामनयाऽपि सोमेऽधिकारः, स्त्रीराष्ट्रपुत्रायुष्कामानामप्येवम् इति वचनात् ॥ ३ ५॥

ननु फलसमुच्चये सति अनेकफलोद्देशेन सकृत्प्रयोगः, उत प्रतिकाममावृत्तिरिति । तत्र पूर्वपक्षमेव[२] सिद्धान्तत्वेन स्वीकरोति ।

अन्यत्कामयमानोऽपि स स्वर्गं वाऽपि केवलम् ॥ ३६ ॥
समुच्चितं वा युगपत् स्वर्गादि सकलं फलम् ।
निष्कामोऽप्येनसोभीतो वसन्ताद्यनिमित्तवान् ॥ ३७ ॥

अन्यदिति । स्वर्गादन्यत्पुत्रादि । स्वर्गं वा केवलं कामय-

---

(१) सिद्धाग्निमत्त्वं यत्तं प्रथमेव क्रतूनां प्रवृत्तिर्न तु ततोऽग्निसिद्धेः पूर्वं क्रतुप्रवृत्तिरस्तीत्यर्थः ।

(२) आशङ्कितयोः पक्षयोः प्रथमपक्षम् अनेकफलोद्देशेन सकृत्प्रयोग इति पक्षमिति यावत् ।

मानो यथा निरपेक्षः* स अधिकृतो भवतीत्यर्थः ॥ १६ ॥

तथा, समुच्चितं स्वर्गपश्वादि सकलं फलं(१) युगपत्कामयमानमधि-कारी। पर्यायेणेत्यपरेषां सिद्धान्तः(२)। मित्रविन्दा श्रीराष्ट्रमित्रायुष्कामस्येत्यादावप्येवम्। एवं सोमस्य काम्यत्वमुक्त्वा नित्यनैमित्तिकत्वमप्याह। निष्काम इति। कामनाभाववतोऽप्यधिकारः। विधेर्भाव्याकाङ्क्षानिवृत्त्यर्थमाह। एनस इति। एनः पापम्। एतेन उपात्तदुरितक्षयस्योत्पत्स्यमानदुरितप्रतिबन्धस्य वा भाव्यत्वमुक्तं भवति(३)। वसन्त इति श्रवणात् वसन्ते निमित्ते ज्योतिष्टोमस्य विधानाद्वसन्तकालनिमित्तमप्यधिकारितावच्छेदकम् ॥ १७॥

---

* निरपेक्षं, — इति क॰ पुस्तके पाठः।

---

(१) फलं प्रतीत्यर्थः।

(२) सकलफलकामना न युगपत् किन्तु पर्य्यायेणेत्यन्येषां सिद्धान्त इत्यर्थः।

(३) अयमर्थः। भट्टमते भावनैव विध्यर्थः। भावना चोत्पादनापरपर्य्यायो भावयितुर्व्यापारः। सा च किं केन कथमित्यंशत्रयमपेक्षते। किमित्याकाङ्क्षायां फलं भाव्यतयाऽन्वेति। निष्फले प्रवृत्त्ययोगात्। केनेत्याकाङ्क्षायां धात्वर्थो यागादिः करणत्वेनान्वेति। यदाहुः। भावनैव हि भाव्येन फलेनान्वयमर्हति। धात्वर्थः करणं तत्र लाघवात् सन्निकर्षतः इति। कथमित्याकाङ्क्षायामङ्गजातमितिकर्त्तव्यतयाऽन्वेति। एवञ्च, प्रयाजादिभिरुपकारं सम्पाद्य दर्शपूर्णमासयागेन स्वर्गं भावयेत् स्वर्गकाम-इति स्वर्गकामो दर्शपूर्णमासाभ्यां यजेतेतिविधिवाक्यस्य बोधः। नित्यकर्म्मणि तु फलाश्रवणात् उपात्तदुरितक्षयो वा अकरणभाव्यनिष्टप्रतिबन्धो वा फलतयाऽन्वेति। तदुक्तम्। क्षयं केचिदुपात्तस्य दुरितस्य प्रचक्षते। अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते। नित्यक्रियां तथा चान्ये अनुषङ्गफलां श्रुतिमिति।

मतान्तरमुपन्यस्यति ।

यदा वसन्तकालादिजीवनाख्यनिमित्तवान् ।
सोमेन यजते ब्रह्मविद्याशेषतयाऽथवा * ॥ ३८ ॥

यदेति । वीप्साश्रवणात्[1] वसन्तकालीनजीवनमधिकारितावच्छेदकमिति भावः । अपवर्गफलमप्यधिकारिविशेषणमाह । सोमेनेति । ब्रह्मविद्याऽङ्गत्वेन कर्मणोमोक्षसाधनत्वं स्फुटीकृतं भगवता अर्जुनं प्रति । तद्यथा ।

"कर्मणा शुद्धहृदयोब्रह्मबुद्धिमुपैष्यति" ।

"कर्मणैव हि संसिद्धिमास्थिताजनकादय." । इत्यादि बहुभिर्वाक्यैर्गीतायामन्यत्रापि च । स्वर्गं कामयमान इत्यारभ्य यानि विशेषणानि[2], यथासम्भवं † पर्यायेण बोध्यानि[3] ॥ ३८॥

परिवेत्तादिदोषनिवृत्त्यर्थमधिकारिविशेषणान्तरं सर्वसाधारणमाह ।

अधिकारदशाप्राप्तपुरुषान्तरवर्जितः ।
कर्चवस्थागतैरन्यैर्वक्ष्यमाणैस्त्रिभिर्युतः ॥ ३९ ॥

अधिकारेति । अधिकारदशायां प्राप्तं पुरुषान्तरं, तेन वर्जितोहीनः । सत्यधिकारे पितरि ज्येष्ठे सोदरे चानीजाने सति

* शेषतया च वा, – इति क० पुस्तके पाठ । शेषतयाऽपि वा, – इत्यपि पाठान्तरमस्ति ग० पुस्तके ।

† इत्थमेव पाठ सर्व्वत्र । तानि यथासम्भवं – इति तु युक्तम् ।

(१) वसन्ते वसन्ते इति वीप्साश्रवणादित्यर्थ ।

(२) उच्यन्तीति शेष ।

(३) तथाच विशेषणानामेकैकमधिकारितावच्छेदकमिति भाव ।

अधिकारो नास्तीति तदभाववत्त्वमधिकारितावच्छेदकमिति भावः। पाइ[१] विद्वत्त्वमथधिकारितावच्छेदकमित्यत्र पचद्वयमाह। कर्त्तेति। वच्यमाणैरनुपदम्, अन्यैः कर्त्तुरवस्थायान्दशायाङ्गतैर्विद्यमानैस्त्रिभि- र्विशेषणैर्युक्तोऽधिकारी ॥३८॥

तान्येवाह।

स्वाध्यायविधिसंसिद्धकृत्स्नवेदार्थवेदनः।
यद्वाऽध्ययनसंसिद्धानुष्ठेयमखमात्रवित् ॥ ४० ॥

स्वाध्यायेत्यादिना। स्वाध्यायोऽध्येतव्य इति विधिचोदितषडङ्ग- सकलस्वशाखाऽपर्यायवेदाध्ययनसंसिद्धार्थज्ञानवत्त्वमधिकारितावच्छे- दकमिति भावः। तत्र, विधिवाक्यानां विधायकत्वेनार्थवादानां स्तावकत्वेन, मन्त्राणां स्मारकत्वेन, नामधेयानां परिच्छेदकत्वेन धर्म्मे प्रामाण्यमिति सकलोऽपि वेदो धर्मे प्रमाणमित्यन्यत्र विस्तरः। तच्चार्थप्रत्यायनद्वारा, न तूच्चारणमात्रेण प्रमाणम्[२]। एवं चाध्ययनं दृष्टार्थम्।

द्वितीयं पक्षमाह। यद्वेति। स्वाध्यायविध्युत्थापितानुष्ठेयमात्रो- पयोगिस्वाध्यायार्थज्ञानवत्त्वमधिकारित्व[३]मिति भावः। तेनाध्ययन- दृष्टार्थत्वं युक्ततरं भवतीत्यभिप्रायः ॥४०॥

---

(१) मीमांसादर्शनस्य षष्ठाध्यायस्य प्रथमे पादे ऽधिकारश्चिन्तितः। तत्र च विदुष एवाधिकार इति स्थितम्।

(२) तत्र प्रमाणमर्थप्रत्यायनद्वारेति सम्बन्धः। विधेयप्राधान्यविवक्षया तच्चेति नपुंसकनिर्देशः।

(३) अधिकारितावच्छेदकमिति, अधिकारिविशेषणमिति वाऽर्थः।

तृतीयं पक्षमाह ।

यद्वाऽध्ययनसंसिद्धविज्ञानरहितोऽपि सन् ।

नातीवाधिक्रियाशून्योभर्तृयज्ञादिदर्शनात् ॥ ४१ ॥

यद्वेति । तादृशवेदाध्ययनवत्त्वमेवाधिकारिविशेषणं नार्थज्ञानवत्त्वमेव । तेनार्थज्ञानाभावे कर्मण्यधिकारो नास्तीति वक्तुं न युक्तमिति भावः । तदर्थं सम्मतिमपि दर्शयति । भर्तृयज्ञादीनां दर्शनात् । तत्कृतनिबन्धेषु* भाष्यरूपेषु दृष्टत्वादित्यर्थः । सत्यर्थज्ञाने भूयसी फलसिद्धिः ।

ननु अर्थप्रत्यायनद्वारा मन्त्राणां दृष्टार्थत्वमिति स्वीकुर्मः । तदभावे तु सिद्धमुच्चारणमात्रेणादृष्टमेव। न ततोऽन्यद्दृष्टमुपलभामहे। येनादृष्टकल्पनमन्याय्यं भविष्यति। दत्ततिलाञ्जलिश्च जैमिनिसिद्धान्तः[१] इति चेत्। उच्यते। अनुष्ठानहेतुभूतानुष्ठेयस्मरणार्थकत्वं

---

* भर्तृप्रपञ्चनामकभाष्यकारकृतेषु तत्कृतनिबन्धेषु, – इति क० पुस्तके पाठः। तत्कृतनिबन्धेषु इत्येतावन्मात्रं ख० पुस्तके। भर्तृप्रपञ्चनामकभाष्यकारकृतेषु निबन्धेषु,– इत्यंशस्तु तत्कृतनिबन्धेषु,– इत्यस्य टीकारूप इति प्रतिभाति।

---

(१) स्यादिति शेषः। मीमांसादर्शनस्य द्वितीयाध्यायस्य द्वितीयपादे ह्यर्थाभिधानसामर्थ्यान्मन्त्राणां विनियोगो जैमिनिना सिद्धान्तितः। ह्यर्थज्ञानवत एव कर्मण्यधिकारे स सिद्धान्तस्तथैवावतिष्ठते। ह्यर्थज्ञानरहितस्याधिकारपक्षे तु स सिद्धान्तो भज्यते। प्रयोक्तुरर्थज्ञानशून्यत्वेन मन्त्राणामर्थप्रत्यायनासम्भवादिति भावः।

करणमन्त्राणां वदन्तो मन्त्रप्रयोक्तुरेव मन्त्रजन्यशाब्दबोधं मन्यन्ते। तत्तु वयं न मन्यामहे। किन्तु श्रोतुरेव मन्यामहे। शब्दोच्चारणस्य परं प्रत्येव शाब्दबोधजनकत्वस्वाभाव्यात्। न हि स्वस्मिन्नेव शाब्दबोधाय वाक्यप्रयोगोऽर्थवान् भवति। वक्तुस्तदर्थावबोधस्य शब्दप्रयोगात् पूर्वमवश्यंभावित्वात्। न स्वबुद्धेऽर्थे वाक्यरचना युज्यते। सूत्रकारोऽपि[१], "अविशिष्टस्तु वाक्यार्थः (मी० १अ० २पा० ४०सू०)" इति लौकिकस्य वैदिकस्य च वाक्यस्यार्थावबोधं निर्विशेषं ब्रुवन् श्रोतुरेव शाब्दबोधमभ्युपगच्छति। अन्यथा, लोके श्रोतुः शाब्दबोधः मन्त्रेषु उच्चारयितुरिति वैरूप्यापत्तेः।

किञ्च, श्रोतुरेव मन्त्रतः शाब्दबोध इत्ययमर्थोमन्त्रगतशक्त्यैव स्पष्टं लभ्यते। प्रायेण हि सर्वे मन्त्राः सम्बोध्यविषयाः। तथाहि। इषे त्वोर्जे त्वेत्ययं मन्त्रः शाखाच्छेदने विनियुक्तः। तत्र साकाङ्क्षत्वात्। त्वाशब्दस्य सम्बोध्यैकविषयत्वाद्द्वितीयायोगबलाच्च शाखे, छिनद्मीत्यध्याहार्यम्[२]। शाखे इति सम्बोधने प्रथमा, सम्बोधने चेति व्याकरणसूत्रविहिता। सम्बोधनं ज्ञापनम्। इषे त्वोर्जे त्वा छिनद्मि इति शाखां प्रति ज्ञाप्योऽर्थः। मन्त्रं प्रयुञ्जानोज्ञापयति। तत् ज्ञात्वा शाखाऽनुजानाति। शाखाशब्देन तदभिमानिनी देवता अभेदेनोपचर्यते। ततश्च छेदनस्य तज्ज्ञापनस्य च तत्रान्वयो न विरुध्यते।

---

(१) मीमांसासूत्रकारो जैमिनिरपौरुष्यः।

(२) त्वाशब्दस्य संबोध्यमानार्थवाचित्वात् शाखे—इति सम्बोधनपदाध्याहारः। त्वा—इति द्वितीयायोगबलात् छिनद्मीति क्रियाध्याहार इति भावः।

"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् (वे०२अ०१पा०५सू०)" इति बादरायणसूत्रे तद्भाष्यादौ च स्पष्टमेतत्। विष्णो त्वयं रचक्षेत्यादौ सूपपादनेतत्[१]।

ननु देवताविग्रहचैतन्यादिकं नवमे[२] निराकृतम्। सत्यम्। निराकृतमुक्तं भाष्यकृता। न तु सूत्रकृता। प्रत्युत सूत्रकारस्य देवताविग्रहादिकमभिमतमेवेति विस्तरभयान्नात्र प्रपञ्च्यते। किञ्च, स्तोत्रशस्त्रीया ऋचो[३] देवतास्तुतिपराः स्तुत्यदेवताः प्रत्येव तद्गुणबोधकाः। लोके हि स्तोता गद्यपद्यादिभिः स्तुत्यं स्तौति। स्तुत्यश्च तत्कृतं चमत्कारञ्जानानः प्रसीदति। वैदिकेऽपि हि तथा भाव्यम्। न च स्तोत्रशस्त्राणि गातृशंसित्रोः स्तुत्यगुणबोधं चरः कुर्वन्ति। अत्र आयाहि,—इत्यादिसम्बोधनानुपपत्तेः। किञ्च मातत्वेन शंसने न शंसितुरर्थबोधस्तदनुसन्धानस्फुरणासम्भवात्। स्तुत्यदेवतार्थबोधवादे तु न विरुध्यते। किञ्च द्वादशे तृतीये, "मन्त्रान्तेन कर्मादिसन्निपातः स्यात् सर्वस्य वचनार्थत्वात् (मी०१२अ०३पा०५सू०)" इत्यस्मिन्नधिकरणे करणमन्त्रेषु तदन्तेन कर्मादिसन्निपातः सिद्धान्तितः। मन्त्रार्थस्मरणस्य प्रयोक्तृगतत्ववादे मन्त्रोच्चारणं ततोऽर्थस्मरणं ततः कर्मेति क्रमः। ततश्च तेन[४] व्यवधाने सिद्धान्तस्याकोपः। मन्त्रबोध्यदेवताशब्दबोधवादे तु न काचिदनुपपत्तिः। यदुक्तम्-दृष्टार्थमेव स्यादिति। तदपि न। देवतागतशब्दबोधमादायैव

---

(१) तत्र विष्णवादीनां देवतानामेव साक्षात् सम्बोध्यत्वादिति भावः।

(२) मीमांसादर्शनस्य नवमाध्यायस्य प्रथमपादे नवमसूत्रे।

(३) प्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम्। अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रम्।

(४) तेन अर्थस्मरणेन।

दृष्टार्थत्वसम्भवात् । अपानुमन्त्रणादिषु तु भवन्मतेऽप्यदृष्टत्वात् ।

न च श्रोतृदेवतागतार्थज्ञानस्य कथं दृष्टत्वं देवतानामप्रत्यक्षत्वात् इति वाच्यम् । तर्हि लोके परबुद्धेरप्रत्यक्षत्वात् वाक्यस्य परप्रत्यायकतयाऽदृष्टार्थत्वम् । अनुमानादिना परस्मिन्नर्थज्ञानस्य दृष्टत्वमितिचेल्लोकवद्वेदेऽपि तुल्यम् ।

इयांस्तु विशेषः । लोके वाक्यरचनायाः प्रयोक्त्रधीनत्वादर्थज्ञानं विना तदसम्भवात् प्रयोक्तुरर्थज्ञानमान्तरीयकमस्ति । न तु तात्पर्यविषयीभूतम् । मन्त्राणां त्वपौरुषेयत्वेन नित्यसिद्धतया तत्प्रयोक्तुरर्थज्ञानं नावश्यकम् । तथाचाव्युत्पन्नानामपि मन्त्रप्रयोगो न विरुध्यते । न हि वक्तुरर्थज्ञानं श्रोतुरर्थबोधे प्रयोजकम् । अव्युत्पन्नशुकसारिकाशुद्दीरितगद्यपद्येभ्योव्युत्पन्नानां शाब्दबोधात् । ये तु भाष्यादिग्रन्था वक्तुरर्थज्ञानमिति ज्ञापयन्ति । तत्फलाभ्युदयहेतुत्वमात्रं न तु अधिकारितावच्छेदकमिति सर्वमनवद्यम् । यदि च नैवं मन्यसे चेदुपनीयमानस्य वटोरुपनीतमात्रस्य च वटोर्मन्त्रविधिः कथं सङ्गच्छेत । न हि तस्य मन्त्रार्थज्ञानं कथमपि सम्भाव्यते । इति दुस्तरापोहतरङ्गिणी ।

ननु स्वाध्यायोऽध्येतव्यइति विधौ वार्त्तिके अधीतेन स्वाध्यायेन फलवदर्थज्ञानं कुर्यादिति वाक्यार्थो मीमांसासारे चाधीतेन स्वाध्यायेन यच्छक्यं समीहितं तत्कुर्यादिति वाक्यार्थः ।(१) स सर्वोऽप्यार्थिकः । वास्तविकस्तु स्वाध्यायोऽध्येतव्य इत्यस्मिन् वाक्ये अध्ययनकरणिकायां भावनायां स्वाध्यायस्य कर्मत्वम् । तस्य योग्यतया

(१) समाधत्ते स इत्यादिना ।

प्रापणम् । तेनाध्ययनेन स्वाध्यायं प्राप्नुयादिति मुख्योऽर्थः । न च अनर्थकस्य प्रापणायोगाद्वाक्यान्तरेणार्थवत्त्वज्ञानादीदृशं वचनं युज्यते अधीतेन स्वाध्यायेन यक्तुं शक्नुयात्तत्कुर्यादिति वाच्यम् । तां चतुर्भिरभ्रिमादत्ते । उरु प्रथस्वेति प्रथयति । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । इत्यादि श्रौतलैङ्गिकविनियोगाभ्यामर्थवत्तानिश्चये न तत्कल्पनं युक्तमिति सङ्क्षेपः ॥४१॥

अन्यान्यप्यधिकारितावच्छेदकान्याह ।

शिखावानुपवीती च स्नाताचान्तोऽस्पृशन् परम् । आत्मानञ्चाशुचिद्रव्यं शूद्रादीनविलोकयन् ॥ ४२ ॥

शिखावानिति । शिखित्वं बद्धशिखत्वस्याप्युपलक्षणम् । उपवीतित्वञ्च सव्यांसोपरिस्थितयज्ञोपवीतित्वम् ।

"विशिखो व्युपवीती च यत्करोति न तत्कृतम्" ।

इति स्मरणात् । स्नातत्वञ्च वह्निः सर्वशरीरजलसंयोगित्वम् । यद्यपि सप्तविधं स्नानं(१) स्मर्यते, तथापि वारुणमेव(२) सर्वकर्माङ्गम् ।

"स्नानानामपि सर्वेषां वारुणेन च मानवः ।

कर्तुमर्हति कर्माणि विधिवत्सर्वदा द्विज" ॥

इति आग्नेयात् । इदं च कृतसन्ध्यादित्वस्याप्युपलक्षणम् ।

"सुस्नातः सम्यगाचान्तः कृतसन्ध्यादिकक्रियः ।

---

(१) मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्तितमिति स्मृतौ सप्तविधं स्नानमुक्तम् ।

(२) वारुणं चावगाह्यं स्यादित्याद्युक्तेरवगाहनस्नानं वारुणम् ।

कामक्रोधविहीनश्च पाखण्डस्पर्शवर्जितः ।
जितेन्द्रियः सत्यवादी सर्वकर्मसु शस्यते" ॥

इति हेमाद्रौ वाराहात् । कृतसन्ध्यलक्ष्मानुदितहोमिभिन्नानामेव विशेषणम् । अनुदितहोमिनां * तु उदयात्प्रागेवोद्धरणं(१) कृत्वा होमोत्तरं सन्ध्यावन्दनमिति धर्मसूत्रात् । इममे श्रीधरोऽप्येवमाह । उद्धृत्य सन्ध्यावन्दनं ततो होम इति देवजानीयपद्धतौ । युक्तं तु,

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु" । इति ।

इत्यवचनेन शुचित्वसम्पादनद्वारा सर्वकर्माङ्गत्वात् प्रातःसन्ध्योत्तरं समुद्धरणं होमश्च । आचान्तशब्देन कृतद्विराचमनत्वमुच्यते । कर्मारम्भे द्विराचामेदिति स्मृतेः । परं आत्मानमशुचिद्रव्यं समार्जन्युपानहादीन् अस्पृशन् अधिकारी भवति । शूद्रादीन् । आदिना म्लेच्छादीनपि अविलोकयन्नधिकारी । एतच्च दिङ्मात्रं प्रदर्शितम् । तेन कृताहतवासः(२) परिधानप्राणायामसपत्नीकत्वादीन्युक्तानि भवन्ति ॥ ४२॥

तत्र सपत्नीकत्वमधिकारप्रयोजकमित्युक्तम् । तदर्थं पत्नीविशेषणान्याह ।

स्वाध्यायमात्रं त्यक्त्वाऽन्ययजमानोक्तलक्षणाः ।
भार्याः सन्तीह यावत्यस्ताभिः सर्वाभिरन्वितः ॥ ४३ ॥

* अनुदितहोमिना, — इति क० पुस्तके पाठः ।

(१) होमार्थमग्न्युद्धरणमित्यर्थः ।

(२) ईषद्धौतं नवं शुक्लं सदशं यन्न धारितम् । आहतं तद्विजानीयात् दैवे पित्र्ये च कर्मणि इत्युक्तलक्षणं वास आहतवासः ।

स्वाध्यायेति । स्वाध्यायव्यतिरिक्त-यावद्विशेषणविशेषितो यजमानस्तस्यैव लक्षणोपेतायावत्यः पत्न्यः ताभिः सर्वाभिः* सहितोऽधिकारी ॥ ४३ ॥

पक्षान्तरमाह ।

यदा सवर्णया ज्येष्ठभार्ययैव समन्वितः ।
यदाऽऽधानादुपर्यूढकामपत्नीविवर्जितः ॥ ४४ ॥

यदेति । सवर्णज्येष्ठभार्यया सहितोवाऽधिकारी न तु सर्वाभिः । सवर्णानामप्यनेकत्वे ज्येष्ठाया एव साहित्यं द्योतयितुं ज्येष्ठाग्रहणम् ।

तृतीयं पक्षमाह । यदेति । आधानानन्तरं ऊढा विवाहिता कामार्थे(१) या पत्नी, तया रहितोऽपि अधिकारीत्यर्थः ॥ ४४ ॥

अधिकारिनिरूपणप्रसङ्गात्पत्न्यधिकारे वैषम्यं वक्तुमुपक्रमते ।

एवं सिद्धेऽधिकारित्वे† पत्न्याः किञ्चिन्निरूप्यते ।
तुल्य एवाधिकारः स्याद्दम्पत्योरुभयोर्मिथः ॥ ४५ ॥

एवमिति । अधिकारित्वे अधिकारिस्वरूपे । न तु जातिः(२) ।

---

* सर्वाभिः, — इति नास्ति क० पुस्तके ।

† सिद्धेऽधिकारत्वे, — इति क० पुस्तके पाठः ।

---

(१) कामार्थं विवाहिता न धर्मार्थमित्यर्थः । कामार्थमेव या विवाहिता सैव कामपत्नीत्युच्यते ।

(२) अधिकारित्वे इत्यत्र स्वरूपार्थे स्वार्थे वा त्वप्रत्ययो न भावे इत्याशयः ।

स्वर्गकामो यजेतेत्यादिना कामनायां स्त्रीपुंसोरविशेषादुभयोरपि यागेष्वधिकाराद्दर्भाश्वरथन्यायेनान्योन्याकाङ्क्षैव यागनिर्वृत्तेः प्रथमं तुल्याधिकारपक्षमाह। तुल्येति*। फलिसंस्कारभूतकर्मसु पत्न्या अपि कर्तृत्वेन तुल्याधिकार इत्यर्थः। तत्र वपने ऋत्गुणोऽपि साचित्यदर्शनादपने नास्तीति(१)॥४५॥

न च, त्रय एवाधनाः स्मृता इत्यस्यानिर्धनत्वेन त्यागे नाधिकारइति। स्त्रीधनानि षडित्यादिस्मृत्योपेतद्रव्यत्वात्त्यागेऽपि तुल्याधिकारमाह।

कर्तृत्वं तु तयोस्तुल्यं द्रव्यत्यागे प्रचक्षते।
यद्वा त्यागं पतिः कुर्यात् पत्नी तमनुमन्यते॥४६॥
अधिकारेऽपि वैषम्यं प्रोक्तं शब्दानुसारिणा।

कर्तृत्वमिति। तुल्याधिकारपक्षेऽपि मतान्तरेण द्रव्यत्यागे वैलक्षण्यमाह। यद्वेति। त्यागं स्वस्वत्वपरिहारपूर्वकं परस्वत्वोत्पादनरूपं इन्द्रायेदं न ममेति, इन्द्रायेदं त्यजामीति रूपं वा, स्वामी कुर्यात्। पत्नी तमनुजानाति। सत्यपि साधनत्वे† स्वतन्त्रत्वाभावात्

---

* इत्यमेव पाठः सर्वत्र। तुल्यइति, — इति तु समीचीनम्। एव परत्रापनेकत्र।

† इत्यमेव पाठः सर्वत्र। सधनत्वे, — इति तु भवितुमुचितम्।

---

(१) वपने पत्न्या अधिकारो नास्तीति भावः।

निर्धनत्वे नशब्दोच्चारणं यजमानस्यैवेति भावः[१]। इति शब्दा-नुसारिरुद्रदत्तमतम् * ॥४६॥

तुल्याधिकारमुक्त्वा महाधिकारपक्षमाह।

प्राधान्येन स्वनिष्ठः सन् यजमानोऽधिकारवान् ॥४७॥
पत्नी तत्परतन्त्रा सत्यङ्गभूताऽधिकारिणी।
तस्माद्विरुद्धधर्मत्वे पतिधर्मा बलाधिकाः ॥४८॥

प्राधान्येति। स्वनिष्ठः स्वतन्त्रः। स च प्राधान्यत्वे हेतुः। परतन्त्रत्वञ्च गुणभूतत्वे। विचारप्रयोजनं, फलिसंस्कारा ये वाच-निका उभयोराम्नातास्त एव स्युः नेतरे। उक्तश्चायमर्थोऽपराह्णे प्रतोपायनीयमश्नीत इत्यस्मिन् सूत्रव्याख्यावसरे† कर्कोपाध्यायैः॥४७॥

तस्मादिति। महाधिकारादेव हेतोर्यत्रान्योन्यधर्मविरोधस्तत्र यजमानधर्मा एव भवेयुः। प्राधान्यात् ॥४८॥

ननु पक्षद्वयेऽपि कर्ममध्य एवान्यतरमृतौ अधिकारविघातात्तत्रैव सस्थापनीयमित्येकदेशिमतं दूषयति।

म्रियेतान्यतरः पत्योर्यदीष्ट्यादौ विसंस्थिते।
अवशिष्टः प्रकुर्वीत तत्समाप्तिं यथोचिताम्‡ ॥४९॥

---

* शब्दानुसारीरुद्रदत्तमतम्,—इति क॰ पुस्तके पाठः। शब्दानुसारीरुद्र-दत्तमतम्,—इति ख॰ पुस्तके।

† इत्थमेव पाठः सर्वत्र। इत्येतत्सूत्रव्याख्यावसरे,—इति तु भवितुमुचितम्।

‡ यथोचितम्—इति ग॰ पुस्तके पाठः।

---

(१) पत्न्याः सधनत्वपक्षेऽपि भार्यापुत्रस्वेत्यादिवचनैस्तस्या स्वत्वात्यन्त्याभक्तत्वात् न ममेति त्यागो यजमानस्यैव न तस्याः। पत्न्या निर्धनत्वपक्षे तु सुतरामेव तथेत्यभिप्रायः।

म्रियेतेति । यदीष्ट्यादौ । आदिपदात् पश्वादयः । विमंस्थिते अपरिसमाप्ते । पत्योर्दम्पत्योः । अन्यतरः भार्या पतिर्वा । अवशिष्टस्तयोरेकः । यथोचितान्तत्तत्कर्मलोपयुक्तामपि । इदं प्रक्रान्तकर्मविषयम् । नाप्रक्रान्तविषयम् ॥४८॥

देशान्तरे यष्टृमृतौ अप्रक्रान्तमपि कश्चित्कालं * कर्त्तव्यमित्याह ।

देशान्तरमृतं यावद्दहेयुर्वैदिकाग्निभिः ।
तत्पत्नी कारयेत्तावदग्निहोत्राद्युपस्थितम् ॥ ५० ॥

देशान्तरेति । उपस्थितं काले प्राप्तम् । आदिपदेन नित्येष्टिराग्रयणं च । पत्नीपदं यष्टुरप्युपलक्षणम् । पत्नीप्रवासस्य बहुवादिसम्मतत्वाभावात्पत्नीग्रहणम् ॥५०॥

एवमेव शास्त्रार्थं काम्येष्ववतारयति ।

एवमिष्ट्यग्निहोत्रादि प्रक्रान्तं कर्म किञ्चन ।
मृते पत्यौ यथाशास्त्रं पत्नी परिसमापयेत् ॥ ५१ ॥
काम्यं कर्म प्रवृत्तः सन् वीतरागस्ततो यदि ।
कामाधिकारशून्योऽपि तदवश्यं समापयेत् ॥ ५२ ॥

एवमिति । एवमवश्यं समापयेदित्युत्तरश्लोकेनान्वयः । प्रक्रान्तं प्रारब्धं किंचन नित्यं नैमित्तिकं च । मृते पत्यौ । अन्तरेति शेषः । पत्नी यजमानो वा । यथाशास्त्रं स्रुग्दण्डस्याधस्तात्समिधधारणादिशास्त्रमनतिक्रम्य यथा समापयेत् तथा काम्यमपि प्रारब्धं सदन्तरा

---

* किञ्चित्कालमित्यादर्शपुस्तकपाठः ।

वृष्ट्यादिरूपकामनायां सिद्धायां तदुत्तरं कामनाविरहेणाधिकार-शून्येनापि प्रारब्धं समापनीयमेव । न त्वन्तरा त्यागः । शिष्टवि-गर्हणात् । दोषश्रवणाच्च । यद्वा, पूर्ववचनमपि काम्यपरतयो-न्नेयम् ॥५१॥ ॥५२॥

तुल्याधिकारसहाधिकारपक्षोपष्टम्भं पक्षद्वयमाह ।

काम्यत्वे दम्पती कामं कामयेते पृथक् पृथक् ।
यदा कामयते स्वामी नावश्यं कामना * स्त्रियाः ॥ ५३ ॥

काम्यत्वेति । कर्मण इति शेषः । कामनाविषयत्वे सति उभयोरपि युगपदायुष्यादिकामनायामेक एव काम्येष्ट्यादिप्रयोगः कालभेदे तु पृथगिति । अन्यतराधिकारे तु उभयोरप्यधिकारो-ऽनुपदं वक्ष्यते । द्वितीयं पक्षमाह । सहाधिकारपक्षे यष्टुरेव काम्याधिकारः । कामनाः स्त्रिया अवश्यं निश्चयेन न सन्तीति शेषः । तस्याः पारतन्त्र्यादिति भावः ॥५३॥

नित्यकर्मण्याहिताग्नेर्यथाऽधिकारं विनियोग इति पाष्ठसिद्धान्ते-नाह[१] ।

यस्तिरोहितशक्तिस्तस्याधिकारो न नश्यति ।
कर्मस्ववश्यकार्येषु नष्टशक्तेस्तु नश्यति ॥ ५४ ॥

* आदर्शपुस्तकत्रयेऽप्येकवचनान्तपाठदर्शनात् तथैव निवेशितः । टीका-कारमते तु कामनाः,—इति बहुवचनान्तः पाठः ।

(१) मीमांसादर्शनस्य षष्ठाध्यायस्य तृतीयपादगतसिद्धान्तमाश्रित्येत्यर्थः ।

यस्विति । अवश्यकार्य्येषु नित्यनैमित्तिकेष्विति यावत् । कर्मसु । आधानानन्तरं चक्षुर्नाशादिना तिरोहिताऽन्तरिता शक्तिः सामर्थ्यमाज्यावलोकनादिरूपं यस्य तादृशस्य पुरुषस्याधिकारोन नश्यति । नित्येषु यावच्छक्यन्यायात् । यदा तु नित्येष्वपि आरम्भसामर्थ्यं नास्ति तदानीमधिकारलोप इत्याह । नष्टशक्तेरिति ॥५४॥

ननु नित्येषु केषु चित् यावज्जीवानुष्ठेयत्वेनोपदेशेऽपि जीर्णस्य कर्मण्यनधिकार इत्येकदेशिमतं दर्शयितुं सम्मतिं दर्शयति ।

यावज्जीवादिसंकल्पकारिणः शक्तिलोपने ।
अधिकारस्तदन्तः स्यादिति शालीकिनाथधीः* ॥५५॥

यावदिति । तदन्तः सामर्थ्यपर्यन्तः । मनुष्याणामेवाधिकारः आरम्भसामर्थ्यादिति प्राक् प्रयुक्तहेतोरविशिष्टत्वात् । शालीकिनाथो ऋषिः ॥५५॥

पूर्वोक्तमेकदेशिमतं दूषयितुमाह ।

यावज्जीवादिसंकल्पादूर्द्धं चेच्छक्तिलोपनम्† ।
तथापि नाधिकारस्य हानिर्वार्त्तिकदर्शनात् ॥५६॥

यावदिति । असामर्थ्येऽपि यथा कथञ्चित् नित्यं कर्त्तव्यमेवेति भावः ॥५६॥

---

* शालीकिनाथधी,—इति क० पुस्तके पाठः । शालीकनाथधीः,—इति ग० पुस्तके पाठः ।

† लोपने,—इति क०; ख० पुस्तकयोः पाठः ।

एतदर्थं याज्ञिकसम्मतिं दर्शयति ।

प्रायेण याज्ञिकाचारोऽप्येवमेवोपलभ्यते ।
न हि संकल्पितं कालमसंपूर्य त्यजन्ति ते ॥ ५७॥

प्रायेणेति । आचारस्यापि धर्मे छन्दरितप्रामाण्यत्वेन निश्चया-दाचारग्रहणम् । आचारमेव विशदयति । न हीति । यावज्जी-वादिरूपं कालं असम्पूर्य सम्पूर्णमकृत्वा न त्यजन्ति ॥५७॥

ननु यावज्जीवादिसङ्कल्पे मानाभावात्प्रत्यहं यथाकालं नित्यानां प्रयोगमङ्कन्यायपेणेनैव निर्वाहाय* यावच्छक्ति नित्यानां करणमिति पूर्वपक्षमाशङ्क्य निराकरोति ।

यावज्जीवादिसंकल्पो न्यायप्राप्तो न यद्यपि ।
तथापि वचनात्प्राप्तस्तस्मात् कर्तुं स युज्यते ॥ ५८॥

यावदिति ॥५८॥

पक्षद्वयमप्युपसंहरति ।

एवंकृते तु संकल्पे ततः शक्तिविलोपने† ।
युक्ता दर्शनभेदेनाधाधिकारास्तिनास्तिता ॥ ५९ ॥

एवमिति । एवं यावज्जीवादिरूपे । दर्शनभेदेन शास्त्रीकिवार्त्तिक-

---

* इत्यमेव पाठः सर्वत्र । निर्वाहात् – इति तु भवितुमुचितम् ।

† शक्तेर्विलोपने, – इति ग० पुस्तके पाठः ।

शास्त्रभेदेन । अधिकारस्य अस्तिता नास्तिता च ज्ञेया(१) । द्वन्द्वान्ते श्रूयमाणस्य तल्प्रत्ययस्य प्रत्येकमभिसम्बन्धः ॥५९॥

अशक्त्याऽभावप्रसङ्गादाह ।

अशक्त्या याजमानं चेत्पत्नीकर्म च लुप्यते ।
न तावता क्रतुभ्रेषः स्यादथर्वणहृचतः ॥ ६० ॥

अशक्त्येति । याजमानं पुरुषार्थरूपम् । न क्रत्वङ्गम् । पत्नीकर्मापि तादृशं योक्त्रबन्धनादिरूपम् । क्रत्वर्थन्तु समाख्ययाऽध्वर्युः करोति ॥६०॥

ननु त्यागस्य याजमानत्वेन तदशक्त्या पूर्वन्यायेन त्यागलोप इति पूर्वपक्षं दूषयितुमाह * ।

त्यागन्तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः ।
उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत् ॥ ६१ ॥

त्यागमिति । त्यागं सर्वथा स्वयमेव, पत्न्यपि पूर्वोक्तपक्षाश्रयणेन कुर्यात् । सर्वथाशब्दस्तु अशक्तावुपात्तोपसर्पणाशक्तावासनमध इति कात्यायनोक्तप्रकारार्थः । अत्यन्ताशक्तौ त्वाह । तत्रेति । यजमानस्य तत्रापि त्यागेऽप्यशक्तौ स्वामित्वाविशेषेण तयोर्दम्पत्योरन्यतरः

* दर्शयितुमाह,—इत्यादर्शपुस्तकपाठो न समीचीनः ।

(१) तथाच शालीकनाथमते यावज्जीवादिसंकल्पकरणानन्तरं शक्तिलोपे नास्त्येवाधिकारः । वार्त्तिकमते त्वस्तीति यथायोगं बोद्धव्यम् ।

एकः पत्नी यष्टा वा। उभयोरसामर्थ्ये तु आध्वर्यवे नियुक्तः कश्चन अस्वाम्यपि अध्वर्युः त्यागे अधिकरोतीति ॥६१॥

अथेदं चिन्त्यते बहुभार्यस्यात्र सर्वासामधिकार इति प्रागुक्त-प्रथमपक्षे कनिष्ठाया अङ्गवैकल्ये आज्यावेक्षणासम्भवात् कथमधि-कारइति पूर्वपक्षं दूषयति ।

सर्वे स्वस्वक्रियाशक्तिमात्रेणैवाधिकारिणः ।
तस्मादनेकभार्यस्य ज्येष्ठा चक्षुष्मती यदि ॥ ६२ ॥
कनिष्ठाऽन्धाऽपि नित्येष्टिहोमादावधिकारिणी ।
क्रत्वर्थाज्येक्षणादीनि ज्येष्ठैव कुरुते यतः ॥ ६३ ॥

सर्वे इति । सर्वे स्वामिपत्नीऋत्विजः स्वस्वकर्मसामर्थ्येनैवाधि-कारिणः। कर्मसामर्थ्यञ्च ऋत्विजां समाख्यया वचनयोगाच्च। पत्न्योस्तु फलयोगाद्वचनाच्च। तदुक्तं, कर्मणि पुरुषाणां प्रधानं स्वामी फलयो-गात् *। पुरुषयोगिमन्त्रसंस्कारयोस्त्यागे सामर्थ्यात् । वचनविरोधा-भ्यामन्य इति। तत्राज्यावेक्षणस्य केवलक्रत्वर्थत्ववादिमतेनोत्तरमाह । तस्मादिति। यस्मात्सामर्थ्यमधिकारकं, तस्मात् अन्धाऽपि कनिष्ठा पत्नी संस्कारकर्मसु त्यागे चाधिकारिणीति भावः ॥६२॥

न चावेक्षणे चक्षुर्वैकल्यादसम्भवेन नाधिकार इत्यत आह । क्रत्वर्थेति । शास्त्रार्थस्य † निष्पन्नत्वादिति भावः ॥६३॥

आज्यावेक्षणस्य पुरुषार्थतावादिमतेनाह ।

---

* स्वामिफलयोगात्, — इत्यादर्शपुस्तकपाठो न समीचीनः ।

† शास्त्रार्थस्या, — इत्यादर्शपुस्तकपाठो न समीचीनः ।

अन्ये त्वाज्येक्षणादीनि* सुप्रजास्त्वफलान्वयात्†।
सर्वाः कुर्युरिति प्राहुः तस्मादन्यां त्यजन्ति ते ॥६४॥

अन्ये त्विति। श्रूयते हि सुप्रजास्त्वादिरूपं फलं तच्छ्रवणाच्च पुरुषार्थताऽऽज्यावेक्षणस्य। तच्च सर्वासामपि नान्यासाम् ॥६४॥

अधिकारितविघातकनिरूपणेन तदवच्छेदकान्याह ।

परीष्टिदोषसम्प्राप्तौ न यष्टव्यं कदाचन ।
स च दोषः प्रपञ्चेन सम्यगत्राभिधीयते ॥ ६५ ॥

परीष्टेति । न यष्टव्यम्, आधानादिकमपि न कुर्यादित्यर्थः । शेषं स्पष्टम् ॥६५॥

दोषलक्षणान्याह ।

दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसङ्ग्रहम् ।
अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम् ॥ ६६ ॥

दर्शेष्टिमिति । एतन्निषेधापालनमेव परिवेत्तमिति‡ भावः । अत्र प्रत्येकं निमित्तानि न तु समुच्चयः । तद्यथा । कृतदर्शजनकज्येष्ठौरससोदरस्यैव दर्शेऽधिकार इति यथातथमूह्यम्। तथा च कृताधानजनकसोदरवत्त्वेऽपि तयोरकृतपौर्णमासादिकयोः सतोरेतस्य पौर्णमासादौ नाधिकार इति भावः । निमित्तेन पुनराधानो-

---

* अन्ये त्वाज्येक्षणादीनां – इति ग॰ पुस्तके पाठः ।

† इत्थमेव पाठः सर्व्वत्र । सुप्रजस्त्वफलान्वयात्, – इति तु भवितुमुचितम् । एवं परत्राप्युन्नेयम् ।

‡ इत्थमेव पाठः सर्व्वत्र । परिवेत्तृत्वमिति, – इति तु भवितुमुचितम् ।

त्परमकृतदर्शादिलेऽपि तयोर्नातिप्रसङ्ग इति सूचयितुं प्रथमे इति[1] ॥ ६६ ॥

न कुर्याज्जनके ज्येष्ठे सोदरे वाऽप्यकुर्वति ।
क्षेत्रजादावनीजाने विद्यमानेऽपि सोदरे ॥ ६७ ॥
नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे ।
पङ्ग्वन्धमूकवधिरपतितोन्माददूषणे ॥ ६८ ॥

अत्र सोदर इति औरसः सोदरो ग्राह्यः । तथा च वक्ष्यते । क्षेत्रजादाविति । क्षेत्रजादौ सोदरे इत्यनेनान्वयः । आदिशब्देन कन्यावस्थायां जातः ॥ ६७॥

सोदरस्यैवौरसस्य भिन्नोदरत्वेऽपि विघातकत्वमाशङ्क्य परिहरति । भिन्नेति । चकारः समुच्चये ।

अथ तयोराधानादिषु अधिकारित्वे सत्येव दोषो नान्यथेत्याह ।

पङ्ग्विति । पङ्गुर्निरङ्घ्रिः । एकेन द्वाभ्यां वा । एवं सर्वत्र । अन्धो नेत्रहीनः । मूको वाक्हीनः । बधिरोऽश्रोत्रः । पतितः पातित्यापादककर्मकारी । उन्मादोऽपस्मारः, तदेव दूषणं यस्य ॥ ६८॥

संन्यस्ते छिन्नहस्तादौ यद्वा पण्डादिदूषणे ।
जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियाम् ॥ ६९ ॥

---

(१) जनकादिभिर्दर्शादौ कृते सत्येव दर्शादावधिकारो न लभ्यते । एतच्च दर्शादेः प्रथमानुष्ठाने बोध्यम् । यदि तु जनकादीनां पुनराधाननिमित्तमुपनिपतति, तदा तेषां पुनराधानोत्तरं दर्शादिकरणात् पूर्वमपि दर्शाद्यनुष्ठानं न विरुध्यते इति भावः ।

संन्यस्तेति । संन्यस्ते आधानाद्यकृत्वैव प्रव्रजिते । क्लिवहस्तादौ । आदिशब्दात् नासिकादिः । यद्वा । प्रकारान्तरेण समुच्चयनिवारणार्थं वाग्रहणम् । तेन प्रत्येकं निमित्तता । षण्डः प्रसिद्धः । अष्टविधनपुंसकग्रहणार्थं आदिपदम् । ज्येष्ठे सोदरे औरससोदरे एवं विधे सति इतरः पुत्रः कनिष्ठबन्धुर्वा पूर्वोक्तं सर्वं कुर्यादित्यर्थः ॥६८॥

तयोरस्त्वनधिकारित्वान्नैतस्याधिक्रियाक्षतिः ।
ज्येष्ठे श्रद्धाविहीने सत्याधेयं तदनुज्ञया ॥ ७० ॥

तयोरिति । तयोस्त्वनधिकारादिति । अथ सोदरस्य विशेषमाह । ज्येष्ठ इति । ज्येष्ठे पूर्वोक्तदोषरहिते ज्येष्ठे सोदरे श्रद्धाविहीने सति कामतोऽकारिणि, आज्ञां प्राप्यैवाधिकारः ॥७०॥

तादृशे[१] पितरि तु अनुज्ञयाऽपि नाधिकार इत्याह ।

पितुः सत्यप्यनुज्ञाने नादधीत कदाचन ।
पितर्यनाहिताग्नावप्यादधीताथ वा सुतः ॥ ७१ ॥
अग्निहोत्रञ्च जुहुयादिति लौगाक्षिकारिका ।

पितुरिति । लौगाक्षिमतमुपन्यस्यति । पितरीति । अनुज्ञयेत्यध्याहारः ।

"अनुज्ञातस्तु पित्रा तु आधानं सर्वदा भवेत्" । इति ।
सुमन्तुस्मरणात् । तथाच विहितप्रतिषिद्धत्वादिकल्पः ॥७१॥
एतदर्थं कठमतमाह ।

(१) तादृशे श्रद्धाविहीने ।

पिता यस्याग्रजो* भ्राता न कुर्याद्वा पितामहः ॥ ७२ ॥
तपोऽग्निहोत्रं यज्ञं वा सर्वं† कुर्यात् कठाश्रयात् ।

पितेति । तप आधानम् ॥७२॥

अथ सोदरगतनिमित्तान्याह ।

योगशास्त्राभियुक्ते वा कुब्जे वा वामने जडे ॥ ७३ ॥
गद्गदे वाऽग्रजे दुष्येत्परिविन्दन्न चानुजः ।

योगेति । योगः पातञ्जलम् । कुब्जो भग्नपृष्ठः । वामनो ह्रस्वः ।
जडो वेदशून्यः ॥७३॥

गद्गदः स्खलद्गीः । एषां शुचित्वेऽपि कर्मानर्हत्वमसामर्थ्यात् । न
हि सर्वस्मिन् दृष्टिवेधादौ सुगमादनादिसम्भवः । तदर्थं च सुगा-
दिपरिमाणबाधेन कार्यानुपपत्तेश्चेति दिक् ।

देशान्तरस्थे सत्यपि ज्येष्ठे नानधिकारः इत्याह ।

देशान्तरस्थो न ज्येष्ठो ध्यायेताहितवानिति ॥ ७४ ॥
कनीयानधिकारी चेद्यदधीताविचारयन् ।

देशान्तरस्थ इति ॥७४॥

प्रोषितज्येष्ठस्य तु कालविशेषप्रतीक्षयैवाधिकारः इत्याह ।

प्रोषितस्तु यदा ज्येष्ठो ध्यायेतानाहितानलः ॥ ७५ ॥
षड्वत्सरान् प्रतीक्षेत आदधीतानुजस्ततः ।

---

* यस्याग्रजो, — इति क॰ पुस्तके पाठः ।

† सत्र, — इति ग॰ पुस्तके पाठः ।

प्रोषित इति । अत्रत्योविशेषो हेमाद्रौ कल्पतरौ च ज्ञेयः । विस्तरभयान्नोच्यते ॥७५॥

परीष्टिदोषस्य मतान्तरेण वैकल्पिकत्वमाह ।

यदा पापं भवेज्ज्येष्ठात् पूर्वं भार्यापरिग्रहे ॥ ७६ ॥
यागाग्निहोत्रे तन्नास्तीत्याह कश्चिन्मतान्तरम् ।

यदेति । यागः आधानपूर्णमासादिः । एतच्च अनुज्ञापरम् ।

"सोदराणान्तु सर्वेषां परिवेत्ता कथं भवेत् ।
दारैस्तु परिविन्देरन्नाग्निहोत्रेण नेज्यया" ॥ इति

स्मरणात् । इदं च विवाहे प्रायश्चित्ताधिक्यज्ञापनार्थं वचनमिति केचित् ॥७६॥

न कुर्याज्जनके ज्येष्ठे इति प्रागुक्तस्यापवादमाह ।

पितरि प्रेतभार्ये वा देशान्तरगतेऽपि वा ॥ ७७ ॥
अधिकारविघातस्तु न पुत्रस्योपजायते ।

पितरीति । अत्रापि देशान्तरपुरस्कारेण वङ्वर्षादिकालप्रतीक्षणं ज्ञेयम् ॥७७॥

वैकल्पिकमधिकारिविशेषणमाह ।

कृष्णकेशः समुत्पन्नपुत्रोऽग्न्याधेयमाचरेत् * ॥ ७८ ॥
सूत्रान्तरेष्वनुक्तत्वान्नियमो नेति केचन ।

कृष्णकेश इति । कृष्णकेश इति शरीरबलोपलक्षकम् । जातपुत्र इति । तामाशिषमाशासते तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य

* मारभेत्, — इति क॰ पुस्तके पाठ ।

पुत्रोऽजातः स्यादिति श्रुतौ श्रवणाज्जातपुत्र इत्यवस्थाविशेषोपलक्षकम्। सा च षोड़शवर्षादूर्ध्वेति। तेनाष्टाचत्वारिंशवर्षाणि ब्रह्मचर्यं चरेदिति स्मृतिरुक्ता भवति। स्मृत्यनुपपत्त्या मतान्तरमाह। नियम इति। सूत्रान्तरेषु तन्मूलभूतश्रुतिवचनेषु। *यद्दहरेवैनं श्रद्धोपनमेद्याद्धीतेति श्रवणात् ॥७८॥

क्वचित्पत्नीं विनैवाधिकारमाह।

व्यभिचारवती योषा द्वेषिणी द्रोहिणी च या ॥७९॥
आधाने सा परित्याज्या न वा त्याज्या[†] मतान्तरात्।

व्यभिचारवतीति। द्वेषिणी भर्तृद्वेषिणी। द्रोहोऽप्रियभाषणं कर्म च। आधाने आधानोत्तरभाविकर्मसु च। परित्याज्या अनधिकारिणीति भावः। मतान्तरमाह। न वेति। मतान्तरात् सहाधिकारवादिमतादित्यर्थः ॥७९॥

अधुना यजमानासन्निधाने क्वचित्कर्मणि पत्न्या अधिकार इत्याह।

देशान्तरगते पत्यावग्निहोत्रादिकं तथा ॥८०॥
ऋत्विक्समाहिता[‡] पत्नी कुर्यान्नैवं[§] तु सौमिकम्।

---

* यथा, — इति ख॰ पुस्तके अधिकः पाठः।

† नाधिकारी, — इति क॰ पुस्तके पाठः। सूत्रकार, — इति ग॰ पुस्तके पाठः। न वा त्याज्या इति पाठान्तरतया तत्र लिखितमस्ति।

‡ समायुता, — इति ग॰ पुस्तके पाठः।

§ नैव, — इति क॰ ख॰ पुस्तकयोः पाठः।

देशान्तरेति । अग्निहोत्रादिकमिति । आदिना पूर्णमासादि सर्वं नित्यम् । स्थलिगिति ।

"निचियाग्नीन् स्वदारेषु परिकल्प्यर्त्विजं तथा" ।

इति वचनात् । सोमसंस्थां निषेधति । नैवमिति ॥८०॥

रुद्रदत्तमतमाह ।

पितृयज्ञाग्निहोत्रं च* प्रक्रतेष्टिं विनेतरत् ॥ ८१ ॥
पश्विज्यासोमयागादि याजमान† क्रियाऽन्वितम् ।
स्वामिनि प्रोषिते नास्तीत्युक्तं शब्दानुसारिणा ॥८२॥
याजमानक्रियाशून्यं दर्विहोमादि किञ्चन ।

पितृयज्ञ इति । एतत्त्रयं विनाऽन्यत्किमपि न भवतीत्यर्थः । याजमानक्रियाऽन्वितमित्येतेन वक्ष्यमाणग्रयणे ब्रीहिस्तम्बपचो भवतीति भावः ॥८१॥

ननु तथापि त्यागस्य याजमानस्य विद्यमानत्वेन तद्शून्यत्वात् कथमधिकार इत्याशङ्कां परिहरति ।

यजमानेति । याजमानक्रिया पूर्णपात्रग्रहणविष्णुक्रमणादयः । तच्छून्यं कुर्यात् ॥८२॥

उद्देशत्यागमात्रेण याजमानेन संयुतम् ॥ ८३ ॥
कुर्यादवसरप्राप्तमृत्विक् पत्नीसमन्वितः‡ ।

---

* पितृयज्ञोऽग्निहोत्रं च, — इति ग० पुस्तके पाठः ।
† याजमान, — इति क० पुस्तके पाठः ।
‡ पत्नीसमीपतः, — इति ग० पुस्तके पाठः ।

देवतोद्देशत्यागात्मकयाजमानघटितं तु काले काले ऋत्विक् कुर्यात् त्यागमात्रं पत्नी कुर्यादित्यर्थः ॥८३॥

उभयापद्विधानेऽपि पूर्वोक्तत्रयाणां कर्मणां* अवश्यकरणमाह ।

पत्न्यां रजस्वलायां वा प्रसूतायामथापि वा ॥ ८४ ॥
सर्वमेव† नियुक्तः सन् कुर्यादृत्विग्यथोचितम् ।

पत्न्यामिति । अपिशब्दात्पतितायाम् । वाशब्दो विकल्पे । सर्वं कर्म त्यागश्च । ऋत्विगध्वर्युः । यथोचितं ब्रह्मादयः स्वं स्वं कर्मेत्यर्थः । तदभावे त्रयो द्वौ वा एको वा प्रचरेत् । तदा बौधायननिष्कृतिः ॥८४॥

रुद्रदत्तमतमुपसंहरति ।

अतोऽग्निहोत्रं नित्येष्टिः पितृयज्ञ इति त्रयम् ॥८५॥
कर्त्तव्यं प्रोषिते पत्यौ नान्यत् स्वामिक्रियाऽन्वितम् ।

अत इति । स्पष्टम् ॥८५॥

पूर्वोक्तं दर्विहोममाह ।

प्रवसत्याहिताग्नौ यद्याग्रयणमुपागतम्‡ ॥ ८६ ॥
अग्निहोत्री व्रीहिस्तम्बमिति पक्षं§ समाश्रयेत् ।

---

* कर्मणां, — इति नास्ति क॰ पुस्तके ।

† पूर्व्वमेव, — इति ग॰ पुस्तके पाठः ।

‡ यद्याग्रयण उपागतः, — इति ग॰ पुस्तके पाठः ।

§ पक्षं, — इति ख॰ पुस्तके पाठ ।

प्रवर्त्ततीति ॥८६॥

नैमित्तिकीनामिष्टीनां गौणकालाभावात्लोपप्रसक्तावाह ।

नैमित्तिकास्तु* जातेष्टिगृहदाहेष्टिपूर्विकाः ॥ ८७॥
स्वाम्यागमनपर्यन्तमुत्कृष्टव्या ह्यशेषतः ।

नैमित्तिका इति । पूर्विका इत्यत्र बहुव्रीहिः, पुरुषोपयातरूपाः । अशेषतः स्वरूपेण । तासां स्थाने पूर्णाहुतिरपि नेति भावः ॥८७॥

कर्म्मोपयातरूपासु विशेषमाह ।

प्रायश्चित्तेष्टिसम्प्राप्तौ कुर्यात् पूर्णाहुतिं बुधः ॥ ८८ ॥
उद्वातेष्ट्युपसम्प्राप्तौ जुहुयात् द्वादशाहुतीः ।

प्रायश्चित्तेति । प्रायश्चित्तेष्टयः व्रातपत्यादयः । बुध इति । प्रभुः प्रथमकल्पस्येत्यादिना निषिद्धं पूर्णाहुतिपक्षमेव प्रथमपक्षासमर्थ्येऽपि कुर्यादिति भावः । उद्वातेष्टौ विशेषमाह ।† स्पष्टम् ।‡ मित्रायेत्यादयः ॥८८॥

प्रोषितस्य पुनराधानप्राप्तौ निर्णयमाह ।

अग्न्याधेयादिकं प्राप्तमुभयानुगमादिना ॥ ८९ ॥
स्वाम्यागमनपर्यन्तमुत्कृष्टव्यमसंशयम् ।

---

* इत्यमेव पाठ सर्व्वत्र । नैमित्तिक्यस्तु – इति तु भवितुमुचितम् ।

† अत्र, उद्वेति, – इति भवितुमुचितम् ।

‡ अत्र, द्वादशाहुतयो, – इति भवितुमुचितम् ।

अग्न्याधेयमिति । आदिना सर्वैः पुनराधाननिमित्तैः । असंशयं यदिलिखोन कार्यं इति भावः । यद्योभावग्नौ अभिनिम्लोचेदित्युभयानुगमः प्रसिद्धः ॥८९॥

तादृशस्थले पुनराधानोत्कर्षे अन्युत्पत्तये * नैमित्तिकमाह ।

मथित्वा पावकं सर्वप्रायश्चित्तं† विधाय च ॥ ९० ॥
मित्रायेत्यादिभिर्हुत्वा द्वादशानुगमाहुतीः ।

मथित्वेति । सर्वप्रायश्चित्तश्च होमविशेषः । चकारः समुच्चये ॥९०॥

पुनराधानोत्कर्षादावपि पूर्वोक्तं नित्यं कार्यमित्याह ।

अग्निहोत्रं यथाकालं नित्येष्टिञ्च समाचरेत् ॥ ९१ ॥
आ स्वाम्यागमनात्तिष्ठेदागत्याथादधीत सः ।

अग्निहोत्रमिति ॥९१॥

केशवसिद्धान्तानुसारेण रुद्रदत्तमतमुपन्यस्य मतान्तरमत्रोपदिशति ।

एवं केशवसिद्धान्तात् प्रोषितस्याग्निषु क्रियाम्‡ ॥९२॥
अवश्यं भाविनीमुक्त्वाऽधुना वक्ष्ये मतान्तरम् ।

एवमिति ॥९२॥

---

* व्युत्पत्तये, — इति क॰ पुस्तके पाठः ।

† सर्व्वं प्रायश्चित्तं, — इति ग॰ पुस्तके पाठः ।

‡ क्रियाः, — इति क॰ ख॰ पुस्तकयोः पाठः ।

§ अवश्यं भाविनीरक्षा, — इति क॰ ख॰ पुस्तकयोः पाठः ।

काम्याः क्रिया न कर्त्तव्याः स्वामिनि प्रोषिते सति ॥९३॥
नित्या नैमित्तिकी कार्या* प्रवसत्यपि भर्त्तरि ।

काम्या इति । अत्र भिन्नवाक्यत्वान्न पौनरुक्त्यम्(१) ॥९३॥

नित्येष्वपि क्वचिदपवादार्थमाह ।

तत्रापि नैव कर्त्तव्याः क्रियाः सोत्तरवेदिकाः ॥ ९४ ॥
आधानपुनराधाने न स्तः पत्यौ प्रवासिनि ।

† सोत्तरवेदिकाश्चातुर्मास्यपश्वादय । नित्यनैमित्तिकत्वाभ्यां प्राप्ते निराकरोति । आधानेति ॥९४॥

नन्वाधाननिषेधे आधानोत्कर्षः स्यादित्याशङ्क्य परिहरति ।

उभयानुगमादौ तु प्राप्तेऽग्न्याधेयतः पुरा ॥ ९५ ॥
न किञ्चिदग्निहोत्रादि कर्त्तव्यमिह दर्शने ।

उभयेति । आदिपदात्पूर्णमासेष्टिः । तदभावाद्धारणञ्च न भवति । इह दर्शने एतन्मते ॥९५॥

आढ्यत्वमप्यधिकारितावच्छेदकमिति वक्तुं साग्नेः प्रवासमाह ।

धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः ॥ ९६ ॥
धनैर्हि सम्भवेदिज्या तीर्थाद्यर्थन्तु न व्रजेत् ।

---

* नित्यनैमित्तिकौ कुर्य्यात् – इति ग॰ पुस्तके पाठः ।

† अत्र, तत्रापीति, – इति भवितुमुचितम् ।

---

(१) स्वामिनि प्रोषिते इति प्रवसत्यपि भर्त्तरीति न पुनरुक्तं भिन्नयोर्वाक्ययोरुपादानादिति भाव ।

धनानीति। अहिताग्नेर्यलिप्सया प्रवासोयुक्तो भवति॥८६॥

तचापि हेतुमाह। धनैरिति। यागस्यार्थसाध्यत्वात्। परिशेषात् सिद्धार्थमनुवदति। तीर्थेति। आदिपदात्सुहृद्दर्शनादिकार्यान्तराणि। तद्भित्तस्य[1] महाफलदतीर्थस्नानादिजन्यमपूर्वं न स्यात् तद्विधायकवाक्यानां मङ्गोपपत्ति*श्चेत्यत आह।

ब्रह्मा विष्णुः शिवः सूर्यो गोविप्राः पितृदेवताः† ॥८७॥
अग्निहोत्रिगृहे सन्ति व्रततीर्थतपांसि च।

ब्रह्मेति। ब्रह्मादिग्रहणं देवतामात्रोपलक्षणार्थम्। पितृदेवता कव्यवाहनलादय ॥८७॥

व्रतानि एकादश्यादीनि। तीर्थानि पुष्करादीनि। तपांसि पराकादीनि‡। वैश्वानर्यादिद्वारा अग्निहोत्रसंज्ञकं कर्म यस्यास्तीति अग्निहोत्री। तद्गृहे विद्यन्ते। तदुक्तं यज्ञपार्श्वे।

"एव सति गृहस्थस्य गृहे सन्त्यग्निहोत्रिणः।
देवता ब्रह्मविष्ण्वीशा इन्द्रोपेन्द्रादयस्तथा॥
अग्निहोत्रेण तुल्यं हि नैवेति तीर्थमालिका।
ब्रह्मादितर्पणं नैव न तपो न जपादिकम्"॥ इति॥

---

* पत्ते, – इत्यादर्शपुस्तकपाठो नातीव समीचीनः।

† ब्रह्मा विष्णुश्च रुद्रश्च गौर्गुरुः पितृदेवताः, – इति पाठान्तरमस्ति ग॰ पुस्तके।

‡ नास्त्ययमंशः क॰ पुस्तके।

---

(१) एतस्य चाहिताग्नेः।

अपरे त्वेवं वर्णयन्ति ।

"अर्के* चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।

इष्टस्यार्थस्य सम्प्राप्तौ को विद्वान् यत्नमाचरेत्[†]" ॥

इति न्यायेन तीर्थचैत्याद्यर्थप्रवासो न भवति । अर्थार्थमत्यन्ताव-श्यककार्यार्थञ्च प्रवासोऽस्त्येवेति । उक्तञ्च ।

"दृष्टार्थाय प्रवासस्तु नादृष्टाय कथञ्चन" । इति ।

तथा ।

"न विना च निमित्तेन क्रीडाद्यर्थन्तु न व्रजेत्" । इति ।

तयोर्ग्रहणेन प्रायश्चित्तप्रत्याम्नायनिर्दिष्टतीर्थस्नानक्रोशादिपरि-माणगमनार्थप्रवासाः प्रत्याख्याताः । व्रतग्रहणाच्च एकादश्यादिष्वपि होमाङ्गभूतस्तुक्स्य्भक्षणहविःशेषभक्षणे न व्रतलोपप्रसक्तिरिति ध्येयम् । ब्रह्मादियजनेन गोब्राह्मणपरिचर्यया पितृदेवताश्रद्धया व्रताचरणेन तीर्थस्नानेन तपःक्लेशेन यद्धर्मजातं, तदग्निहोत्रादिकर्मणा जायते इति । यथा ।

"यावानर्थ उदपाने सर्वतः संप्लुतोदके" ।

तथाऽत्रेति ।

प्रत्याह प्रवासानुज्ञायामन्देशतः कालतश्चावधिमाह ।

अग्निहोत्रेण रहितः पन्थानं शतयोजनम् ॥ ६८ ॥
आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति ।

---

* अर्के,– इति ग्रन्थान्तरे पाठः ।

† यत्नमाचरेद्,– इति ग्रन्थान्तरीयः पाठः ।

अब्दं स्वयमजुह्वद्यो हावयेद्वर्त्विगादिना ॥ ९९ ॥
तस्य स्यात्पुनराधेयं पवित्रेष्टिरथापि वा* ।

अग्निहोत्रेणेति द्वाभ्याम् । गुणविध्याश्रयणेनाग्निहोत्रशब्दोऽग्नि-वाची । साग्निप्रवासे दोषाभावज्ञापनार्थं रक्षित इति । शतं योजनानि यस्मिन् ॥९८॥

साग्निकोपलक्षणार्थं आहिताग्निरिति । अनर्थक्याद्दुर्बलमपि सबलं भवतीति न्यायात् ।

अब्दमिति । अजुह्वत् होममकुर्वन् । तच्च प्रवासादशक्त्या वा भवति ॥९९॥

केनापि हेतुना तस्याब्दं स्वयं होममकुर्वतः पुनराधेयं नैमित्तिकं स्यात् । सूत्रान्तरस्थं विकल्पमाह । पवित्रेष्टिरिति । अपरे तु, प्रवासहेतुना पुनराधेयमशक्ततया पवित्रेष्टिरिति व्यवस्थित-विकल्पमाहुः । एतेनार्धार्थमपि चतुःक्रोशात्मकयोजनस्य शतसङ्ख्योर्ध्वं प्रवासस्तन्मध्ये चाब्दपर्यन्तं प्रवासो न कार्य इत्यभिहितं भवति ।

एवं हि श्रूयते । यावज्जीवं दर्शपूर्णमासाभ्यां यजेत । त्रिंश-द्वर्षाणि दर्शपूर्णमासौ । जीर्णो वा विरमेदिति । तत्र त्रिंशत्संवत्स-रपक्षे तदूर्ध्वं दर्शपूर्णमासयोरेवाकरणमुत कर्ममात्रस्येति विप्रति-पत्तावाह ।

इष्टेः सङ्कल्पिते काले जीर्णत्वे त्रिंशदाब्दिके ॥ १०० ॥
पूर्णे सति निवर्त्तेत होमसोममखाद्यपि ।

---

* पवित्रेष्टिमथापि वा, —इति क॰ पुस्तके पाठः ।

केशवस्वामिना सर्वं स्पष्टमेतन्निरूपितम् ॥१०१॥
तस्मात् त्रेताग्निनिष्पाद्यं नाग्निहोत्रादि किञ्च न ।
यद्वा नेष्टिविकाराः स्युः सर्व्वमन्यद्भवेदिह ॥१०२॥
यद्वाऽग्निहोत्रमेव स्यात् पशुसोमादि न त्विति ।
त्रिंशद्दिनादिभिर्वाऽग्निहोत्राद्युपरमोऽस्त्विति ॥ १०३ ॥
वेदान्ते पुरुषार्थाधिकरणे प्राह वामनः ।

इष्टेरित्यादिचतुर्भिः । इष्टेः दर्शपूर्णमासयागस्य । सङ्कल्पिते प्रथमप्रयोगे परिगृहीते । जीर्णत्वे शीर्णे वा विरमेदिति विहितकाले । अशक्तावस्थायामिति यावत् । तथा, त्रिंशत्संवत्सरात्मके काले पूर्णे सति, होमोऽग्निहोत्रं सोममखाद्यपि सकलं कर्मजातं निवर्त्तते ।

इदं केशवस्वामिना स्पष्टमुक्तम् । ॥१००॥ ॥१०१॥

तस्मात् त्रेताग्निसाध्यं किमपि न भवेत् । [१]धारणं तु प्रतिपत्त्या अर्थवत् ।

पक्षान्तरमाह ।

---

(१) यदि होमादिकं किमपि न भवति तदा किमर्थमग्नियज्ञपात्रादीना धारणमित्याशङ्क्याह, धारणमिति । प्रतिपत्त्येति । आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति श्रुत्या मृतस्याहिताग्नेर्यज्ञपात्रैरग्निभिश्च दाहो-विहितः । सा तेषां प्रतिपत्तिः । तदर्थं तेषां धारणमिति भावः ।

यद्वेति। इष्टिविकाराश्चातुर्मास्यादयो न स्युः। दर्विहोम-सोमविकाराश्च भवेयुः। नैमित्तिकेष्टीनां स्थाने पूर्णाहुतिः॥ १०२॥

अथवा, पशुसोमविकारा न स्युः, दर्विहोमाग्निहोत्रादिकं भवत्येव।

प्रथमपक्षे सम्मतिं दर्शयति।

चिंशदिति। आदिपदात् सकलमपि॥१०३॥

इति वेदान्ते पुरुषार्थाधिकरणे वामनेन साधितमित्यर्थः।

काम्यसोमाधिकारिणमाह।

*कुटुम्बभरणायालमन्नं यस्य चिवत्सरम्॥ १०४॥ काम्येन सोमयागेन यजेतासौ न चेतरः।

कुटुम्बेति।

यावन्तो यजमानस्य स्वगृह्यानुगवादयः।

कुटुम्बं तद्दृष्टस्य विज्ञेयं भरणार्हणम्। इति।

चिवर्षाधिककुटुम्बभरणाय द्रव्यवान् काम्यसोमानुष्ठाने अधिकृतो भवति नेतरः॥१०४॥

नित्यन्तु सौमिकं यथालभ्यगुणोपेतं कर्त्तव्यम्। तच यावज्जक्यन्यायोपष्टम्भार्थमाह।

---

* एतस्मात् पूर्व्वं, चैवार्षिकाधिकालो यः स हि सोमं पिवेन्नरः, -इत्यर्द्धमधिकमस्ति ग॰ पुस्तके।

तावदन्नविहीनोऽपि कुर्य्यान्नित्यन्तु सौमिकम् ॥ १०५ ॥
यथालब्धगुणोपेतं यथासम्भवदक्षिणम् ।

तावदिति ॥१०५॥

गुणा अरुणादयः । शेषं स्पष्टम् । यच्च यज्ञपार्श्वीयं वचनं, तत्काम्यसोमपरम् । नित्याकरणे दोषश्रवणात् ।

तमेवाह ।

योऽनाहिताग्निः शतगुः सहस्रगुरसोमपः ॥ १०६ ॥
नासावर्घादियोग्यः स्यादित्येवं प्राह देवलः ।

य इति । गोपदं द्रव्यादेरुपलक्षकम् । गोव्यतिरिक्तद्रव्यसाध्यत्वादाधानादेः ॥१०६॥

अर्घा पूजा । आदिपदात् श्राद्धनिमन्त्रणादि । देवलग्रहणं पूजार्थम् ।

अपाङ्क्तेयाधिकारोपजीविविषयमाह ।

यथार्थं* भिक्षितं द्रव्यमन्यच विनियोजयेत् ॥ १०७ ॥
श्राद्धादौ स्यादपाङ्क्तेयो भासयोनिं च गच्छति ।

यथार्थमिति । यथार्थं यथाप्रयोजनं यज्ञार्थमिति यावत् । अन्यच कुटुम्बभरणादौ । आदिपदादार्त्तिज्यादौ ॥१०७॥

भासः पट्टगालः । काकयोनिमिति वा पाठः । एतेन यथित-

---

* यज्ञार्थं,– इति ग० पुस्तके पाठः ।

द्रव्येणापि नित्यं विधेयमित्युक्तं भवति। यच्च यज्ञार्थं याचितं द्रव्य-मित्यादि निदानवचनं, तत् काम्यपरम्।

अथ सत्यधिकारे नित्यकर्मणामकरणे दोषश्रवणाद्वश्यमनुष्ठेयत्वमाह।

निर्धनोधनसाध्येषु नित्येष्वधिकृतो यदि ॥ १०८ ॥
चौर्यादन्यैः कुमार्गैरपीष्ट्यर्थं धनमर्जयेत्।

निर्धनेति चतुर्भिः श्लोकैः ॥१०८॥

कुमार्गैः प्रतिग्रहादिभिन्नैः। तदुक्तम्।

"सप्त वित्तागमाधर्म्या दायोलाभः क्रयोजयः।

प्रयोगो विप्रयोगश्च * सत्प्रतिग्रह एव च" ॥ इति।

चौर्यस्यापिप्रसक्तौ विशिनष्टि। चौर्यादिति। परस्वं नाददीतेति श्रवणात्।

सूर्यग्रहे कुरुक्षेत्रे मेषीकृष्णाजिनादिकम् ॥ १०९ ॥
चाण्डालात् प्रतिगृह्यापि यजेतावश्यकैर्मखैः।

यज्ञार्थं कुरुक्षेत्रादिषु प्रतिग्रहोऽपि न दोषायेति भावः ॥१०९॥

ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ॥ ११० ॥
इत्यादि निन्दावाक्यानि काम्यहोमविवक्षया।

ये शूद्रादिति ॥११०॥

---

* प्रयोगः कर्म्मयोगश्च, — इति प्रस्थान्तरे मनुसंहितायाञ्च पाठः।

मन्वाद्युक्तं निन्दावचनं काम्यहोमविषयम् । न नित्यविषयम् । तेषां करणश्रवणस्य बलीयस्त्वात् स्मृतेश्च तदपेक्षया दौर्बल्यात् ।

आवश्यके तु सोमादौ सर्वसम्भारसम्भृते ॥ १११ ॥
सुवर्णव्यतिरिक्ताङ्गद्रव्यालाभे* हि चोरयत् ।

आवश्यकेति ॥१११॥

सर्वसम्भारसमृद्धौ सुवर्णभिन्नदेयदक्षिणाऽलाभे तु चौर्यमपि कृत्वा नित्यं सदक्षिणं कार्यम् । नादक्षिणोयज्ञो भवतीति श्रुतेः । यत्र सुवर्णमेव दक्षिणादेयं तत्र सुवर्णापेक्षायां यथासम्भवं देयं न तु सुवर्णचौर्यम् । तस्य महापातकत्वेनाधिकार एव विहन्येत ।

"अप्यन्यायप्रतं† कृत्वा भर्त्तव्या मनुरब्रवीत् ।

इति स्मृतेः पोष्यान्तर्गतत्वाच्चाग्नीनां नित्यमनुष्ठेयमेवेति भावः ।

अथोपक्लृप्तसोमभारस्यापि यष्टुः कृतदर्शपौर्णमासस्याधिकारक-मिति विकल्पेनाह ।

इष्टनित्येष्टिरथ वा ऽनिष्टेष्टिः सोममाहरेत् ॥ ११२ ॥
एवं सोमेष्टिपूर्वत्वे भवेत्तुल्यविकल्पनम् ।

इष्टेति । इष्टा नित्येष्टिर्दर्शपूर्णमासौ येन स तथा । अथ वा अनिष्टेष्टिः सोमं कुर्यात् ॥११२॥

उभयथा श्रवणादस्य तुल्यविकल्पः ।

---

* सुवर्णव्यतिरिक्तान्यद्रिक्तालाभे, — इति ग॰ पुस्तके पाठः ।

† अप्यकार्य्यप्रतं, — इति ग्रन्थान्तरीयः पाठः ।

कल्पान्तराभिप्रायेणाह ।

व्यवस्थितविकल्पो वा कातीयवचनाद्भवेत् ॥ ११३ ॥
यस्तूपक्रान्तसोमः सन्नादधीत हुताशनम् ।
स कुर्यात् सोमपूर्वत्वमन्येषामिष्टिपूर्वता ॥ ११४ ॥

व्यवस्थितेति ॥११३॥

व्यवस्थां दर्शयति यस्त्विति । स्पष्टम् । दर्शपूर्णमासाभ्यामिष्ट्वा-ऽन्येन यजेत सोमेन वोपक्रान्तसोम इति कात्यायनवचनात् सोमेष्टि-पूर्वकत्वे व्यवस्थितो विकल्पः ।

अत्रैव विधिरन्योक्तप्रकारमाह ।

विधिरन्योक्तमन्यादृग् व्यवस्थितविकल्पनम्* ।
त्रिपूरुषमविच्छिन्नो यस्य सोमक्रतुर्भवेत् ॥ ११५ ॥
तस्य स्यात् सोमपूर्वत्वमन्येषामिष्टिपूर्वता ।

विधीति । अन्यादृक् अन्यदेव ॥११४॥११५॥

जैमिन्युक्तविषयमाह ।

विप्रे सोमेष्टिपूर्वत्वे विकल्पं प्राह जैमिनिः ॥ ११६ ॥
राजादेरिष्टिपूर्वत्वपक्षमेव नियच्छति ।

विप्रेति । तुल्यविकल्पो व्यवस्थितो ब्राह्मणानामेवेति भावः ॥ ११६॥

---

* विकल्पितम्, — इति ग॰ पुस्तके पाठः ।

इष्टिनिर्येष्टिरित्यादिना कृतदर्शपूर्णमासस्याकृतदर्शपूर्णमासस्य च सोमेऽधिकारमुक्त्वाऽधुनाऽऽदौ नाम्रणनिरासार्थञ्च ऐन्द्राग्नं पुनरुत्सृष्टमालभेतेति श्रूयते, तत्राधिकारिणमाह।

पिता पितामहो वाऽपि सोमं यस्य न पीतवान् ॥११७॥
ऐन्द्राग्नं पुनरुत्सृष्टमालभेत पशुं हि सः।

पितेति। सोमयागेन नेष्टवानित्यर्थः। वाशब्दः समुच्चयार्थः। द्विपुरुषासोमपीथिन इति वचनात् ॥११७॥

उत्सृष्टशब्दार्थं स्वयं वक्ष्यति। देवताद्वयलक्षित ऐन्द्राग्नः पशुयाग उच्यते।

द्विपुरुषासोमपीथिन इति वचने द्वेधा विप्रतिपत्तिमाह।

एवं मीमांसकाः प्राहुर्याज्ञिका अपि केचन ॥११८॥
तस्य नेष्टः पशुः कैश्चित् पिता यस्य न सोमपः *।

एवमिति। तत्र पूर्वोक्तपक्षो मीमांसकाभिमतः। कतिपययाज्ञिकाभिमतश्च ॥११८॥

द्वितीयं पक्षमाह। तस्येति। कैश्चित् याज्ञिकैरुच्यत इति शेषः। तत्र सम्मतिमाह।

पितर्यसोमपीथेऽपि सोमपश्चेत् पितामहः ॥ ११९ ॥
तत्रैन्द्राग्नो न कर्त्तव्यो भारद्वाजीयभाष्यतः।

---

* यस्य त्वसोमप,— इति ग॰ पुस्तके पाठः।

पितरीति ॥११९॥

एवं पितामहे सोमपे पितर्य्यसोमयाजिनि प्रायश्चित्तपशुर्न भवतीत्युक्तं भाष्ये ।

स चायं पशुर्गौर्वा छागोवेति सन्देहे सिद्धान्तमेवाह ।

चोदकानुग्रहाच्चायं पशुश्छागोऽवगम्यते ॥ १२० ॥
पुनरुत्सृष्टवाच्यो हि वाहोत्सृष्टः पुनर्वहन् ।
छागेऽपि सम्भवत्येतद्वहत्येव हिमाचले ॥ १२१ ॥

चोदकेति । चोदकोविध्यन्तः । सर्वेषां हि प्रकृतिरग्नीषोमीयः । स च छागएवाम्नातः, छागस्य हविष इत्यादिना । अत्रापि सामान्यपशुशब्देनोपात्तः पशुश्छाग एव भविष्यति । एवं सति चोदकानुग्रहः ॥१२०॥

न चास्य पुनरुत्सृष्टत्वं न सम्भवतीति वाच्यम् । यः पूर्वं वाहितोदौर्बल्यादुत्सृष्टः पुनश्च समर्थः स न पुनर्वाहितः, स पुनरुत्सृष्टशब्दार्थ इति । सचायं छागेऽपि सम्भवति । हिमाचलादिदेशे तस्यैव वाहकत्वात् ॥१२१॥

एकदेशिमतमुत्थिप्य दूषयति ।

पुनरुत्सृष्टगोमृग इति गव्यमितीरितम् * ।
सूचे गोजातिनियतं पुनरुत्सृष्टशब्दनम् ॥ १२२ ॥

पुनरिति । पुनरुत्सृष्टोगोमृगः † इति शाखान्तरे श्रूयते ।

---

* गव्या इतीरितम्, — इति क॰ पुस्तके पाठः ।

† पुनरुत्सृष्ट गोमृगः, — इति क॰ पुस्तके पाठः ।

सूत्रे तु पुनरुत्सृष्टमात्रम् । तत्र सामान्यस्य विशेषोपसंहार-न्यायेन पुनरुत्सृष्टशब्दोऽपि गोजातौ नियत इति ॥१२२॥

ननु क्वचित् सामान्यत एव श्रूयते अतोविकल्पोऽस्त्विति चेदत-आह ।।

तथाऽप्यन्येऽपि तच्छब्दवाच्याः शाखान्तरश्रुतेः *।
गोपशुः पुनरुत्सृष्टोऽग्नीषोमीयो भवेदिति ॥ १२३ ॥
पुनरुत्सृष्टशब्दार्थो गोशब्देन विशेषितः ।
तेनागौरिति † बुध्येत पुनरुत्सृष्टशब्दभाक् ॥ १२४ ॥

तथापीति । शाखान्तरे श्रवणादन्येऽपि सामान्येन श्रुताः पुन-रुत्सृष्टशब्दाः। तच्छब्दोगोजातिशब्दः । शाखान्तरीयवचनमाह । गोपशुरिति । विशेषितः अग्नेयचतुर्धाकरणन्यायेन। दूषयति । तेनेति । तेन शाखान्तरस्थेन ॥१२३॥१२४॥

तस्मादन्यपरेणापि वाक्येनोक्तमसंशयम् ।
गावन्येषु ‡ च सामान्यं पुनरुत्सृष्टशब्दनम् ॥ १२५ ॥

अन्यपरेणापि गोपशुपरेणापि वाक्येन पुनरुत्सृष्टशब्दोगोषु छागेषु च सामान्येनाभिधानतां धत्ते इत्यसंशयम् ।

तथाच पुनरुत्सृष्टशब्देन छागोऽपि बुद्धिगोचरो भवति ॥१२५॥

एवं च सति अजएव ग्राह्यो नेतरः। तत्र हेतुचतुष्टयमाह । '

---

* शाखान्तरे श्रुते, — इति क० पुस्तके पाठ ।

† तेन गौरिति, — इति क० ग० पुस्तकयो पाठ ।

‡ इत्यमेव सर्व्वत्र । गवान्येषु, — इति तु समीचीनं प्रतिभाति ।

वाच्यत्वस्याविशिष्टत्वाच्चोदकाल्लोकगर्हणात् ।
कलौ युगे तु गोयागनिषेधाच्च भवेदजः ॥ १२६ ॥

वाच्यत्वादिति * । शब्दस्यास्य यौगिकत्वेनोभयथाविशिष्टत्वात् ।
शेषं स्पष्टम् ॥ १२६ ॥

उपसंहरति ।

पुनरुत्सृष्टशब्दार्थश्छाग एव भवेदिह ।
स्वकाण्डेन भरद्वाजः सुस्पष्टमिदमब्रवीत् ॥ १२७ ॥

पुनरिति । यस्रतिमाह । खेति ॥ १२७॥

अस्मिन्नेवार्थे लौगाक्षिमतमाह ।

त्यक्तेमं पुनरुत्सृष्टं क्लेशसाध्यं पुनर्मुनिः ।
लौगाक्षिरनुत्सृष्टाख्यं पशुमत्रोपदिष्टवान् ॥१२८॥

त्यक्तेति । इमं पुनरुत्सृष्टशब्दम् । क्लेशसाध्यमिति लाघवि-
कम् ॥ १२८॥

पारिभाषिकमनुत्सृष्टशब्दार्थमाह ।

यमयोर्यः पुरो जातः * सोऽनुत्सृष्टोऽभिधीयते ।
स सर्वथाविशिष्टत्वात् छागेऽपि न विरोत्स्यते ॥ १२९ ॥

यमयोरिति । यत्र गोपशुरित्युक्तं तत्प्रशंसार्थमर्थवादवचनम् ॥
१२९॥

---

* इत्यमेव पाठः सर्वत्र ।

† पुरा जातः, — इति ख॰ पुस्तके पाठः ।

सोमाधिकारहेतुत्वात् * सोमात्पूर्वञ्च पर्वणि ।
पशुरेव विधातव्य इति कर्कस्य सम्मतिः ॥ १३० ॥

स चायं पशुः सोमाधिकारार्थमुपदिष्टः । तस्मात् सोमात्पूर्वञ्च सर्वपर्वणि कर्त्तव्यः । य इष्ट्वेति श्रवणात् । इति कर्कोपाध्यायः ॥ १३०॥

बौधायनमतमाह ।

अग्नीषोमीयपशुना सवनीयेन वाऽप्ययम् ।
पशुः समानतन्त्रः स्यादिति बौधायनाशयः ॥ १३१ ॥

अग्नीषोमीयेति । स्पष्टम् ॥१३१॥

भिन्नतन्त्राश्रयेण मतद्वयमुपन्यस्यति ।

पृथक्तन्त्रत्वपक्षेऽपि सोमात्पूर्वमनन्तरम् ।
ऐन्द्राग्नोऽयं विधातव्य इत्यन्ये तु व्यवस्थिताः ॥ १३२ ॥

पृथगिति । अनन्तरं सोमानन्तरमित्यर्थः । तथाच विकल्पः । स च व्यवस्थित एव । न वैच्छिकः । व्यवस्थिताः व्यवस्थां प्राप्ताः । सा चैवं बोध्या ।

। असोमाधानिनः सोमात्पूर्वम् । सोमाधानिनस्त्वनन्तरम् । आधानानन्तरं होमादिकरणेन सोमाधानं व्याहन्येत । तस्मात्सोमानन्तरमेवेत्याशयः । कर्कस्तु सर्वेषां सोमात्पूर्वमेवाधिकारनिष्पत्तिलाभात् । अतएव विधिरस्ते साधूक्तम् ॥१३२॥

---

* सोमाधिकारे हेतुत्वात्, – इति ख० पुस्तके पाठ ।

दौर्ब्राह्मण्यनिमित्तकं नैमित्तिकपश्वालम्भनान्तरमाह।

योऽसौ दुर्ब्राह्मणः सोमं पिपासति स आदितः।
आलभेताश्विनं धूम्रललामं छागलं पशुम्॥ १३३॥

य इति। असौ वक्ष्यमाणलक्षणो यो दुर्ब्राह्मणो दौर्ब्राह्मण्यगुणयुक्तः सन् सोमपानं कर्त्तुमिच्छति। स आदितः, आदौ इत्यादितः। प्रथमप्रयोग इत्यर्थः। न प्रतिप्रयोगम्। स अश्विनौ देवता यस्येत्याश्विनम् धूम्रललामं धूम्रलोहितवर्णं छागलं छागं पशुद्रव्यं आलभेत। द्रव्यदेवतोपदेशादाश्विनः पशुयागः कर्त्तव्य इति चोदना॥१३३॥

तल्लक्षणमाह।

वेदोवेदिश्च विच्छिन्नावुभौ यस्य त्रिपूरुषम्।
दुर्ब्राह्मणः स विज्ञेयः पुनर्भूतनयोऽपि च॥ १३४॥

वेद इति। स्पष्टम्। लक्षणान्तरमाह। पुनर्भूरिति। पुनर्भूतनयः पौनर्भवः। पुनर्भूलक्षणम्*। उभयविधोऽपि दुर्ब्राह्मणः आश्विनपशुयागं कृत्वा सोमं कुर्यात्। पूर्वोक्त ऐन्द्राग्नश्च त्रिपुरुषसोमापीथिलनिरासार्थम्। द्वितीयो † दौर्ब्राह्मण्यनिरसनार्थम् इति। निमित्तभेदान्नैमित्तिकभेदः॥१३४॥

---

* एतावन्मात्रमेव क॰ ख॰ पुस्तकयोः। घ॰ पुस्तके तु एतदनन्तरं किञ्चित् स्थानं अक्षरशून्यं वर्त्तते। पुनर्भूलक्षणं स्मृतौ ज्ञेयम्, — इत्येवं पाठोऽत्र सम्भाव्यते।

† द्वितीया, — इति क॰ ख॰ पुस्तकयोः पाठः।

यच्चोक्तं निमित्तभेद इति तत्र पूर्वपक्षयति ।

न सोमं पीतवान् यस्य पिता वाऽपि पितामहः ।
दुर्ब्राह्मणं समाचष्टे कर्कः शाखान्तरश्रुतेः ॥ १३५ ॥

न सोममिति । द्विपुरुषासोमपीथित्वमपि दौर्ब्राह्मण्यप्रयोजकमिति भावः ॥१३५॥

आचार्यं सम्मतिं दर्शयति ।

पक्षमङ्गीकरोत्येनं मन्त्रब्राह्मणभाष्यकृत् ।
पक्षेऽस्मिन्नाश्विनैन्द्राग्नौ यद्यप्येकनिमित्तकौ ॥ १३६ ॥
तथाप्यदृष्टकार्यत्वात्तयोरिष्टः समुच्चयः ।

पक्षमिति । एनं कर्कोक्तपक्षम् । मन्त्रब्राह्मणभाष्यकृत् रामाण्डारः ।

पूर्वपक्षमुपसंहरति ।

पक्ष इति । निमित्तभेदाभावादेकमेव नैमित्तिकं स्यादिति ॥ १३६॥

सिद्धान्तमाह ।

तथापीति । अदृष्टार्थानां समुच्चय इति न्यायात् । तदुक्तं कात्यायनमीमांसायाम् । प्रायश्चित्तेषु दोषनाशादित्यादि । एकदेशिमतमाह ।

एकस्य सोमविच्छेदे केचिदैन्द्राग्नमब्रुवन् ॥ १३७ ॥
त्रयाणां सततं सोमे लुप्ते त्वैन्द्राग्नमाश्विनम् ।

एकस्येति। एकस्य पितुः पितामहस्य वा असोमपीथित्वे ऐन्द्राग्न एव एकः पशुर्भवतीति ॥१३७॥

त्रयाणां पित्रादीनां अविच्छेदेन असोमपीथित्वे तु पशुद्वयं भवतीति केषाञ्चिन्मतम्। भिन्नतन्त्रत्वपक्षेऽपि एतयोः समानतन्त्रत्वमेवेत्याह।

तयोः समानतन्त्रत्वं नानातन्त्रत्वमेव वा ॥ १३८ ॥
समानतन्त्रपक्षेऽपि चैन्द्राग्नः प्रथमो भवेत्।
एकादशिनितन्त्रत्वं भवेत्पशुगणत्वतः ॥ १३९ ॥
किन्त्वेतावान्विशेषोऽत्र बहुत्वे द्वित्वमूह्यते।

तयोरिति। तयोः पूर्वक्रियोः। समानतन्त्रतायां हेतुः, पशुगणत्वतः। पश्वेकादशिन्यां सिद्धान्तितत्वात् ॥१३८॥१३९॥

पश्वेकादशिन्यपेक्षया विशेषमाह।

किन्त्विति। यत्र बहुवचनान्तप्रयोगस्तत्र द्वित्वेनोहः। सोऽपि प्रकृतौ समवेतार्थानां दृष्टार्थानां मुख्यार्थानां यशुर्मन्त्राणामेव। एवं पिता पितामहोवाऽपौत्यादिरूपेण चीर्णदौर्ब्राह्मण्यपरिहारप्रायश्चित्त एवाधिकारी भवतीति प्रतिज्ञातं भवतीति।

अधुनाऽशौचादिदोषरहित एव सोमेज्याऽधिकारी भवतीति ज्ञापनायोपक्रमति।

रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा ॥ १४० ॥
नित्यं नैमित्तिकं कुर्यात् काम्यं कर्म * न किञ्चन।

---

* काम्यकर्म, — इति क॰ पुस्तके पाठः।

आधानं पुनराधानं* पशुः सौत्रामणी तथा ॥ १४१ ॥
चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ।
अकाम्यत्वेऽपि नैतेषां सूतकादावनुष्ठितिः ॥ १४२ ॥

रजोदोष इति । रजोरूपोदोषः । दम्पत्योस्तुल्याधिकारस्य पूर्वं सिद्धान्तितत्वात् तस्याः रजःसङ्गमे सति किमपि कर्म न स्यात्तथाऽशौचेऽपीत्येकदेशिमतं दूषयति ।

नित्यमिति । यदकरणे प्रत्यवायस्तन्नित्यं अग्निहोत्रहोमादि । भवति चास्य नियतनैमित्तिकत्वान्नित्यत्वव्यवहारः । निमित्ताज्जायते यत्, तन्नैमित्तिकं क्षामवत्यादि । नन्विदमपि नित्यलक्षणाक्रान्तत्वान्नित्यमिति चेत् । न । न हि क्षामवत्यादि निमित्ताभावेऽकरणेन प्रत्यवायं जनयति । निमित्तानन्तरं प्राप्तौ नैमित्तिकपदावरुद्धत्वान्न नित्यत्वम् । तथाचानयोर्यावच्छक्यन्यायोपष्टम्भकत्वेन कर्त्तव्यतासिद्धौ काम्ये तु सगुणस्यैव फलसमर्पकत्वात्पत्न्यादिकर्त्तृकधर्मलोपेन फल्गुत्वान्न प्रवृत्तिरिष्टेति भावः । ननु तर्ह्याधानमपि रजोदोषादौ विधेयं स्यादित्याशङ्कां निराकरोति । आधानमिति । तच्चाधानं नित्यमिति याज्ञिका मीमांसकैकदेशिनश्च । स्वामिमतं च । पुनराधेयस्य नैमित्तिकत्वेन प्राप्तिः, अन्येषान्तु नित्यसंस्थात्वेन प्राप्तिः । अकाम्यत्वेऽपीति नित्यनैमित्तिकत्वे यथासंख्यं† ज्ञेयम् ॥१४०॥१४१॥१४२॥

---

* आधानपुनराधाने, — इति ख॰ पुस्तके पाठः ।

† यथासंख्यं, — इति क॰ पुस्तके पाठः । ख॰ घ॰ पुस्तकयोः पाठ एव तु मूले निवेशितः । मम तु, नित्यनैमित्तिकत्वं यथासंख्यं ज्ञेयम्, — इति पाठः प्रतिभाति ।

`आरम्भोवरणं यज्ञे, आरम्भातिक्रमोदोषश्चासमाप्तौ स्यात् न स्यादिति सिद्धर्थं सर्वकर्मसाधारणमनुवदति ।

प्रक्रान्तेष्वपि चैतेषु सूतकादिसमुद्भवे ।
कर्त्तव्यान्यपि चैतानि वारितान्यप्यशेषतः ॥ १४३ ॥

प्रक्रान्तेष्विति । अशेषतः अशेषाणि नित्यनैमित्तिककाम्यानि । वारितानि कर्त्तव्यतानिषिद्धानि । पूर्वमिति शेषः । तच्चाधान-गतो विशेषोवक्ष्यते ॥१४३॥

अधुना पातित्यादिदोषरहितत्वमप्यधिकारितावच्छेदकमित्याह ।

पतितो नैव कुर्वीत शास्त्रीयं कर्म किञ्चन ।
प्रारब्धमपि सञ्ज्ञह्यादन्तरा पतितो भवेत् ॥ १४४ ॥

पतित इति । स च प्रायश्चित्तानर्हः प्रायश्चित्तानिच्छुश्चेति द्विविधः । अन्यः प्रायश्चित्ती । लौकिककर्मव्युदासार्थं, शास्त्रीयमिति । ननु आरम्भाक्रियम इत्यादिना तस्यापि प्रक्रान्ताधिकारः प्रसक्त इति पूर्वपक्षं निराकरोति । प्रारब्धमिति । प्रकृतित्वेन आरम्भे कृते मध्ये पातित्यनिमित्ते तत्रैव कर्मसमाप्तिर्न तु तदुत्तरं करणमिति भावः ॥१४४॥

न चैतस्यत्यभाषणस्यापि शास्त्रीयत्वेन निषेधः स्यादित्याशङ्का निराकरोति ।

अद्विजेष्वेव योधर्मो धर्मः साधारणोऽपि वा ।
सत्यं वक्तव्यमित्यादिः पतितोऽपि समाचरेत् ॥ १४५ ॥

अद्विजैरिति । त्रैवर्णिकव्यतिरेकेण योधर्मोऽसाधारण उक्तो-मन्वादिभिरिति शेषः । प्रदक्षिणादिरूपः । अपि वा द्विजाद्विज-साधारणेन योधर्मः सत्यवदनस्नानाचमनरूपस्तं कुर्यादित्यर्थः ॥ १४५॥

ननु पतितस्य शास्त्रीयकर्मनिषेधात् कथमश्वमेधावभृथस्नातः शुद्ध्येदित्यश्वमेधेऽधिकार इत्याशङ्क्याह ।

अश्वमेधादिके यज्ञे महापातकनाशने ।
पतितस्याधिकारोऽस्मिन् प्रत्युतानुगुणो भवेत् ॥ १४६ ॥

अश्वमेधेति । आदिपदात्सर्वस्तोमादिः । हेतुगर्भं विशेषण-माह । महापातकेति । अधिकारोऽस्तीति किं वक्तव्यम् । प्रत्युत ब्रह्महत्यादिपापक्षयकामनाया अनुगुण प्रायश्चित्तानुकल्प एव भवेत् । उपदेशात् ॥१४६॥

अथ श्रूयते । न ब्राह्मणं हन्यात्, न कलञ्जं भक्षयेत् । इत्यादि निषेधास्ते पतितेन पालनीया न वेति सन्देहे पूर्वोक्ताधिकारन्या-येन न पालनीया इति पूर्वपक्षं निराकरोति ।

पतितोऽपि निषिद्धानां वर्जनेऽधिकृतो भवेत् ।
ब्रह्मघ्नस्यापि तेनान्या ब्रह्महत्या न युज्यते ॥ १४७ ॥

पतितेति । ब्रह्मघ्नस्य ब्रह्महत्याभ्यासे प्रायश्चित्तविशेषाम्नाना-दित्यर्थः ॥१४७॥

ननु स कुर्यात् पतितव्रतमित्यादिकेन यस्य पतितातिदेशोऽस्ति

तस्य पूर्वोक्तन्यायेनानधिकारिता धर्मातिदेशाद्भवति न वेति सन्देहे सिद्धान्तमाह ।

पतितत्वातिदेशेषु नाऽधिकारो विनश्यति ।
निष्कृतिश्चातिदेश्याऽच न कर्मानधिकारिता ॥ १४८ ॥

पतितत्वेति । स पतितवद्भवेदित्यादिवाक्यैः पातित्यातिदेशस्तेन नाधिकारविघातः । न चातिदेशोऽयमर्थः । प्रायश्चित्तार्थमिति भावः ॥१४८॥

पतितस्य प्रसङ्गोपजीविविषयमाह ।

पतितस्य प्रसङ्गेन * बन्धुपातित्यहेतुकम् ।
विशेषमभिधास्यामः कर्मभेदेषु केषुचित् ॥ १४९ ॥

पतितस्येति । प्रसङ्गेनेति । प्रसङ्गसङ्गत्येत्यर्थः । बन्धुशब्देन सपिण्डाद्यात्मवाच्य ॥१४९॥

अथेदं चिन्त्यते । सुब्रह्मण्यं च प्रैष्यति पितापुत्रौयामिति † ज्योतिष्टोमादिकर्मविशेषे श्रूयते । तत्र संशयः । पित्रादीनां पतितत्वे सुब्रह्मण्यानामग्रहः कर्त्तव्यो न वेति सन्देहे पित्रादीनां शास्त्रीयकर्मसम्बन्धाभावात् कर्त्तव्य इति पूर्वपक्षं निराकरोति ।

पितुर्न नाम निर्देश्यं महापातकदोषिणः ।
आवेदनादिकार्येषु किन्तु तत्परभाविनाम् ॥ १५० ॥

---

* पतितस्वप्रसङ्गेन, — इति सर्व्वत्र पुस्तकेषु पाठः । टीकासम्मतपाठस्तु मूले निवेशितः ।

† पितापुत्रियामिति, — इति क॰ पुस्तके पाठः ।

पितुरिति। ननु दारलोपासोपः स्यादित्यत आह। किञ्चिति। परभाविनः पितामहादयः चयः तेषां नामनिर्देशः। आवेदनं सुब्रह्मण्याशंसनम्। आदिपदाम्नान्दीश्राद्धादौ ॥१५०॥

पितृपितामहयोः पतितत्वे निर्णयमाह।

पितामहपुरोगानां चयाणां नाम निर्दिशेत्।
पितामहोऽपि दुष्टश्चेत् प्रपितामहपूर्व्वकाः ॥ १५१ ॥

पितामह इति। स्पष्टम् ॥१५१॥

चयाणामपि सन्ततं * दुष्टत्वे निर्णयमाह।

निर्दिष्टव्यास्त्रयोमर्त्यास्तस्मिन्नपि विदूषिते।
प्रपितामहपित्राद्यास्त्रयोवाच्या यथाक्रमम् ॥ १५२ ॥

प्रपितामहेति। प्रपितामहपिता प्रपितामहपितामह इत्यादिनिर्देशः कार्य इत्यर्थः। इदञ्चोपलक्षणम्। एवं चतुर्णामपि दुष्टत्वे प्रपितामहपितामहेत्याद्युन्नेयम् ॥१५२॥

दुष्टश्चेन्मध्यमः कश्चित्तदूर्ध्वं पूर्वपश्चिमान्।
चीनेव निर्दिशेन्मर्त्यान् किं त्वचैतद्विशिष्यते ॥ १५३ ॥

पुरुषचमध्ये मध्यमः पितामहो दुष्टश्चेत्तं वर्जयित्वा पूर्व्वपश्चिमावुल्लेख्याः। पित्रादित्रयाणां दुष्टत्वे प्रपितामहपित्राद्युपादाने च तथापि मध्यमदुष्टत्वे पूर्वपश्चिमयोरेव निर्देशः कार्यः। एतदर्थं

---

* सततं, – इति क॰ पुस्तके पाठः।

कश्चिदिति पूर्वपश्चिमानित्यत्र बहुवचनान्तलक्ष्य। ननु निर्देशस्त्र-यार्णां श्रूयते तत् कथमुच्यते पूर्वपश्चिमानिति पूर्वपक्षमुद्भावयति। त्रीनिति। श्रूयत इति शेषः। सिद्धान्तयति। किन्त्विति। अत्र दयोरेव नामपक्ष इति विशेषशास्त्रेण सामान्यस्य बाधादित्याशयः॥ १५३॥

सुब्रह्मण्याह्वाने श्रूयते। अमुकस्य पुत्रो यजेत इति। तत्र संशयः। पित्रादीनां दुष्टत्वे पुत्रादिपदैर्निर्देशो नाम्ना वा। तत्र सिद्धान्तमाह।

येषां केषाञ्चिन्मर्त्यानां नामान्यध्वर्युरादिशेत्।
तेषां पुत्रस्य पौत्रस्य नप्तेत्यादिश्यते पतिः॥ १५४॥

येषामिति। येषामदुष्टानां * प्रपितामहादीनां नामानि कथयेत् तेषामेवायं यष्टा पुत्रादिनोल्लेख्यः॥१५४॥

ननु कथमस्य तेषां पुत्रत्वादीत्यत्राह।

पितामहादिचितये पित्रादित्रयभावना।
अन्यादृशेऽपि सम्बन्धे निर्देशस्त्वेवमेव हि॥ १५५॥

पितामहादीति। ये नामवक्त्र्ययोग्याः तेषां पित्रादिभावना कार्या। यद्यपि नैव † सम्बन्धः, तथाप्येवमेव निर्देशो वचनात्॥१५५॥

मात्रादिविषये अतिदिशार्थमाह।

---

* येषा दुष्टानां, – इति क० पुस्तके पाठः।

† इत्थमेव पाठः सर्व्वत्र। नैवं, – इति तु पाठः समीचीनः प्रतिभाति।

मात्रादीनामिदं स्त्रीणां योजनीयमशेषतः ।
निर्देशत्यागयोर्नाम्नो * महापातकसम्भवे ॥ १५६ ॥

मात्रादीनामिति। इदं पूर्वोक्तलक्षणम् । नाम्नो निर्देशस्याग-स्थानयोर्निर्णये योजनीयम् ॥१५६॥

अधुना दत्तके निर्णयमाह ।

यजमानस्य यस्य द्वौ पितरौ वा पितामहौ ।
पितुः पितामहौ तस्य निर्दिशेद्वंशयोर्नरान् ॥ १५७ ॥

यजमानेति । यस्य यजमानस्य त्रयाणां मध्ये यः कश्चन दत्तको-भवेत्, तस्य यजमानस्योभौ वंशौ निर्देष्टव्यौ ॥१५७॥

मात्रादिवंशे तत्सपत्नीनामप्युल्लेखो भवतीत्याह ।

निर्देश्यानाञ्च योषाणां सपत्न्यश्च भवन्ति चेत् ।
तासामपि समस्तानां नामनिर्देश इष्यते ॥ १५८ ॥

निर्देश्यनामिति ॥१५८॥

अथ पुत्रनामनिर्देशे निर्णयमाह ।

औरसा एव पुत्रा ये महापातकवर्जिताः ।
तेषां नाम ग्रहीतव्यं सुब्रह्मण्यादिकर्मसु ॥ १५९ ॥

औरसा इति । स्वपत्न्यां स्वस्मात् जाता औरसाः । तेषामपि पतितत्वे न निर्देश्याः अन्यथा निर्देश्याः इत्याह । महापातकेति ॥ १५९॥

---

* निर्देशत्यागयोर्नाम्नां, — इति ग० पुस्तके पाठान्तरम् । निर्देशत्यागयो-र्नाम्नां, — इति ग० घ० पुस्तकयोः पाठः ।

औरसपक्षादेव सिद्धेऽर्थे स्पष्टार्थमाह * ।

पुत्राणां क्षेत्रजादीनां साधूनामपि नेष्यते ।
तथैव भ्रातृपुत्राणां पुत्रिकासन्ततेरपि ॥ १६० ॥

पुत्राणामिति । औरसपुत्राणामिव भ्रातृपुत्राणामपि स्यादित्याह । तथैवेति । अपिशब्दात् कन्यापत्यानामपि औरसवन्निर्देश इत्यर्थः ॥१६०॥

मृतानामपि अपत्यत्वात् स्यादत † आह ।

जीवतामेवापत्यानां यथाज्येष्ठं प्रकीर्तितम् ।
स्त्रीप्रजानामधेयञ्च पुंवदेव प्रकीर्त्यते ॥ १६१ ॥

जीवतामिति । क्रममाह । यथाज्येष्ठमिति । स्त्रीप्रजास्वपि साधुत्वे यथाज्येष्ठक्रमातिदेशार्थमाह । स्त्रीप्रजेति । स्पष्टम् । अमुकस्य प्रपितामह्यो यजत इति नप्तृनामनिर्देशः ॥१६१॥

तेषामप्यपत्यस्येत् यथायोगं यथासम्भवं निर्देशो भवतीत्याह ।

नप्त्रादीनामपत्यानि यदि जातानि कानिचित् ।
तेषामपि समस्तानां नामधेयं विनिर्दिशेत् ॥ १६२ ॥

नप्त्रादीनामिति । प्रायोऽसम्भवाद्यदीत्युक्तम् ॥१६२॥

---

* स्पष्टार्थमाह, — इति ख॰ पुस्तके पाठ ।

† स्यादत, — इति क॰ पुस्तके पाठः ।

जनिष्यमाणापत्यानां नाम्नाऽनुकीर्त्तनं न सम्भवतीति हेतुदर्शन-पुरःसरमाह।

जनिष्यमाणापत्यानामिदानीं नाम वर्जयेत्।
जनिष्यमाणशब्देनैवेष्टं सम्बन्धकीर्त्तनम्॥ १६३॥

जनिष्यमाणेति। नामदेशं विना केवलं जनिष्यमाणशब्देन सम्बन्धकीर्त्तनं न कार्यम्। कुतः। नामनिर्देशस्यापि वाक्यावयवत्वात् तस्येदानीमभावात्। द्वादशेऽहनि पिता नाम कुर्यादिति श्रुतेः॥१६३॥

गतं प्रसक्तानुप्रसक्तम्। अथ यथोक्तदेशविशेषवत्त्वमपि सोमेज्यादिष्वधिकारितावच्छेदकमिति व्यतिरेकमुखेनाह।

देशदोषवशेनापि विनश्यत्यधिकारिता।
अङ्गवङ्गकलिङ्गादौ म्लेच्छादिनिलये यथा* ॥ १६४॥

देशेति। सर्वाणि निमित्तान्तराण्येव। तेनार्यावर्त्तादावपि म्लेच्छादिनिलये नाधिकारः। आदिपदादन्तरिक्षानाच्छादनादयः॥१६४॥

अथ कालस्यापि अधिकारितावच्छेदकत्वमिति व्यतिरेकमुखेनाह।

कालदोषोऽधिकारस्य हानिं वितनुते क्वचित्।
मलमासे यथा सर्वकालान्तरमलावहे॥ १६५॥

---

* तथा, — इति क॰ ख॰ पुस्तकयोः पाठः।

कालदोष इत्यादिना। कालस्य दोषः सत्यप्यधिकारे अधिकारहानिं कुरुते। प्रारब्धकर्मणामगतिकानां च नाधिकारविघात इति सूचयितुं क्वचिदिति। दोषं दिङ्मात्रमुदाहरति। मलमासेति ॥१६५॥

तल्लक्षणमाह।

सूर्यसङ्क्रान्तिरहितो मलमासोऽभिधीयते।
तत्रानन्यगतिं नित्यां* कुर्यान्नैमित्तिकीं क्रियाम्॥ १६६॥
काम्यन्तु यागहोमादि न तत्रेष्टं कथञ्चन।
नित्याऽपि तत्र नैवष्टा क्रिया गत्यन्तरे सति ॥ १६७ ॥

सूर्येति। पूर्वं क्वचिदुक्तं तत्प्रपञ्चार्थमाह। तत्रेति। तत्र मलमासे अनन्यगतिकं नित्यं नैमित्तिकं कुर्यात्। काम्यन्तु नैव भवेत्। सर्वाङ्गोपसंहृतस्यैव तस्य फलवत्त्वात्।

न्यायविदस्तु। काम्येऽपि अनन्यगतिकत्वमिति विशेषयन्ति। अन्यथा दैवान्मलमासे वृष्टिनिरोधे सस्यग्लानिभयात्कारीरीष्टिर्न स्यादिति ॥१६६॥१६७॥

परिशेषात् सिद्धार्थमनुवदति।

अतएव न सोमेज्या वसन्तेऽपि मलिम्लुचे।
नित्याऽप्येषा न तत्र स्यात् सम्भवात् मुख्यपर्वणः॥१६८॥

नित्येति†। अत एव कालदोषस्य सगतिकनित्यनैमित्तिक-

---

* तत्रान्यगतिकं नित्यं, — इति ग॰ पुस्तकपाठो न समीचीनः।

† इत्थमेव पाठः सर्व्वत्र। अतएवेति, — इति तु भवितुमुचितम्।

कर्मणामधिकारविघातदर्शनादेव हेतोः। गतिमेवाह । सम्भवादिति ॥१६८॥

सोमपदस्योपलक्षणत्वमाह ।

एवमन्यानि कर्माणि नित्यान्यपि मलिम्लुचे ।
पश्विज्याग्रयणाधानचातुर्मास्यादिकान्यपि ॥ १६९ ॥
न कार्याणि स्वकालस्य शुद्धस्यापि च सम्भवात् ।

एवमिति । यत्र शुद्धकालसम्भवोऽस्ति तानि सर्वाणि उदाहर्तव्यानि । तान्येवाह ।

पश्विति । आदिपदात् । सौत्रामण्यादि ॥१६९॥

अन्यत्रापि अमुमेव हेतुं सञ्चरत्याह ।

महालयाष्टकोत्सर्गोपाकर्माद्यपि कर्म यत् ॥ १७० ॥
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।
उत्तरस्यापि मासस्य तत्संज्ञस्यैव सम्भवात् ॥ १७१ ॥

महालयेति । आदिपदाच्छ्रवणाकर्मादि । यत् स्पष्टमासविशेषेणाभिहितं तन्मले वर्जयेत् ।

उत्तरमासि कृतश्चेत् तदैव कृतं भवतीत्यभिप्रायः । अतः सङ्गतिलम् ॥१७०॥१७१॥

एवमेव मासिकेष्वपीत्याह।

प्रतिमासं मासिकानि कुर्वन् प्राप्ते मलिम्लुचे ।
मासिकं नैव कुर्वीत कुर्यादुत्तरमासि तत् ॥ १७२ ॥

प्रतिमासमिति ॥१७२॥

अगतिकान्याह ।

पार्वणेष्ट्यग्निहोत्रे च मासि श्राद्धं पितृक्रतुः ।
सन्ध्या पञ्च महायज्ञा देवतातिथिपूजनम् ॥ १७३ ॥
प्रेते मात्यादिमारभ्य* श्राद्धपिण्डोदकक्रिया ।
सपिण्डीकरणान्ताश्च यथाकालमुपस्थिताः ॥ १७४ ॥
तीर्थस्नानजपश्राद्धं पिण्डदानञ्च तर्पणम् ।
यवव्रीहितिलैर्होमो जातकर्मादिकाः क्रियाः ॥१७५॥
चन्द्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकम् ।
मघात्रयोदशीश्राद्धमित्यादीनि बहून्यपि ॥ १७६ ॥
प्रत्युपस्थितहेतूनि सम्प्राप्तानि मलिम्लुचे ।
अनन्यगतिकत्वेन कर्त्तव्यान्यधिकेऽपि च † ॥१७७॥

पार्वणेष्ट्यादिना । पार्वणेष्टिर्दर्शपूर्णमासौ । मासि श्राद्धं दर्शश्राद्धम् । पितृक्रतुः पिण्डपितृयज्ञः । प्रेते प्रेतनिमित्तं दाहादारभ्य ।

सपिण्डीकरणान्ताः, तीर्थस्नानं मलमासात् पूर्वमेव प्रस्थितस्य, जपादीनि तीर्थनिमित्तान्येव । जातकर्मादिसंस्काराः चूडान्ताः । स्नान-

* इत्थमेव पाठः सर्व्वत्र । दाहादिमारभ्य,—इति तु पाठः टीकासम्मत-इति प्रतिभाति ।

† कर्त्तव्यमधिकेऽपि च,—इति क० पुस्तके पाठः ।

दानादीनि यहणनिमित्तान्येव * । आदिपदादलभ्ययोगानि अर्द्धोदयकपिलाषष्ठीप्रभृतीनि, प्रत्युपस्थिता प्राप्ताश्चैतत्रो निमित्तानि उपरागादीनि येषां, एतादृशानि बहूनि अधिकेऽपि तानि कर्त्तव्यानि। एतेषामगतित्वमेव हेतुरित्याह । अनन्यगतिकेति। स्पष्टम् ॥१७३॥ ॥१७४॥१७५॥१७६॥१७७॥

आब्दिकश्राद्धे विशेषमाह ।

आब्दिकं नाम यच्छ्राद्धं मलमासे न दुष्यति ।
मलमासप्रमीतानामन्येषामुत्तरत्र तु ॥ १७८ ॥

आब्दिकमिति । अन्येषां शुद्धमासमृतानाम् । इदं प्रथमाब्दिकातिरिक्तविषयम् । तदुक्तं स्मृत्यन्तरे ।

"आब्दिकं प्रथमं यत्स्यात् तत् कुर्वीत मलिम्लुचे ।
चतुर्दशे तु सम्प्राप्ते कुर्वीत पुनराब्दिकम्" ॥ इति ॥

अस्यार्थ । पुनराब्दिकं द्वितीयादिवार्षिकं त्रयोदशे मासेऽतीते चतुर्दशाद्यदिने † कुर्यात् ॥१७८॥

अथाभ्युदयिकश्राद्धनिषेधव्यापारेणैतत्प्रयोजकानि कर्माणि न कार्याणीति लाघवार्थमाह।

न स्यादाभ्युदयश्राद्धं विना जन्मनिमित्तकम् ।
गर्भे वार्धुषिके भृत्ये नाधिमासं विवर्जयेत् ॥ १७९ ॥

न स्यादिति। निषेधस्य प्राप्तिपूर्वकत्वात् यानि माङ्गल्यकार्याणि

---

* चूडान्तात् प्राक्तनादीनि, – इति ख० पुस्तके पाठ ।
† इत्यमेव पाठ सर्व्वत्र ।

गृहप्रवेशविवाहादीनि तत्प्रापकाणि, तानि न स्युरिति भावः। अगतिकनैमित्तिकन्तु भवतीत्याह। विनेति। जन्मनिमित्तं पुत्रजन्मायुक्तं प्रधानरूपं, तद्वर्जयित्वा। न तु जातकर्माङ्गं, न मोष्यन्तीजातकर्मेत्यादिना कात्यायनेन* निषेधात्। अगतिकतया प्राप्तानां गर्भाधानादिसंस्काराणां अङ्गत्वेन प्राप्तस्य श्राद्धे नैव बाधितुमिष्टम्। अबाधेनोपपत्तौ बाधायोगात्। प्रधानं नीयमानमङ्गान्यपकर्षयतीति† न्यायाच्च। लौकिककर्मणि गर्भकर्मणि च मलमासनिषेधोनास्तीत्याह। गर्भ इति। वार्धुषिकं वृद्धिकर्म। भृत्ये वेतनादौ॥१७९॥

इदानीं दर्वीहोमोगृह्यकर्माणि पचादिप्रसृतीनि च मले कार्याणीत्याह।

वषट्कारं विना होमा ये भवन्तीह केचन।
ते सर्वे मलमासेऽपि कर्त्तुं युक्ता इति श्रुतिः॥१८०॥

वषट्कारमिति। अगतिकनित्यत्वेन प्राप्तिसिद्धावपि पुनर्वचनं प्रपञ्चार्थम्। न तु वषट्कारवद्यागनिषेधार्थम्। श्रुतिग्रहणं विस्मार्थम्॥१८०॥

नित्यानामपि प्रथमारम्भो मलमासे न भवतीत्याह।

आधानानन्तरं पूर्णमासी चेन्मलमासगा।
तस्यामारम्भणीयादीन्न कुर्वीत कदाचन॥१८१॥

---

* न तु जातकर्माङ्गं मोष्यन्तीमित्यादिना विहितजातकर्माङ्गं – इति क॰ ख॰ घ॰ पुस्तकेषु पाठः।

† मङ्गान्यपकर्षतीति, – इति ङ॰ पुस्तके पाठः।

आधानेति। आरम्भणीया अन्वारम्भणीया। आदिशब्देन दर्शपूर्णमासौ। यच्च प्रयोगपारिजाते गर्गवचनम्।

"नामकर्म च दर्शेष्टिं यथाकालं समाचरेत्।

अतिपाते सति तयोः प्रशस्ते मासिपुण्यभे" * इति॥

तथापि याज्ञिकाः,—

"आरम्भं दर्शपूर्णयोरग्निहोत्रस्य चादिमम्।

प्रतिष्ठाः पञ्च कूर्माद्या मलमासे विवर्जयेत्"॥

तथा,

"उपरागोऽधिमासश्च यदि प्रथमपर्वणि।

तथा मलिम्लुचे पौषे नान्वारम्भणमिष्यते॥

गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा"।

इत्यादिसङ्ग्रहवाक्येभ्यः,—

तथा, नामकरणप्रकरणे,

"व्यतीपाते च सङ्क्रान्तौ ग्रहणे वैधृतावपि।

श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मानवः॥

अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत्"।

इति गर्गवचनाच्च मलास्ताद्यवरुद्धपौर्णमास्यां प्रथमपौर्णमासं नानुतिष्ठन्ति। गर्गवचनं पुनराधानविषयत्वेन नेयम्।

वस्तुतस्तु दर्शेष्टिरित्यपपाठ एव। नामकर्म च जातेष्टिरिति काशादर्शे दर्शनात्। दर्शपूर्णमासानीजानोदक्षिणाग्निपक्वमित्यस्ति देवयाज्ञिकभाष्यश्च। तथाच, सूतकगुरुकालासत्त्वादिनिमित्तवशाद्

* पुण्यदे, — इति क॰ पुस्तके पाठः।

दर्शपूर्णमासारम्भोत्कर्षे सति आग्रयणकाल आगते तदतिक्रमशङ्का-यामयं प्रकार इति । न च मङ्गलवचनान्यालस्यादिनाऽतिक्रान्तार-म्भविषयाणि, प्रथमपर्वणीति प्रथमपदोपादानात् । प्रथमपर्वण्यालस्यादिनाऽतिक्रान्तत्वासम्भवात् ॥१८१॥

अगतिकं नैमित्तिकमपि कुर्यादिति प्रागुक्तं, ततो जातेष्टिरपि प्रसक्ता, तदपवादमाह ।

नैमित्तिक्यपि जातेष्टिर्न कर्त्तव्या मलिम्लुचे ।
ऊर्ध्वं पर्वणि* कुर्वीरन्नाशौचरजसी विना ॥ १८२ ॥

नैमित्तिकीति । ऊर्ध्वं शुद्धमासीत्यर्थः । एवं रजोदोषे इत्यादिवाक्येन नैमित्तिकानुष्ठानप्राप्तौ तन्निषेधति । आशौचेति । एतेनेतदुक्तं भवति । याश्च पुरुषोपयातरूपा† जातेष्टिचामवत्यादयः ताः शुद्धे पर्वणि भवन्ति । याश्च कर्मोपयातरूपा‡ मातपत्यादयो-नैमित्तिक्यस्तास्तत्कालं शुद्धकालान्तरानादरेण§ मलमासे आशौचे रजसि वा भवन्ति ॥१८२॥

मले काम्यं न भवतीत्युक्तम् । तत्रारब्धकाम्यं भवतीत्याह ।

प्रवृत्तं मलमासात् प्राग्यत्काम्यमसमापितम् ।
आगते मलमासेऽपि तत्कर्त्तव्यमसंशयम् ॥ १८३ ॥

---

* ऊर्द्धपर्व्वणि, — इति ख॰ पुस्तके पाठः ।

† पुरुषोपपातरूपा, — इति घ॰ पुस्तके पाठः ।

‡ कर्मोपयातरूपा, — इति ङ॰ पुस्तके पाठः ।

§ शुद्धकालानादरेण, — इति क॰ ख॰ ध॰ पुस्तकेषु पाठः ।

प्रवृत्तमिति । स्पष्टम् ॥१८३॥

अगतिकमप्याग्रयणं सद्भटे मलमासादौ कार्यमित्याह ।

पुराणधान्यशून्यत्वे क्षुद्बाधे समुपस्थिते ।
श्यामाकैर्मलमासेऽपि कृत्वाऽऽग्रयणमातुरः ॥ १८४ ॥
नवमुक्त्वा यथाकालं व्रीह्याग्रयणमाचरेत् ।

पुराणेति । उपलक्षणार्थमिदं व्रीहिश्यामाकपरम् । न्यायतौल्यात् ॥१८४॥

प्रसङ्गादिदमुक्त्वा प्रकृतार्थमुपसंहरति ।

दैवात्सोमेन नैवेष्टं प्राग्वसन्तान्यपर्वणः ॥ १८५ ॥
शिष्टं पर्वैकमेवाच तत्रापि * मलदूषितम् ।
तत्र सोममखो नैव कार्योनित्योऽपि सन्नयम् ॥ १८६॥
यागलोपप्रसक्तावप्युदक्यादिमले यथा † ।

दैवादिति । दैवान्मानुषाद्वा प्रतिबन्धाद्वसन्तात्पर्वणः प्राक् सोमेन नेष्टं अन्यपर्वं च मलमासगच्छेत्, तत्राग्रे वसन्ताभावादगतिकोनित्योऽपि सन् सोमो न भवति । किन्तु वसन्तं विनाऽप्युदगयने कार्यः। तत्राप्यसम्भवेन लोपप्रसक्तावपि मलमासे न भवति ॥१८५॥ ॥१८६॥

एतदेव दृष्टान्तेन दृढयति ।

---

* तथापि, – इति क॰ ख॰ पुस्तकयो पाठ ।

† तथा, – इति क॰ ख॰ पुस्तकयो पाठ ।

एवमादीति । यथा पत्न्युदक्यादिकमधिकारविघातकं तथा मलोऽपीति भावः । आदिपदात् सूतकादि ।

प्रकरणार्थमुपसंहरति ।

एवमुद्देशतः सारमधिकारस्य भाषितम् ॥ १८७ ॥
विचिन्त्य * कथयिष्यामि तत्तत्प्रकरणे स्फुटम् ।

एवमिति । उद्देशतः सङ्क्षेपेण । सारं श्रुतिसम्मतं निष्कृष्टभूतं बह्ववादिसम्मतप्रमेयं अधिकारस्य भाषितं निरूपितम् । न्यूनत्वा-शङ्कापरिहारार्थमाह । विचिन्त्येति । स्फुटं विशदं विशेषाकारेणेत्यर्थः ॥ १८७॥

अधिकारप्रकरणसमाप्तिं शिष्यावधानाय दर्शयति ।

इति श्रीवादि † मुग्ध्ररकुठारकुमारस्वामिसूरिसुत-त्रिकाण्डमण्डनभास्करमिश्रसोमयाजिकृतापस्तम्बसूत्र-ध्वनितार्थकारिकासु सोमयागोपोद्घाते अधिकारि-निरूपणं ‡ समाप्तम् ॥

इतीति । वादिनः पूर्वपक्षिणः । तेषां भङ्गुरत्वादिरूपेण तादृग्रूपकं मुग्ध्ररेति । सोक्तिभिः सिद्धान्तकथनद्वारा पूर्वपक्ष-

* विचिन्त्य,–इति क० पुस्तके पाठः ।

† वादिभट्ट,–इति ग० पुस्तके पाठः ।

‡ सोमयाजिकृतौ अधिकारनिरूपणं,–इत्येतावन्मात्रं ग० पुस्तके पाठः ।

निराकरणेन मुद्गरत्वं कुठारत्वञ्चारोपितम् । त्रीणि च तानि काण्डानि च त्रिकाण्डानि ।

इति श्रीत्रिकाण्डमण्डनकारिकाविवरणे प्रथममधिकारिकाण्डं समाप्तम् ॥

श्रीगणेशाय नमः ।

*शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते ।
यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥ १ ॥
*काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः ।

---

* आदितः पञ्चदशकारिकाणां व्याख्या व्याख्यायुक्तपुस्तकेषु नोपलभ्यते । एकस्मिन् व्याख्यायुक्तपुस्तके मूलपुस्तके च कारिकाः पठ्यन्ते । एतासां व्याख्यांशः कालवशात् प्रलीन इति सम्भाव्यते । अर्थावगतये मयैतासां संक्षिप्ता व्याख्या विरच्य लिख्यते ।

कालदोषादिवद्द्रव्याभावोऽप्यधिकारविघातको न वेति सन्देहापनयाय प्रतिनिधिप्रकरणमारभते । शिष्टस्येति । शिष्टस्य शास्त्रविहितस्य द्रव्यस्य अभावतोऽभावे । शिष्टाभावस्य प्रतिनिध्युपादानहेतुत्वाद्वा पञ्चम्यास्तसिल् । न खलु शिष्टस्य भावे प्रतिनिधिरुपादीयते । तुल्यमित्यत्रापि शिष्टस्येत्यनुषञ्जनीयम् । तथाच श्रुतद्रव्यापचारे तत्तुल्यं द्रव्यान्तरं प्रतिनिधातव्यमित्यर्थः सिध्यति । तुल्यत्वस्य येन केनापि धर्म्मेण सम्भवाद्विशिनष्टि यावदित्युत्तरार्द्धेन । सौसादृश्यस्य पुनरसम्भवे येन केनचित् सादृश्येनापि प्रतिनिधिग्रहणं वक्ष्यते ॥ १ ॥

* सर्व्वथाविशेषेण प्रतिनिधिग्रहणे प्राप्ते विशेषमाह । काम्ये इति । हि यस्मात् नित्ये नैमित्तिके च स प्रतिनिधिस्तस्मात् काम्ये प्रतिनिधिर्नास्ति । नित्यनैमित्तिकयोरकरणे प्रत्यवायोपदेशात् प्रतिनिधिनाऽपि तयोः

निराकरणेन मुद्गरत्वं कुठारत्वञ्चारोपितम् । त्रीणि च तानि काण्डानि च त्रिकाण्डानि ।

इति श्रीत्रिकाण्डमण्डनकारिकाविवरणे प्रथममधिकारिकाण्डं समाप्तम् ॥

श्रीगणेशाय नमः ।

*शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते ।
यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥ १ ॥
*काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः ।

---

* व्यादितः पञ्चदशकारिकाणां व्याख्या व्याख्यायुक्तपुस्तकेषु नोपलभ्यते । एकस्मिन् व्याख्यायुक्तपुस्तके मूलपुस्तके च कारिकाः पठ्यन्ते । एतासां व्याख्याग्रन्थः कालवशात् प्रलीन इति सम्भाव्यते । अर्थावगतये मयैतासां संक्षिप्ता व्याख्या विरच्य लिख्यते ।

कालदोषादिवद्द्रव्याभावोऽप्यधिकारविघातको न वेति सन्देहापनयाय प्रतिनिधिप्रकरणमारभते । शिष्टस्येति । शिष्टस्य शास्त्रविहितस्य द्रव्यस्य अभावतोऽभावे । शिष्टाभावस्य प्रतिनिध्युपादानहेतुत्वाद्वा पञ्चम्यास्तसिल् । न खलु शिष्टस्य भावे प्रतिनिधिरुपादीयते । तुल्यमित्यत्रापि शिष्टस्येत्यनुषञ्जनीयम् । तथाच श्रुतद्रव्यापचारे तत्तुल्यं द्रव्यान्तरं प्रतिनिधातव्यमित्यर्थः सिध्यति । तुल्यत्वस्य येन केनापि धर्मेण सम्भवाद्विशिनष्टि यावदित्युत्तरार्द्धेन । सौसादृश्यस्य पुनरसम्भवे येन केनचित् सादृश्येनापि प्रतिनिधिग्रहणं वक्ष्यते ॥ १ ॥

* सर्वत्राविशेषेण प्रतिनिधिग्रहणे प्राप्ते विशेषमाह । काम्ये इति । हि यस्मात् नित्ये नैमित्तिके च स प्रतिनिधिस्तस्मात् काम्ये प्रतिनिधिर्नास्ति । नित्यनैमित्तिकयोरकरणे प्रत्यवायोपदेशात् प्रतिनिधिनाऽपि तयोः

काम्येऽप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥ २ ॥
न स्यात् प्रतिनिधिर्मन्त्रे देवेऽग्नौ कर्मणीश्वरे।
न च प्रतिनिधिर्देशकालयोरित्यथापरे ॥ ३ ॥
*नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।
नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥ ४ ॥
*श्रोत्रियाणामभोज्यं यत् द्रव्यं हि तदशेषतः।
ग्राह्यं प्रतिनिधित्वेन होमकार्येषु न क्वचित् ॥ ५ ॥

* देवेऽग्नौ, — इति ग० पुस्तके पाठः।

कारणं, काम्यस्य त्वकरणे प्रत्यवायाभावात् श्रुतद्रव्येणैव तदनुष्ठानमिति भावः। मतान्तरमाह। काम्येऽपीति। उपक्रमादारम्भात्। ऊर्द्ध्वं परतः। प्रारब्धकाम्यकर्म्मणोऽपि समापनस्यावश्यकत्वादारम्भात् परतः श्रुतद्रव्या-पचारे तत्रापि प्रतिनिधिरुपादेयः। नित्यनैमित्तिकसमानन्यायत्वादित्या-शयः। तदिदं वाक्यं द्रव्यप्रतिनिधिपरमित्यनुसन्धेयम् ॥ २ ॥

* सर्व्वत्राविशेषेण प्रतिनिधिप्राप्तौ विशेषमाह। न स्यादिति। मन्त्र इषे त्वेत्यादिः। देव इन्द्रादिः। अग्निराहवनीयादिः। कर्म्म प्रयाजादि। ईश्वरः स्वामी। एषु प्रतिनिधिर्नेत्यर्थः। युक्तयस्तत्र मीमांसाषष्ठाध्या-यादवगन्तव्याः। विस्तरभयान्न प्रस्तूयन्ते। एवमन्यत्रापि। देशः प्राचीन-प्रवणत्वादिः। कालः सायमादिः। अपरे इति कुर्व्वन् मतान्तरे तयोः प्रतिनिध्यभ्यनुज्ञानं सूचयति। सायमादिकालातिपातेऽपि गौणकाले सायं होमादेः करणस्य तत्र तत्रोपदिष्टत्वादिति भाव ॥ ३ ॥

* नाभावस्येति। सौसादृश्ये सत्यपि अभावान्तरमभावान्तरस्य न प्रति-निधिः। स्पष्टमन्यत् ॥ ४ ॥

* उदाहरणार्थमाह। श्रोत्रियाणामिति। स्पष्टम् ॥ ५ ॥

*सत्रेषु स्वामिनि प्रेते कर्त्तृसञ्ज्ञाप्रसिद्धये ।
पुमान् प्रतिनिधातव्यो नासौ स्वामी कथञ्चन ॥ ६ ॥
*यद्येकयजमानेऽपि पत्युः कर्मण्यशक्तता ।
ग्राह्योऽन्योगुणकर्मार्थं नरः कात्यायनाशयात् ॥ ७ ॥
सौवर्णी कुशपत्नी वा पत्न्यभावेऽग्निहोत्रिणः ।
पत्युः प्रतिनिधिं कृत्वा पत्नी नैवं समाचरेत् ॥ ८ ॥

* सौवर्णंकुशपत्नी वा, — इति ग॰ पुस्तके पाठः ।

* सत्रेष्विति । सत्राणि यागविशेषाः । तत्पदार्थास्तु सप्तदशावरैः कर्त्तव्याः । तत्र कस्मिंश्चित् स्वामिनि प्रेते सति सप्तदशत्वसञ्ज्ञाप्रसिद्ध्यर्थमपरः पुमान् प्रतिनिधातव्यः । इतरथा सप्तदशं कार्य्यं लुप्येत । षोडशैव तु कार्य्याणि सम्पद्येरन् । यस्य प्रतिनिहितः नासौ स्वामी । स्वामीति फलस्य भोक्तारमाचष्टे । केवलं ऋत्विक्कर्म्मार्थमेव प्रतिनिधेयः इति भावः ।६॥

* यद्येति । एको यजमानो यस्मिन् तथाविधेऽपि यागे पत्युः स्वामिनो यजमानस्यैवैतत् । कर्म्मणि सपरिकरेऽशक्तता तदनुष्ठानासामर्थ्यं यदा भवति, तदा गुणकर्म्मार्थमङ्गकर्म्मानुष्ठानार्थमन्यो नरः प्रतिनिधेयः । प्रधानन्तु त्यागमात्रं यजमान एव कुर्य्यादिति भावः । ७ ॥

* सौवर्णीति । अग्निहोत्रिणः पत्न्यभावे पत्नीप्रतिनिधितया सौवर्णीं कुशमयीं वा पत्नीमुपादायाग्निहोत्रं कर्त्तव्यम् । पत्न्या तु पत्युः प्रतिनिधिमादाय न होतव्यम् । पत्युः प्राधान्यात् । प्रमाणाभावाच्च । पत्न्याः प्रतिनिधिश्च छन्दोगपरिशिष्टे कात्यायनेनोपदिष्टः । यथा, "मृतायामपि भार्य्यायां वैदिकाग्निं न हि त्यजेत् । उपाधिनाऽपि तत् कर्म्म यावज्जीवं समाचरेत् । रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीम् । ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरच्युतः" इति । ८ ॥

*स्याद्दर्शपौर्णमासेष्टौ चतुर्णामृत्विजां क्रिया ।
चत्वारश्चेन्न लभ्यन्ते त्रयः कुर्युस्त्रयोऽपि चेत् ॥ ९ ॥

सम्भवन्ति न, कुर्यातां द्वावेवेष्टिं कथञ्चन ।
यदि द्वावपि न स्यातामेकेनाप्यृत्विजा सह ॥ १० ॥

यजमानः प्रयुञ्जीत तत्रानाम्नातनिष्कृतिः ।
यद्येकाकी पतिः कुर्यात् स्याद्बौधायननिष्कृतिः ॥ ११ ॥

*ऋत्विजामुक्तसङ्ख्योक्तगुणानाञ्चेदसम्भवः ।
उपेक्ष्यापि गुणान् कामान् सङ्ख्योपादानमिष्यते ॥ १२ ॥

*पतितं वेदशून्यञ्चेद्विना सङ्ख्या न पूर्यते ।
तत्र सङ्ख्यां विहायापि गुणिनामेव सङ्ग्रहः ॥ १३ ॥

---

* दर्शादौ यथोक्तसङ्ख्यानामृत्विजामसम्भवे यत् कर्त्तव्यं तदाह । स्याद्दर्शे-त्यादि त्रिभि । स्पष्टम् ॥ ९ ॥ १० ॥ ११ ॥

* अथ यत्र ऋत्विग्गतसङ्ख्योपादाने तदुक्तगुणानामुपसंग्रहो न भवति, गुणोपसंग्रहे वा सङ्ख्या न पूर्य्यते, तत्र किं सङ्ख्यानुरोधेन गुणा नादरणीयाः अथवा गुणानुरोधेन सङ्ख्यैव नादर्त्तव्या । अस्मिन् संशये निर्णयमाह । ऋत्विजामिति । काम्यन्ते इति कामास्तान् । गुणविशेषणमिदम् । तथा चोभयोपसंहारासम्भवे सङ्ख्याऽऽदरः ॥ १२ ॥

* सङ्ख्यानुरोधेन गुणोपेक्षावद्दोषोपादानमपि स्यादित्याशङ्कायामाह । पतितमिति । पातित्यस्याधिकारविघातकत्वाद्वेदशून्यस्य च कर्म्मानुष्ठानस्यैवासम्भवादिति भावः ॥ १३ ॥

*अतएव च सोमादौ षोडशर्त्विगसम्भवे ।
अल्पीयांसोऽपि तत्सर्वं कर्म कुर्युर्हि तादृशम् ॥ १४ ॥
*कौषीतकिभिराम्नातं कैश्चित् छन्दोगबह्वृचैः ।
तावतामेव सर्वाऽपि दक्षिणा वरणानि च ॥ १५ ॥

अथेदं विचार्यते । व्रीहिभिर्यजेत यवैर्यजेत,—इति विकल्पेन विहितेषूभयेषु मध्ये एकेन व्रीहिद्रव्येण प्रारब्धे कर्मणि तस्य नाश-दोषापहारादिके जाते पश्चाद्यदि व्रीहयो न प्राप्यन्ते, तदा किं वैकल्पिक द्रव्यान्तरं यवरूपमुपादेयमुत व्रीहिसदृशमिति । तत्र मुख्यद्रव्ये सति प्रतिनिध्युपादानस्यायुक्तत्वाद्यवानामुपादाने प्राप्ते सिद्धान्तमाह ।

द्रव्यं वैकल्पिकं किञ्चित् यच्च सङ्कल्पितं भवेत् ।
तदभावे* सदृग्ग्राह्यं न तु वैकल्पिकान्तरम् ॥ १६ ॥

द्रव्यमिति । सदृगिति । व्रीहिसदृश नीवारादि । न तु

---

* तदलाभे, — इति ग॰ पुस्तके पाठ ।

---

* अतएवेति । यत सङ्ख्यानुरोधेनापि पतितादयो नोपादेया अतएवे-त्यर्थ । तत्सर्व्वमिति षोड़शर्त्विक्सम्पाद्य सर्व्वमित्यर्थ ॥ १४ ॥

* यदा स्वल्पीयास ऋत्विज सर्व्वं कर्म्म कुर्व्वन्ति, तदा दक्षिणा वरणञ्च तेषां सङ्ख्यानुसारेण भवति, उत तावतामेव सर्व्वा दक्षिणा सर्व्वाणि च वरणानीत्याकाङ्क्षायां निर्णयमाह । कौषीतकिभिरिति । कैश्चिदिति, तेषां कस्याञ्चिच्छाखायामित्यर्थ ॥ १५ ॥

यवाः। तेन प्रारब्धप्रयोगस्य द्रव्यस्याभावे तत्सदृशमुपादेयं न तु वैकल्पिकमिति। यथारब्धसमापनस्योचितत्वात्। द्रव्यान्तरे चोपचिते तथा न स्यादिति ॥१६॥

यदा पुनर्मुख्यमलभ्यं मत्वा प्रतिनिधिमुपादातुं प्रस्थितेनान्तरा मुख्यं लब्धं तदा प्रतिनिधेः सङ्कल्पितत्वात् मिथ्यासङ्कल्पदोषपरिहाराय मुख्यमनादृत्य प्रतिनिधिरेवोपादेय इति प्राप्ते सिद्धान्तयति।

मुख्यद्रव्यापचारे तत्प्रतिनिध्यभिसन्धिना*।
प्रयुञ्जानस्य मुख्यार्थलाभे ग्राह्यः स एव हि ॥ १७ ॥

मुख्यद्रव्येति। अपचारोऽलाभः। अभिसन्धिः सङ्कल्पः। स मुख्यार्थः। तदुक्तं जैमिनिना। "मुख्याधिगमे मुख्यमागमो हि तदभावात्। मी० ६अ० ३पा० २५सू०"—इति। यथाशक्ति शास्त्रार्थं सम्पादयामीत्येवं शास्त्रार्थविषय एव सङ्कल्पः कर्त्तव्यो न तु प्रतिनिधिस्वरूपं कथितव्यम्। तस्मात् मुख्यप्राप्तौ मुख्यमेवोपादेयम् ॥१७॥

अथ यदाकदाचित्प्रतिनिधिना नियोजने कृते पश्चान्मुख्यमुपलब्धं तदा कृतमपि नियोजनं साद्गुण्याय पुनः खदिरे कर्त्तव्यमिति मन्वानस्योत्तरमाह।

उपात्ते यस्मिन् कस्मिन् वा मुख्येऽपचरिते सति।
अन्यद्रव्यं सजातीयं विजातीयमथापि वा ॥ १८ ॥

---

* मुख्यद्रव्यापचारे तु प्रतिनिध्यभिसन्धिना,—इति ग० पुस्तके पाठः।

उपात्तेति। अत्रोपात्तत्वं पशुनियोजनादिकार्य्याभिनिर्वृत्तिपर्य्यन्तत्वं ग्राह्यं, न ततः प्राक्। तच्च विशेषस्य वक्ष्यमाणत्वात्। कृते नियोजने सर्व्वोऽपि खदिरो निरर्थक एव*। नियोजनार्थं हि तदुपादानम्। तच्च कृतं गुणानुरोधेन नावर्त्तयितव्यम्†। अतो-नादर्त्तव्यः खदिरः। तदुक्तम्। "नानर्थकत्वात्। मी० ६अ० ३पा० ३९सू०"—इति। यस्मिन् कस्मिंश्चिति। न्यायप्राप्तप्रतिनिधौ वाचनिके वा। विजातीयमिति। वाचनिकत्वेन मन्दसदृशमपि॥ १८॥

उपादाय प्रयुञ्जानो यदि पूर्वमवाप्नुयात्।
उपात्तत्वाविशेषेऽपि पूर्वं हित्वा परं श्रयेत्॥ १९॥

उपात्तत्वस्याविशेष उपात्तत्वसामान्येन न तु कार्याभिनिर्वृत्तिरूपेण। तेन च वैलक्षण्यम्। पूर्वं खादिरादि। परं कदरादि। एवं मौद्गादिष्वपि द्रष्टव्यम्॥१९॥

यदा तु प्रतिनिधावुपात्ते तत्तणप्रोक्षणपेषणादिसंस्कारकरणोत्तरमपि मुख्यकार्यीयप्रयोगाच्च प्राक् मुख्यलाभे तु निर्णयमाह।

उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समाप्यते‡॥ २०॥

---

* अनर्थक एव, — इति ङ० पुस्तके पाठः।

† न गुणानुरोधादावर्त्तयितव्यम्, — इति ङ० पुस्तके पाठः।

‡ समापनम्, — इति ङ० पुस्तके पाठः।

उपात्तेति । अचोपात्तत्वं संस्कारकर्मावसानावसायीति ग्रेयम् । ततः प्राक् च पूर्वनिर्णीतत्वात् । इदञ्च गतत्वादाचिप्तमिति केचित् ॥ २० ॥

अथ व्रीह्यभावे प्रतिनिधित्वेन नीवारैः प्रयोगे प्रारब्धे नीवाराणामपहारादिनाऽभावे सति किं प्रतिनिधीभूतनीवारसदृशमुपादेयं उत मुख्यद्रव्यं व्रीहिरूपन्तत्सदृशं वेति । तच यथैव वैकल्पिकेष्वेकस्मिन् प्रवृत्ते तस्यैव तत्प्रयोगाङ्गत्वात्तदपचारे वैकल्पिकान्तरं मुख्यमपि तत्प्रयोगानङ्गत्वान्नोपादीयते । तथैव प्रतिनिधौ प्रवृत्ते तस्यैव तस्मिन् प्रयोगेऽङ्गत्वात् तदपचारे तत्सदृशमेवोपादेयं न तु मुख्यं तत्सदृशं वा तस्य प्रयोगानङ्गत्वादिति प्राप्ते सिद्धान्तमाह ।

मुख्याभावे यदा गौणमुपात्तं सद्विनश्यति ।
तच मुख्योपमं गौणं ग्राह्यं गौणोपमं न तु ॥ २१ ॥

मुख्याभावेति । प्रतिनिधौ नीवारे विनष्टे मुख्यलाभे मुख्यमेव ग्राह्यं, तदलाभे नीवारभिन्नं व्रीहिसदृशमेवेति न तु कदाचिन्नीवारसदृशमित्यर्थः । न हि नीवाराणामङ्गत्वमस्ति । श्रुतिलिङ्गादिप्रमाणाभावात् ॥ २१ ॥

यदा पुनरष्टशफपरिमाणाय * शेषकार्येभ्यश्चापर्याप्ताः पुरोडाशजातिमात्राभिव्यक्तिसमर्था व्रीहयोऽल्पेऽपि लभ्यन्ते, तदा तैरेव पुरोडाशः कर्त्तव्य उत नीवारैरिति संशयः । तथाष्टशफपरिमाणस्य

* परिमाणस्य, – इति क० पुस्तके पाठः ।

भूयसां शेषकार्याणां चानुग्रहाय श्रीहिशास्त्रमेकं* बाधितव्यम्। किञ्च प्रतिनिध्युपादाने तस्य नात्यन्तबाधोऽपि। नीवारोपादाने हि शेषकार्याणामत्यन्तलोपः स्यात्। अतोनीवारा एवोपादेयाः इति पूर्वपक्षे प्राप्ते सिद्धान्तमाह।

संस्कारााणामयोग्योऽपि मुख्य एव हि गृह्यते।
न तु संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः॥ २२॥
श्रुवत्तमात्रपर्याप्तव्रीहिद्रव्यस्य सम्भवे।
पुरोडाशमहत्त्वार्थं न नीवारपरिग्रहः॥ २३॥

संस्कारेति द्वाभ्याम्। संस्कारास्तुषणमहत्त्वादयः। अयोग्यत्वञ्चा-ल्पतया। अन्योनीवारकदरादिः॥२२॥२३॥

यदा तु प्रधानयागाक्षमा व्रीहयोलभ्यन्ते, तत्रापि पूर्ववत्प्रति-निध्यनुपादानशङ्कां परिहरति।

मुख्ये कार्यासमर्थे तु लब्धेऽप्येतस्य नादरः।
प्रतिरूपमुपादाय शक्तन्तेन प्रयुज्यते† ॥ २४॥

मुख्येति। एतस्य मुख्यस्य। शक्तं समर्थम्। प्रतिरूपं प्रतिनि-धिम्। अनादरोऽपग्रहणम्॥२४॥

अथ यत्र द्रव्यगुणविरोधस्तत्र कथम्‡। तद्यथा। नैर्ऋतः

---

* व्रीहिशास्त्रं, — इति क॰ पुस्तके पाठः।

† शक्तमेवोपयुज्यते, — इति ग्रन्थान्तरीयः पाठः।

‡ अथ यत्र गुणद्रव्ययोर्विरोधस्तत्र कथम्, — इति ङ॰ पुस्तके पाठः।

परिहृत्यै* कृष्णव्रीहीणां नखनिर्भिन्नानामिति । तत्र संशयः । ये व्रीहयः सन्ति मुख्यास्ते अकृष्णाः । ये च नीवारास्ते कृष्णाः । तत्र किं मुख्यद्रव्यमनादृत्य गुणानुरोधेन नीवारोपादानं उत कृष्णं गुणमनादृत्य मुख्यद्रव्यं व्रीहय इति । तत्र व्रीहीणामुपादाने कृष्णगुणहानिः सर्वथा, नीवाराणामुपादाने तस्यानुग्रहो व्रीहिशास्त्रमपि किञ्चिन्न्यूनं सम्पादितं भवति । अतः कृष्णानां नीवाराणामुपादाने प्राप्ते आह ।

कृष्णव्रीह्यादिके द्रव्ये शिष्टेऽपचरिते सति ।
ग्राह्योऽकृष्णोऽपि सन् व्रीहिर्नाव्रीहिः कृष्णगुण्यपि॥२५॥

कृष्णेति । अपचरितं अभावः । अव्रीहिर्नीवारादिः ॥२५॥

अथ मुख्यद्रव्यालाभे सुसदृशं ग्राह्यमिति प्राक् प्रपञ्चितम् । तत्र सुसदृशलाभे मन्दसदृशं न ग्राह्यम् । तदलाभे तु मन्दसदृशमपि । क्वचित्तु सुसदृशलाभेऽपि वचनान्मन्दसदृशमपि गृह्यते यथा पूतिकाः। तत्रोभयोः परिज्ञानार्थमाह ।

कार्यरूपैस्तथावर्णैः क्षीरैः पुष्पैः फलैरपि ।
गन्धैरसैः सदृग् ग्राह्यं पूर्वाभावे† परम्परम् ॥ २६ ॥

कार्यैरिति । यत्र बहुधर्माणां बहुत्वस्तत्र सुसदृशलमन्यत्र मन्द-

---

* परिहृत्यै,— इति ङ॰ पुस्तके पाठः ।

† पूर्वालाभे,— इति ख॰ पुस्तके पाठः ।

सदृशत्वम्। अथ वा यत्र पूर्वपूर्वधर्मस्थितिः, तत्र सुसदृशत्वमन्यत्र मन्दसदृशत्वम्। अतएवाह। पूर्वेति। पूर्वस्य कार्य्यादिकस्य। परं उत्तरम्। कार्य्यैरिति पुरोडाशादिरूपकार्यनिष्पादकसमानैरित्यर्थः ॥२६॥

प्रतिनिधौ सुसदृशं ग्राह्यमित्युक्तम्। तच्च रूपादिना ज्ञातव्यम्। तदेव विशदयति।

हविर्व्रैहिमयं कार्यं यद्वा यवमयं भवेत्।
तयोरभावे श्यामाकानीवारा वा हविर्भवेत् ॥ २७ ॥

हविरिति। यत्र सामान्येन यद्पुरोडाशचोदना, तत्र व्रीहीन् यवान् वा प्रतीयात्। तदाह कात्यायनः। व्रीहीन् यवान्वा हविषीति। यत्र विशेषतोद्रव्यचोदनाऽस्ति तत्र नेदं शास्त्रम् *। यथा, गावेधुकं चरुं निर्वपेदिति। तथा, व्रीहियवालाभे सुसदृशं श्यामाकनीवाररूपमेव नान्यत्। अप्रकान्तविषयमिदम्। अतस्तदेव ग्राह्यम् ॥२७॥

तस्याप्यलाभे मन्दसदृशमाह।

वेणुयवा गोरसं वा कन्दं मूलं फलं जलम्।
सत्यं वा हविरेतेषां यथासम्भवमाहरेत् ॥ २८ ॥

वेणुयवा इति। गोरसं दधिदुग्धादि। अनिषिद्धं कन्दादि हविः। फलं यज्ञियवृक्षीयम्। जलं वृक्षकषायः। सारो वा। सर्वालाभे वाचनिकं प्रतिनिधिमाह। सत्यमिति। सत्यं सत्यभाषणम्। पूर्वाभावे परम्परमित्यस्यानुवृत्त्यर्थमाह। यथेति ॥२८॥

* यत्र विशेषतो द्रव्यचोदना नास्ति तत्रेदं शास्त्रम्, — इति क॰पुस्तके पाठः।

ईषदपि सादृश्याभावेन प्रतिनिध्यसंभवादाह ।

प्रतिनिध्यन्तरं सत्यं विज्ञेयं हविरत्यये ।
प्रधानदेवतोद्देशात् सन्त्यजेत् सत्यमात्मना* ॥ २९ ॥

प्रतिनिध्यन्तरमिति । वचनात् प्रतिनिधित्वमस्य । अतः प्रतिनिध्यन्तरं वक्ष्यमाणं वाचनिकप्रतिनिधित्वं न तु न्यायप्राप्तम् । सत्यस्य यागसाधनत्वमाह । प्रधानेति । तथाचाग्नयेऽग्नीषोमाभ्यामिदं सत्यं न ममेति प्रयोगः ॥२९॥

वेणुयवादीनामुपलक्षणार्थत्वमाह ।

अतोऽन्यदपि वा ग्राह्यं सदृशं धान्यमाचकम् ।
न ग्राह्याः सर्वदा माषावरटाणुककोद्रवाः† ॥ ३० ॥

अत इति । अत उक्तेभ्योऽन्यत् । सदृशं मन्दसदृशं । मौद्गं चरुं निर्वपेदिति श्रुतम् । तत्र मुद्गाभावे सुसदृशानां माषाणां प्रतिनिधित्वेन प्राप्ते तदर्थं सुसदृशमपि निषिद्धं न प्रतिनिधेयमित्याह ।

न ग्राह्या इति । सर्वदा सुसदृशालाभे सुसदृशा अपि माषाः मुद्गाभावे न प्रतिनिधेया इति भावः । अयज्ञिया वै माषा अयज्ञिया वरटा इति तेषामयज्ञियत्वकथनेन तन्निषेधात् । तथा, व्रीह्यभावे अणवः कोद्रवाद्ययज्ञियाः न प्रतिनिधेयाः ॥३०॥

---

* सत्यमात्मनः, — इति क॰ पुस्तके पाठः ।

† न ग्राह्यं सर्व्वदा माषचणकोदारकोद्रवम्, — इति ग॰ पुस्तके पाठः ।

प्रकारान्तरेण सुसदृशत्वमुपदेशयितुमाह।

यदा व्रीहियवाभावे तुषतण्डुलयोगिनीः।
ओषधीः परिगृह्णीयादणुकोद्रववर्जिताः॥ ३१॥

यदेति। तुषतण्डुलवत्त्वेन साधर्म्यं व्रीहियवाभावे ओषधीषु ज्ञातव्यम्। अणुकोद्रवाणान्तु तत्त्वेऽपि निषिद्धत्वाच्च प्रतिनिधियहणम्॥३१॥

अधुना तेष्वेव सुसदृशत्वं प्रकारान्तरेणाह।

ग्राम्यानां वा भवेद्ग्राम्यमारण्यानामरण्यजम्।
यवाभावे तु गोधूमास्ततोवेणुयवादयः॥ ३२॥

ग्राम्याणामिति। उदाहरणार्थमाह। यवाभावेति। यवसमीपद्रव्याभावे। सामीप्यवर्णाकृत्यादिषु सामीप्यं बलवदिति न्यायात्। तस्मात्, यवाभावे व्रीहय एव ग्राह्या इति। गोधूमाभावे वेणुयवाभावे ओषधयः। ग्राम्याणां प्रतिनिधिः ग्राम्यः। आरण्यानामारण्यः। तदभावे तुषतण्डुलयोगिन्य ओषधयः, सामीप्यात्। तस्याभावे गोधूमाः। आकृतिसाम्यात्। तदभावे वेणुयवादयः। जातिसाम्यात्। समीपस्य ग्राम्यत्वे सति चोदनागतयागसाधनत्वम्। कृतकल्पयोः कृतं बलवदिति न्यायाच्च। एवं च, तुषतण्डुलयोगित्वग्राम्यत्वमप्यनुगृहीतं भवति। प्रपञ्चितञ्चैतदाश्वलायनसूत्रभाष्ये। गोधूमानामहविष्ट्वं चोक्तं सतो,—

तिलमुद्गादृते शैव्यं सखे गोधूमकोद्रवाविति।

आचारलवणं क्षौम्यमिति धर्मसूत्रम् । गोधूमानां तु वारे-
गणान्तःपातित्वादक्षौम्यत्वमिति । शातातपोऽपि,—

"निष्पावाराजमाषाय गोधूमायणकास्तथा ।
वर्जनीयाः प्रयत्नेन प्रियङ्गु वरटा अपि"—इति ॥

यदा तु यवैः प्रक्रान्ते कर्मणि यवानामपचारे तयोरभावे इति
पूर्वोक्तवचनाच्छ्यामाकादीनां गौणद्रव्यतया प्राप्तौ तत्परिहारार्थमिदं
वचनम् । ग्राम्याभावे आरण्यायाह्या इत्यत आह । तत इति । तत-
आरण्याग्राम्याणामित्युक्तं भवति ॥३२॥

फलं याज्ञिकवृक्षस्य तत्पचमथवा * जलम् ।
छन्दोगगृह्यवचनाज्जुहुयाद्धविरत्यये ॥ ३३ ॥

फलजलयोर्होमसाधनत्वमुक्तम् । एतदेव निर्वक्ति । छन्दोगेति ।
यज्ञियवृक्ष उदुम्बरादिः, तत्फलम् । जलं तत्कषायः ॥३३॥

क्वचिद्विषयेऽपि सादृश्याभावे वाचनिकं प्रतिनिधिमुदाहरति ।

आग्रयणे न लभ्यन्ते श्यामाकाश्चेत्कदाचन ।
श्यामाकप्रस्तरस्तत्र कार्यो बौधयनाश्रयात् ॥ ३४ ॥

आग्रयण इति । प्रस्तर इति । प्रकृतेष्टौ श्यामाकतृणैः प्रस्तरः
कार्य इत्यर्थः ॥३४॥

यदा त्वग्निहोत्रार्थं पयोन विन्देत, तदाऽपि वाचनिकप्रतिनि-
धिक्रमेण निर्वहणीयमिति माध्यन्दिनश्रुतिसम्मतक्रममाह ।

---

* तत्पत्रमथवा,—इति क॰ पुस्तके पाठः ।

यद्यग्निहोत्रहोमार्थं पयोन स्यात् कदाचन ।
तदा व्रीहियवौ ग्राम्यमौषध्यन्तरमेव वा ॥ ३५ ॥
आरण्यौषधयोर्वृक्षफलाभ्याय इति क्रमात् ।
होमं कर्तुमुपादेयं पूर्वालाभे परम्परम् ॥ ३६ ॥
तेषामलाभे जुहुयाच्छ्रद्धया सत्यमात्मनः ।
माध्यन्दिनश्रुतौ सर्वं विस्पष्टमिदमीरितम् ॥ ३७ ॥

यदीति। पूर्वोपात्तक्रमस्य व्रीहियवयोः प्रतिनिधित्वेन विवक्षा, अत्र तु पयस इति न पुनरुक्तिः ॥३५॥३६॥३७॥
एकदेशिमतमाह ।

मुख्यमेव हविस्तोयं न तु गौणमुपेयते ।
पयसा तुल्यकल्पन्तदिति दामोदरोऽब्रवीत् ॥ ३८ ॥

मुख्यमिति । व्रीहियवशास्त्रवत्तुल्यविकल्प इति भावः ॥३८॥
मुख्याभावे प्रतिनिधिप्रकारमेकदेशिमतेनाह ।

सायं होमो न लब्धश्चेत् तस्यां रात्रावभोजनम् ।
प्रातर्होमोन लब्धश्चेत्तदहर्भोजनं त्यजेत् ॥ ३९ ॥
तावता होमसिद्धिः स्यात् तत्प्रायश्चित्तमिष्यते ।
छन्दोगानां हि केषाञ्चिद् गृह्ये कथितमीदृशम् ॥ ४० ॥

सायमिति। सायंहोमः सायंहोमसाधनम्। एवं प्रातर्होमसाधनं न लब्धं चेदुपवासस्य तत्कार्यकारित्वमित्याह। तावतेति । वैश्वान-

रेष्टिवदस्य प्रायश्चित्तरूपत्वमाह । तदिति । एकदेशित्वमस्योपदिशति । छन्दोगानामिति । गृह्ये गृह्यसूत्रे गौणानादरेण । केषाञ्चिदिति कस्याञ्चिच्छाखायामित्यर्थः ॥३८॥४०॥

यत्राज्यचोदना, तत्र घृतं प्रतीयते । तदुक्तम् । घृतमाज्ये लिङ्गादिति । तत्र घृताभावे सुसदृशमुपादेयमिति पूर्वन्यायतः सिद्धम् । सुसदृशानि च मतद्वयेनाह ।

घृताभावे भरद्वाजबौधायनमुनी पृथक् ।
आहतुस्तत्र बौधायनोक्तमादौ वदिष्यते ॥ ४१ ॥

घृताभावे इति । स्पष्टम् ॥४१॥

तदेवाह ।

घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् ।
आजं वा तदलाभे तु साक्षात्तैलं ग्रहीष्यते ॥ ४२ ॥
तिलाभावे ग्रहीतव्यं तैलं जर्तिलसम्भवम्* ।
तदभावेऽतसीस्नेहः कौसुम्भः सर्षपोद्भवः ॥ ४३ ॥

घृतार्थे इति । गोघृतमिमिति । मह्हीनां पय इति लिङ्गात् । तैलमिति साक्षात्तिलस्नेहः । जर्तिला आरण्यतिलाः । अतसी यवसी† ॥४२॥४३॥

---

* तैलजं तिलसम्भवम्, — इति क० पुस्तके पाठः ।

† यवसाः, — इति ङ० पुस्तके पाठः ।

वृक्षस्नेहोऽथवा ग्राह्यः पूर्वाभावे परः परः।
तदभावे यवव्रीहिश्यामाकान्यतमोद्भवम् ॥ ४४ ॥
पिष्टमालोड्य तोयेन घृतार्थे योजयेत् सुधीः।
वृक्षतैलेषु पुन्नागनिंबैरण्डोद्भवं त्यजेत् ॥ ४५ ॥

वृक्षस्नेहो यज्ञियवृक्षनिर्यासः। तदभाव इति पूर्वोक्ताभावे। वृक्षस्नेहस्य यज्ञियत्वविशेषणार्थमाह। वृक्ष इति ॥४४॥४५॥

अग्निसेवार्थे भरद्वाजमतं दर्शयति।

भरद्वाजोऽन्यथा प्राह घृतप्रतिनिधिं मुनिः।
गव्याज्याभावतश्छागमहिष्यादेर्घृतं क्रमात् ॥ ४६ ॥
तदभावे गवादीनां क्रमात् क्षीरं विधीयते।
तदलाभे दधि ग्राह्यमलाभे तैलमिष्यते ॥ ४७ ॥
यत्राद्यमञ्जनाद्यर्थं न लभेत कथञ्चन।
तत्र क्षीरमनादृत्य साक्षात्तैलं ग्रहीष्यते ॥ ४८ ॥
यत्र मुख्यं दधि क्षीरं तत्रापि तदभावतः।
अजादेः क्षीरदध्यादि तदभावे तु गोघृतम् ॥ ४९ ॥
मुख्यासन्नोऽथवा ग्राह्यः कार्यकारणसन्ततौ।
अतएव घृताभावे पूर्वं दधि ततः पयः ॥ ५० ॥

भारद्वाज इति। कश्चित् घृताभावे तैलमेवोपादेयं न दध्यादि इत्याह। यत्रेति। आद्यमाज्यम्। यथा यूपाञ्जनादौ। एवं दध्यभावे

प्रतिनिधिरुपादेय इत्याह। यद्वेति। अधुना प्रकारान्तरेण सुसदृशमाह। मुख्यासन्न इति। अथ वा, येन येन प्रकारेण मुख्यस्य कार्यकारणसन्ततौ योमुख्यासन्नः, स एव तत्प्रतिनिधिः। निदर्शयति। अतएवेति। दध्न एवासन्नत्वादाज्यस्य प्रतिनिधित्वम्। पयसोव्यवहितत्वात् ॥४६॥४७॥४८॥४९॥५०॥

अधुना सान्नाय्ये प्रतिनिधिश्चिन्त्यते।

सान्नाय्यञ्चेन्न लभ्येत पुरोडाशं प्रकुर्वते।
पुरोडाशस्य चालाभे तत्रोपादीयते घृतम् ॥ ५१ ॥

सान्नाय्येति सार्द्धपञ्चभिः। सान्नाय्यमिति इन्द्रदेवताकदधिपयोरूप* हविषोनामधेयम्। न लभ्येतेति। प्रवृत्तेः प्राक्, ततश्च नाशापहारादौ वा। पुरोडाशमिति। निर्वापपूर्वक ऐन्द्रः पुरोडाशः। स चायं प्रतिनिधित्वेन प्रतिज्ञानात्सान्नाय्यधर्मको भवतीत्युक्तमन्यत्र। तस्याप्यलाभे प्रतिनिध्यन्तरमाह। घृतमिति। इदञ्च सान्नाय्यस्यैव प्रतिनिधिः न पुरोडाशस्य। पूर्वस्य प्राशस्त्यज्ञापनार्थं तस्याप्यलाभ इति ॥५१॥

अथ सायंदोहविनाशे विशेषमाह।

सायन्दोहो विनष्टश्चेत् प्रातर्दोहं विभज्य तु।
तत्रैकं भागमातञ्च† दधियागे नियोजयेत् ॥ ५२ ॥

---

* पयोदधिरूप, – इति क॰ पुस्तके पाठः।

† भागमातञ्च, – इति क॰ घ॰ पुस्तकयोः पाठः।

आतञ्चेति । आतञ्चनसद्भावे प्रातर्दोहविशेषेण । अभावे * वक्ष्यमाणद्रव्यैः ॥५२॥

पयामपाकरणं श्रूयते । तत्र पयामभावे एकस्या द्विगुणा वा सत्त्वे पूर्वोक्तपुरोडाशादिकं भविष्यतीत्याशङ्कापरिहारायाह ।

गवां सान्नाय्यदोग्ध्रीणां षडादीनामसम्भवे ।
द्विर्दुह्यन्तेऽत्र गास्तिस्र एकां षट्कृत्व एव वा ॥ ५३ ॥

गवामिति । त्रित्वसत्त्वे † प्रतिगवं द्विर्दोहनं, एकस्याः ‡ षट्कृत्वोदोहनमिति विशेषः ॥५३॥

आतञ्चनापचारे तत्प्रतिनिधीनाह ।

उच्छेषणापचारे तु मेध्यैरोषधितण्डुलैः ।
सान्नाय्यातञ्चनं कुर्यादोषधीभिस्तदत्यये ॥ ५४ ॥

उच्छेषणापचारेति ॥५४॥

अथ शाखामधिकृत्य श्रूयते । यज्ञ§पर्णामाच्छायामिति । पुनश्च श्रूयते । प्राग्दोहीमिति । तत्र संशयः । या प्राग्दोहीणी सा पर्णादिगुणरहिता या च पर्णादिगुणवती ‖ सा प्राग्दोहीगुणरहिता,

---

* यत्राभावे, — इति क० पुस्तके पाठः ।

† त्रित्वसत्त्वे, — इति ख० पुस्तके पाठः ।

‡ एकस्यां, — इति ग० पुस्तके पाठः ।

§ यज्ञ, — इति घ० पुस्तके पाठः ।

‖ इत्यमेव पाठ सर्वत्र । गुणवती, — इति तु भवितुमुचितम् ।

तदा किम्बलीय इति। तत्र मुख्यसमवेतत्वात्पर्णादिगुणादर इति पूर्वपक्षनिराकरणायाह ।

प्रागुदीच्यादिका* शाखा बहुपर्णादियोगिनी ।
नास्ति चेत् तत्र पर्णादिगुणान् हित्वा दिगादरः ॥५५॥

प्रागुदीचीति । स्पष्टम् ॥५५॥

इदानीमिदं विचार्यते। किमवत्तस्योद्धृतस्य द्व्यवदानमात्रस्य नाशे हविरन्तरमुत्पाद्यम्, उत तस्मादेव हविःशेषात्पुनरवेद्यमिति । तत्रैकदेशिमतमाह ।

अवदानविनाशे तु तस्यैव हविषः स्रुतात् ।
मध्यात्पूर्वार्द्धतोग्राह्यं नान्यदित्याश्वलायनः ॥ ५६ ॥

अवदानेति । नान्यदिति हविरन्तरं नोत्पादनीयमिति । सिद्धान्तस्तु पृथगेकदेशिमतोत्घाटनेनैवोक्तः । स यथा । तत्र चेदं कात्यायनसूत्रम्। अवत्तनाशे ऽन्यत्, गुणानुग्रहात्। अस्यार्थः। अथावत्तस्य पुरोडाशचर्वादेः सकाशात् पृथक् कृतस्यावदानद्वयमात्रस्य नाशे अन्यद्धविरुत्पादनीयं यागार्थम् । कुतः । गुणानुग्रहात् । एवं कृते मध्यपूर्वार्द्धावदानरूपेण गुणेनाङ्गेन साधनभूतेन यागोऽनुगृहीतो-भवति । शेषात् पुनरवदाय यागः क्रियते चेत्, तदा तस्य पूर्वार्द्ध-निकृन्तनात् विगुण एव यागो भवेत्। कथम् । द्व्यवदानस्यैव या-

---

* प्रागुदीच्यागता, — इति क० पुस्तके पाठ ।

गार्थत्वपक्षे तस्य विनष्टत्वादवशिष्टस्यायागार्थत्वात् । समस्तपुरोडाशस्य यागार्थत्वेऽपि द्व्यवदाननाशेन * तस्य विकलत्वात् । न चासौ यागो-विगुण इष्यते । तस्माद्धविरन्तरमेवोत्पाद्यमिति ।

यत्पुनरुच्यते, सकलस्य पुरोडाशस्य हविष्ट्वमिति तत्र पुरोडाशस्य यौ मध्यपूर्वार्द्धावयवौ तदपादानकन्तदवयवभूतमवदानद्वयं यागसा-धनन्तन्नाशे मध्यपूर्वार्द्धावयविनि सकलरूपे पुरोडाशे योमध्यावयवः पूर्वार्द्धावयवस्यापादानभूतः स पूर्वावदानापेक्षयाऽवयवी तस्मिन्न-वदानोद्धरणेन विनष्टेऽपि † मध्योत्तरस्य पूर्वार्धोत्तरस्य ‡ अवदा-नद्वयोपलक्षणत्वेन विद्यमानत्वात्तत एव पुनरवदेयम् । ननु कृत्स्नस्य मध्यपूर्वार्द्धे अवदेये न विकलस्येति चेत् । तन्न । शास्त्रार्थत्वात् । मध्यादवद्यतीत्येतावदेव श्रूयते । न तु सकलस्य पुरोडाशस्य मध्या-दिति । तस्मात् पूर्वशेषादेवावदेयम् ।

तन्न । गुणहानौ तु शेषभावात् § । हविषो मध्यपूर्वार्द्धभागस्य यागं प्रति गुणभूतस्य यागसाधनभूतस्य हानौ नाशे सति न पूर्वशेषादवदेयम् । कुतः । शेषभावात् । शेषत्वादेव । तस्या-वशिष्टस्य शेषकार्य्यार्थत्वादित्यर्थः । कृत्स्नस्य हि पुरोडाशस्य यो-मध्यदेशस्तदपादानकोयस्तस्योपरितनोऽङ्गुष्ठपर्वमात्रावयवः सोऽव-

---

* चावदाननाशेन, — इति क० पुस्तके पाठः ।

† तस्मिन्नवदानोद्धरणविनष्टेऽपि, — इति क० पुस्तके पाठः ।

‡ पूर्वार्द्धोत्तरस्य, — इति ख० पुस्तके पाठः । ममतु, मध्यान्तरस्य पूर्वा-र्द्धान्तरस्य, — इति पाठः प्रतिभाति ।

§ इदं सूत्रमिति प्रतिभाति ।

दातव्यः । अन्यस्त्ववदेयस्यापादानभूतः । न चासाववदातव्यः । स लिङादिशेषकार्य्यार्थः । अतोनासौ हविः । यत्तु हविस्तद्विनष्टम् । तद्विनाशे च हविरन्तरमेवोत्पाद्यम् । यदा च ध्रुवदानस्यैव यागार्थता, ततस्तद्विनाशे शेषस्य कार्य्यार्थत्वाभावात् द्रव्यान्तरं यागार्थमुत्पाद्यम् । यदाऽपि समस्तपुरोडाशसाध्योयागस्तदाऽपि ध्रुवदाननाशे तस्य विकलत्वादविकलं हविरन्तरमुत्पाद्यम् । तस्मात् साधूक्तमवत्तनाशेऽन्यदिति । तदुक्तम् ।

संस्काराणां पुरोडाशे ध्रुवदानं प्रयोजकम् ।

तद्विनाशाच्च नष्टास्ते नावदेयमतस्ततः ॥

गृहीतौ मध्यपूर्वार्द्धौ तौ विनष्टावुभावपि ।

अतः शेषस्य शेषत्वात् प्रधानत्वं न युज्यते इति ॥

अतएवाश्वलायनग्रहणं कुर्वन्नेकदेशिमतमिति सूचयति । अन्यहविषोऽसम्भवे तु वक्ष्यते ।

येषां केषां चिदन्येषां हविषामप्यसम्भवे ।

सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतादिति * ॥५६॥

अथ श्रूयते । यज्जुह्वां गृह्णाति तत्प्रयाजेभ्योयदुपभृति गृह्णाति तत्प्रयाजानुयाजेभ्य इति । तत्रैकस्योभयोर्वाऽऽज्यस्य नाशे किं प्रतिनिधेयमिति सन्देहे आज्यस्याज्योराज्यान्तरं पाद्यमिति प्राप्ते सिद्धान्तयति ।

जुहूपभृद्‌धृते नष्टे ध्रौवाज्यस्य सकाशतः ।

आज्यग्रहणमाचष्टे कात्यायनमहामुनिः ॥ ५७ ॥

---

* इयं मूलकारिकैव प्रमाणतयोपन्यस्ता । इति वस्तुते इत्यन्वयः ।

जुहु इति। तथा च कात्यायनः। जुह्वदुष्टे पुनर्ग्रहणं सर्वे ध्रुवाघादाय ततोयज्ञः प्रभवतीति श्रुतिः ॥५७॥

अथ प्रसङ्गादाह।

पश्चावुपाकृते याते मृते वाऽस्मिन्नकामनः।
अन्यन्तद्रूपतद्वर्णंतद्वयस्कमुपावहेत् ॥ ५८ ॥

पश्चाविति। उपाकृते उपाकरणे कृते सति याते पलायिते मृते वा। अन्यं पश्वन्तरमुपावहेत् आलभेत। तदुक्तं कात्यायनेन। पशुश्चेदुपाकृतः पलायेत वायवे तमनूद्दिश्यान्यन्तद्वर्णं तद्वयसमालभेतेति। अकामत इति। पलायनोत्तरं महता प्रयत्नेन अन्वेषितव्यः। ततोऽप्यलाभेऽन्यमालभेतेति भावः। मरणे तु विशेषमाह कात्यायनः। प्राक् प्रयाजेभ्यश्चेन्म्रियेतान्यमालभेत। पूर्वस्य वपां दक्षिणाग्नौ जुहुयात् सोमस्येन्माजीवैद्वेजानाः पितर इत्यादि ॥ ५८॥

पश्वन्तरोपादाने कृते यदि पूर्वालम्भः* स्यात्तदा किं कुर्यादित्यत आह।

तस्मिन्नुपाहृते पूर्वः पशुः सम्प्राप्यते यदा।
नाद्रियेत तदा पूर्वमुपालम्भः परस्य वा ॥ ५९ ॥

तस्मिन्निति। पूर्वं पशुं नाद्रियेत। परस्योपालम्भः। पूर्वस्योपा-

* पूर्वोपालम्भः, – इति ख० पुस्तके पाठः।

लम्भो वायवेऽनुपालम्भो वा । तदुक्तम् । उपालभ्यं तं वायवे तम-नादरणं वेति ॥५९॥

पशौ पलायिते तस्मिन्* अनुपलभमाने च प्रतिनिधिमाह ।

पशुप्रतिनिधी ज्ञेयौ गौरश्वश्च परस्परम् ।
पशुयागप्रसिध्यर्थे छागमेषौ परस्परम् ॥ ६० ॥

पशुरिति । अश्वगवयोरन्योन्यं प्रातिनिध्यं सामान्यात् । एवं छागमेषयोः ॥६०॥

ननु सामान्यं प्रतिनिधावुपादेयमिति । ततश्च† छागाभावे मेषापेचया सामान्यात्कार्याच्छागोपालम्भितव्य इति प्राप्ते आह ।

कूटकर्णस्तथा काणः खण्डोवण्डाः‡स्त्वपन्नदन् ।
श्रोणः सप्तशफश्चेति न स्यात्प्रतिनिधिः पशोः ॥ ६१ ॥

कूट इति द्वाभ्याम् । कूटकर्णश्छिन्नकर्णः । काण एकाक्षः । खण्डोऽपुच्छः । वण्डोभग्नपृष्ठः । अपत् एकेन द्वाभ्यां त्रिभिर्वा चरणैर्हीनः । अदन् अदन्तः । श्रोणोऽमुष्कः । सप्तशफः एकेन शफेन न्यूनः । तथा एकशफाश्चाकारचरणाद्यः । एते मुख्या अपि यथो-क्तच्छागाभावे नोपादेयाः, किन्तु मेष एवोपादेयः ॥६१॥

तत्र हेतुमाह ।

---

* तस्मिन्, — इति नास्ति ङ० पुस्तके पाठः ।

† तत्र, — इति क० पुस्तके पाठः ।

‡ मण्ड, — इति क० पुस्तके पाठ । एवं टीकायामपि ।

अभक्ष्यत्वादेकशफो होमकार्येषु न क्वचित् ।
ग्राह्यः प्रतिनिधित्वेन सत्याषाढनिरूपणात् ॥ ६२ ॥

अभक्ष्यत्वादिति । दुष्टत्वादिति भावः । तदाह कात्यायनः । शिष्टभक्ष्यप्रतिषिद्धं दुष्टमिति ॥६२॥

सत्याषाढमतमुक्का भरद्वाजमतमुपन्यस्यति ।

भरद्वाजस्तु नातीव निषिद्धं द्रव्यमाहरेत् ।
सामान्यचोदितं वाऽपि विशेषे विनिवारितम् ॥ ६३ ॥

भरद्वाज इति । अतीव निषिद्धम्, अयज्ञियामाषा इत्यादि । अधिकरणमवतारयति । सामान्येति । यथा । अग्नीषोमीयपशुमालभेतेत्यादि सामान्येन श्रुतम् । क्वापि कुत्रापि विशेषशास्त्रे विनिवारितं निषिद्धम् ॥६३॥

विचारविषयमाह ।

अनिषिद्धविशेषत्वमलब्धश्चेज्जिघृक्षया ।
तत्र जात्यन्तरं किं तत्सदृशं गृह्यतामुत ॥ ६४ ॥
तज्जातीयो विशेषो वा निषिद्ध इति संशये * ।

अनिषिद्धेति । अनिषिद्धोवाक्येन विशेषो यस्मिन्, तादृशमलब्धेदित्यर्थः । संशयमाह । जिघृक्षयेति ॥६४॥

पूर्वोक्तं सत्याषाढमतं पूर्वपक्षीकृत्योत्तरपक्षमाह ।

---

* संशय, – इति क० पुस्तके पाठ ।

वरञ्जात्यन्तरं तत्र निषिद्धोऽपि स्वजातिमान् ॥ ६५ ॥
अकूटच्छागालाभे स्याच्छागः कूटोऽपि न त्वविः ।
कूटच्छागाद्यभावे स्यान्मेषादिरिति भाष्यते ॥ ६६ ॥

वरमिति । मेषविषयमाह । कूटेति ॥ ६५ ॥ ६६ ॥
एवमेव न्यायमोषध्यादिद्रव्येष्ववतारयति ।

तस्माद्द्रव्यान्तराणाञ्च निषिद्धानामशेषतः ।
धान्यकाष्ठतृणादीनामादानं युज्यते क्वचित ॥ ६७ ॥

तस्मादिति । धान्य मौद्गादिषु । काष्ठ पलाशेषे । तृणं बर्हिषि ।
एतन्मतस्याखरसादाह । क्वचिदिति । ६७॥
पश्ववदानहानौ पूर्वोक्तन्यायेनान्यपश्वालम्भप्राप्तौ सिद्धान्तमाह ।

प्राप्तं पश्ववदानानां यावतामवलोपनम् ।
तावत्कृत्वोघृतं ग्राह्यमपि सर्वविलोपने ॥ ६८॥

प्राप्तमिति । ॥ ६८॥
अन्याचार्यसिद्धान्तमाह ।

अन्ये पश्ववदानानां निःशेषमवलोपने ।
तत्राज्यं न ग्रहीतव्यं पशुरेवेति मन्वते ॥ ६९ ॥

अन्ये इति । एकस्य द्वयोस्त्र्यादीनां नाशे चाज्येनावदेयं
सर्वावदाननाशे पश्वन्तरमेवेति मन्यन्ते ॥ ६९॥
वदथमाचनाशे विशेषमाह ।

हृदयस्य विनाशे तु पशुमन्यं प्रयोजयेत्।
यद्वा कातीयसूत्रेण तत्स्थानेऽपि घृतं भवेत् ॥ ७० ॥

हृदयस्येति । हृदयं पशुरिति वचनात् । कात्यायनमतमुपन्य-
स्यति। यद्वेति । तत्स्थाने हृदयस्थानेऽपि । तथाचाह कात्यायनः।
सर्वेषां वाऽऽज्यस्य जुहुयादर्थवादमात्रं पशुवचनम् ॥७०॥

वपानाशे विशेषमाह ।

पश्चाद्वृत्तिर्वपानाशे न त्वाज्यं तत्र गृह्यते ।
भरद्वाजमतादन्ये तत्राप्याददते घृतम् ॥ ७१ ॥

पश्चाद्वृत्तिरिति । भरद्वाजमतेनाह । भरद्वाजेति ॥७१॥

यत्र यत्र पश्वन्तरालम्भो विहितोऽस्ति तत्र पूर्वपशोः प्रतिपत्त्यर्थ-
माह ।

यदा पश्वन्तरालम्भपक्षोऽत्र परिगृह्यते।
नष्टशेषं पशोर्भागमुत्करे सन्त्यजेत्तदा ॥ ७२ ॥

यदेति ॥७२॥

उक्तार्थमुपसंहरति ।

येषां केषाञ्चिदन्येषां हविषामप्यसम्भवे ।
सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतात् ॥ ७३ ॥

पशुनामवद्द्विरन्तरासम्भवेऽपि आज्यमुपादेयमित्याह । येषा-
मिति । स्पष्टम् ॥७३॥

सोमाभावे तु पूतीकाः पूतिकानामसम्भवे ।
आदारान् छेदमूलानि गृह्लीयात् फाल्गुनानि वा॥७४॥
तदभावे तु गृह्लीयादोषधीः क्षीरसंयुताः ।
तथैव वारुणा दूर्व्वाः कुशान् वा हरितस्तथा ॥ ७५ ॥
बर्हिः कुशमयं ग्राह्यं न लभ्यन्ते कुशा यदि ।
शरशैर्यमुतवाश्ववालमौञ्जार्ज्जुनेक्षवः ॥ ७६ ॥
सुगन्धितेजना दारुदूर्व्वाक्षीरद्रुमा अपि ।
कुशाभावे ग्रहीतव्या बर्हिःकार्य्ये पृथक् पृथक् ॥ ७७ ॥
यद्वा सर्व्वतृणेभ्योऽपि ग्राह्यं बर्हिर्यथेप्सितम् ।
शुकशुम्बकष्णतूलदुर्गन्धतृणवर्ज्जितम् ॥ ७८ ॥

सोमप्रतिनिधीनाह ।

सोमाभावे त्विति द्वाभ्याम् । यदि सोमं न विन्देत् पूतीकानभिषुणुयादित्यत्र न सोमालाभे पूतीकविधिः। किन्तु प्रतिनिधितया प्राप्तेष्वनेकेषु द्रव्येषु पूतीकानां नियमः इति षष्ठे सिद्धान्तितम् । एवञ्च पूतीकाभावे न पूतीकसदृशमुपादेयं किन्तु सोमसदृशमेवादारादिकमिति भावः ॥७४॥७५॥

बर्हिरिति। कुशमयं बर्हिरिति तावन्मुख्यः कल्पः। तदसम्भवे शरादयो ग्राह्याः ॥७६॥७७॥

मतान्तरमाह। यद्वेति। शुकशुम्बादिवर्जनं यथा भवति तथा सर्व्वतृणेभ्यो बर्हिर्ग्राह्यम्। शुकशुम्बादिवर्जितेभ्यः सर्व्वतृणेभ्य इति यावत् ॥७८॥

बौधायनादिभिः प्रोक्तो विधिरत्र मतात् पुनः ।
सूकलानेकलांश्चापि वर्जयन्त्यपरे बुधाः ॥ ७९ ॥
कुशाभावे कठाः प्राहुः पर्व्वपल्लवदोषधीः ।
वरूकरत्तारकटकपरिध्याधकवर्ज्जिताः ॥ ८० ॥
मुख्यान्येवेति भाषन्ते केचित् काशान् कुशान् शरान् ।
बल्वजान् पुण्डरीकाणि यवव्रीहितृणान्यपि ॥ ८१ ॥
पालाशः खादिरो वेध्मो मुख्यः स्यात्तदलाभतः ।
वनस्पतीनां सर्व्वेषामिध्मः कार्य्यो विशेषतः ॥ ८२ ॥

बौधायनादिभिरिति । सोऽयं बौधायनादिसम्मतो विधिः । मतात् पुनरिति । मतादिति ल्यब्लोपे पञ्चमी । पुनरप्रथमे भेदे इति कोषात्, मतान्तरमाश्रित्यापरे सूकलानेकलांश्च वर्जयन्ति । सदृशानेकलांश्चापीति पाठान्तरम् ॥७९॥

मतान्तरमाह । कुशाभावे इति ॥८०॥

मतान्तरमाह । मुख्यानीति । काशकुशादयः सर्व्वे मुख्याः । न तु काशादीनां कुशप्रतिनिधित्वमित्यर्थः ॥८१॥

पालाश इति । इध्मो नामाग्नीन्धनार्थः प्रादेशद्वयपरिमितकाष्ठरूपः । स च पालाशः खादिरो वेति मुख्यः कल्पः । तदसम्भवे प्रतिषिद्धवर्जं सर्व्ववनस्पतीनां कार्य्यः । खादिरपालाशयोर्विकल्पः ॥ ८२॥

तचैतान् वर्जयेद्वृक्षान् कोविदारविभीतकौ ।
कपित्थं करभं राजवृक्षं शाकद्रुमं तथा ॥ ८३ ॥
नीपं निम्बं करञ्जं च तिलकं शाल्मलीमपि ।
श्लेष्मातकमपि त्यक्त्वा ग्राह्योऽन्यः सकलो द्रुमः ॥ ८४ ॥
पालाशः खादिरो वैल्वो यूपो रौहितकोऽपि वा ।
औदुम्बरो वा यूपः स्यादित्याहुः कठशाखिनः ॥ ८५ ॥
यूपेष्वविद्यमानेषु ग्राह्यः कश्चिद्वनस्पतिः ।
तदभावे तु यं कञ्चिद् याज्ञिकं वृक्षमाहरेत् ॥ ८६ ॥
अग्निहोत्रहवन्यत्र कार्य्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या तदभावेऽन्यवृक्षजा ॥ ८७ ॥
आपस्तम्बोक्तवृक्षोक्ता भवेयुः क्रतुषु स्रुचः ।
शमीमय्योऽथवा भूर्जवृक्षमय्यः कठश्रुतेः ॥ ८८ ॥

प्रतिषिद्धानाह । तचेति द्वाभ्याम् । एतांस्त्यक्त्वाऽन्यः सकलो द्रुमो-ग्राह्य इति स्पष्टार्थमभिधानम् ॥८३॥८४॥

यूपविधिमाह । पालाश इति द्वाभ्याम् । स्पष्टार्थौ श्लोकौ ॥ ८५॥८६॥

स्रुचमधिकृत्याह । अग्निहोत्रेति । अग्निहोत्रं हूयते यया सेय-मग्निहोत्रहवनी स्रुक् ॥८७॥

अग्निहोत्रादन्यत्राह । आपस्तम्बोक्तेति ॥८८॥

तदलाभे यथालाभमन्यथाग्निकहृक्षजाः ।
खादिरो मुसलः कार्य्यः पालाशः स्यादुलूखलः ॥ ८९ ॥
यद्वोभौ वारणौ कार्य्यौ तदभावेऽन्यवृक्षजौ ।
रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः॥९०॥
कुर्व्वीत चमसांस्तेषामभावेऽन्यद्रुमोद्भवान् ।
आश्वत्थं वारणं नो चेदिड़ापात्रमिहान्यजम् ॥ ९१ ॥
न लभ्यन्ते यदा गावो दक्षिणार्थेन चोदिताः ।
प्रत्येकं तत्र निष्कः स्यात्तदर्द्धं पाद एव वा ॥ ९२ ॥
द्रव्याणामेकजातीनां बह्वनां यत्र चोदना ।
तत्रार्द्धं मुख्यलाभेऽपि शेषे प्रतिनिधिर्भवेत् ॥ ९३ ॥

मुसलोलूखलयोर्विधिमाह । खादिर इति ॥८९॥

मतान्तरमाह । यद्वेति । उभौ मुसलोलूखलौ । चमसप्रकृतिमाह । रौहीतकानित्यादिना ॥९०॥

कुर्व्वीतेति । रौहीतकानित्यादिना गतेन सम्बन्धः । आश्वत्थमिति । इड़ापात्रं तावदाश्वत्थं वारणं वा कार्य्यम् । तदसम्भवे त्वन्यवृक्षजमित्यर्थः ॥९१॥

नेति । निष्कादयो गोः प्रत्याम्नायाः । निष्कस्त्वनेकधा स्मर्य्यते । तथा चामरः । साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले । दीनारेऽपि च निष्कोऽस्त्रीति । दीनारो मञ्जरोन व्याख्यातः । यथा । दीनारोरूपकैरष्टाविंशत्या परिकीर्त्तितः । सुवर्णषष्ठितमो भागोरूपक उच्यते । मनु । चतुःसौवर्णिको निष्क इति ॥९२॥

सर्व्वोऽपि मुख्य एव स्यात् सर्व्वो गौणोऽथवा भवेत् ।
इत्येवमेकरूपत्वे न युक्तः कर्त्तुमाग्रहः ॥ ९४ ॥
गावो हेमानि वस्त्राणि चोद्यन्ते यत्र दक्षिणाः ।
तदभावे ददेन्मन्थांस्तत्संख्यानथवौदनान् ॥ ९५ ॥
तयोरभावे कन्दानि मूलान्याहो फलानि च ।
नित्यस्य कर्म्मणः कार्य्यं सर्व्वथैव समापनम् ॥ ९६ ॥
वाजपेयक्रतौ सर्व्वदक्षिणानामसम्भवे ।
गावः सप्तदशैकेषां सम्भवेऽपीति सामगाः ॥ ९७ ॥
यज्ञोपवीतस्याभावे वस्त्रोपव्यानमाचरेत् ।
तदभावे तु सूत्रेण विहृतोपव्ययेत सः ॥ ९८ ॥
भुञ्जीयातां घृतेनैव स्वामिनाविष्टिमध्यतः ।
दध्ना क्षीरेण वा कार्य्यं घृताभावे तु भोजनम् ॥ ९९ ॥

द्रव्याणामित्यादिश्लोकद्वयं स्पष्टार्थम् ॥ ९३॥ ९४॥

गाव इति । मन्थास्तु, दधिमधुघृतसिक्तेषु सक्तवः पृथगेते वि-
ख्यातास्त्रयस्तु मन्थाः — इति गृह्यासङ्ग्रहे व्याख्याताः ॥९५॥

तयोरिति । तयोर्मन्थौदनयोः ॥९६॥

वाजपेयेति । एकेषामाचार्य्याणां मते सर्व्वदक्षिणाऽसम्भवे सप्तदश-
गावो देयाः। सर्व्वदक्षिणासम्भवेऽपीति छन्दोगानां मतम् ॥ ९७॥

यज्ञोपवीतस्येति । यज्ञोपवीतं उपदिष्टगुणोपेतं ब्रह्मसूत्रम् ।
तस्याभावे वस्त्रेण, तस्याप्यभावे विहृता सूत्रेणोपव्यानं कुर्य्यात् ॥९८॥

भुञ्जीयातामिति । स्वामिनौ दम्पती । स्पष्टमन्यत् ॥९९॥

मुख्यवृत्त्यर्जितं गौणं द्रव्यं यद्यपि विद्यते ।
तथापि गौणवृत्त्याप्तं मुख्यं द्रव्यं ग्रहीष्यते ॥ १०० ॥

मुख्यवृत्त्यर्जितं द्रव्यं यागार्थं चेन्न लभ्यते ।
स्तेयाद्न्यैरसन्मार्गैरर्जितेनापि चेज्यते ॥ १०१ ॥

मन्त्रोक्तानुक्तगुणकं चोदितं चेन्न लभ्यते ।
मन्त्रानुक्तगुणं हित्वा स्यान्मन्त्रोक्तगुणादरः ॥ १०२ ॥

विशिष्टावयवद्रव्यं विशिष्टगुणयोगि च ।
चोदिताङ्गमलभ्यं वै तत्र कार्य्यो गुणादरः ॥ १०३ ॥

मुख्येति । वर्णानुसारेणानुशिष्टा वृत्तिर्मुख्या । अनन्तरवर्ण-वृत्तिः पूर्व्वस्य गौणी । वृत्तिर्जीवनोपायः प्रतिग्रहादिरूपः । आप्त-मर्जितम् ॥१००॥

मुख्येति । स्तेयाद्न्यैरित्यनेन स्तेयार्जितधनेन न यष्टव्यमित्युक्तम् । असन्मार्गा अविक्रेयविक्रयादयः ॥१०१॥

मन्त्रेति । मन्त्रोक्तगुणकं मन्त्रानुक्तगुणकं ब्राह्मणोक्तगुणकमित्ये-तत् । यत्र मन्त्रब्राह्मणाभ्यां पृथक् पृथक् गुणा अभिहिताः, तत्र तदुभयगुणयुक्तद्रव्यालाभे ब्राह्मणोक्तगुणानुपेक्ष्य मन्त्रोक्तगुणा एवा-दरणीया इत्यर्थः ॥१०२॥

विशिष्टेति । यत्राङ्गद्रव्यस्यावयवविशेषा गुणविशेषाश्चोपदिष्टा-स्तत्रोभयोपसंहारासम्भवे गुणादरः कार्य्यः ॥१०३॥

स्थूलादिपरिमाणञ्च द्रव्यं मुख्यादिरूपवत् ।
चोदिताङ्गमलब्धं चेत्तत्र रूपादरो भवेत् ॥ १०४ ॥
दूरासन्नगुणोपेतमङ्गं न प्राप्यते यदि ।
दूरवर्त्तिगुणं हित्वा स्यादासन्नगुणादरः ॥ १०५ ॥
नानाधर्मवदङ्गं चेदलब्धं तत्र गृह्यते ।
स्वभावबलवद्धर्मबलवच्छास्त्रचोदितम् ॥ १०६ ॥
शास्त्रधर्मान् प्रतिनिधौ शक्त्या सर्व्वान् प्रयोजयेत् ।
मुख्याभिधायकान्मन्त्राननूहेनैव कीर्त्तयेत् ॥ १०७ ॥
सर्व्वप्रतिनिधौ कार्य्यमनाम्नातजपादिकम् ।

स्थूलेति । शिष्टयोः परिमाणरूपयोरुपसंहारासम्भवे परिमाणमुपेक्ष्य रूपमादरणीयम् ॥१०४॥

दूरेति । अङ्गद्रव्यस्य दूरवर्त्तिन आसन्नाश्च गुणा यत्रोपदिष्टास्तत्रोभयोपसंहारासम्भवे आसन्नगुणादरः कार्य्यः ॥१०५॥

नानेति । यत्राङ्गे नाना धर्मा उपदिष्टास्तत्र तावद्धर्मयुतस्याङ्गस्यासम्भवे यो धर्मः स्वभावतो बलवान् यो वा बलवता शास्त्रेणोपदिष्टस्तद्धर्मयुतमङ्गं ग्रहीतव्यम् ॥१०६॥

शास्त्रेति। मुख्ये ये धर्माः शास्त्रेणोपदिष्टास्ते यावच्छक्ति प्रतिनिधौ प्रयोज्याः । मुख्याभिधायकाश्च मन्त्राः प्रतिनिधावनूहेनैव पाठ्याः ॥१०७॥

सर्व्वेति । प्रतिनिध्युपादानेऽपि मुख्यस्य लोपात् प्रसक्तं वैगुण्य-

यद्वा प्रतिनिधानेनैवार्थसिद्धिः कठाशयात् ॥१०८॥
यत्र प्रतिनिधिर्न्नातुं नैव शक्यः कथञ्चन।
तत्रापि वाक्यसामर्थ्यात्तत्कार्य्येऽन्यद्विधीयते ॥ १०९ ॥
आग्रयणे पशौ सोमे चातुर्मास्येष्वसम्भवे।
इष्टिं वैश्वानरीं कुर्य्यात्तत्तत्कार्य्यप्रसिद्धये ॥ ११० ॥
प्रायश्चित्तेष्टिकार्य्येषु कार्य्या पूर्णाहुतिर्बुधैः।
पश्विष्टेरपि च स्थाने प्राहुः पूर्णाहुतिं परे ॥ १११ ॥
सत्रायागूर्य्य तत्कर्त्तुमसमर्थस्य विश्वजित्।
यद्वा त्रैधातवीया स्यात् सहस्रपशुदक्षिणा ॥ ११२ ॥

मनाज्ञातजपादिना शमनीयम्। मतान्तरमाह। यद्वेति। प्रतिनिधिनैव कर्म्मसाद्गुण्याच्च तदर्थमनाज्ञातजपादिकमित्यर्थः ॥१०८॥

यत्रेति। न्यायप्राप्तप्रतिनिध्यभावेऽपदृष्टमपि वचनप्राप्तं प्रतिनिधेयमित्यर्थः ॥१०९॥

आग्रयणे इति। आग्रयणादौ यानि यानि कार्य्याणि न सम्भवन्ति, तत्तत्प्रसिद्ध्यर्थं वैश्वानरीमिष्टिं कुर्य्यात् ॥११०॥

प्रायश्चित्तेष्टीति। प्रायश्चित्तेष्टेः तत्स्थाने पूर्णाहुतिर्वा कार्य्या। पश्विष्टिस्थानेऽपि पूर्णाहुतिं केचिदिच्छन्ति। परे इति कुर्व्वन् अन्ये नेच्छन्तीत्यपि सूचयति ॥१११॥

सत्रायेति। सत्रं कर्त्तुमागूर्य्यागूं कृत्वा यदि तत्कर्त्तुं न शक्नुयात्, तदा विश्वजितं सहस्रपशुदक्षिणां त्रैधातवीयामिष्टिं वा कुर्य्यात्। आगूर्नाम याज्यादौ पठनीयो मन्त्रविशेषः ॥११२॥

उदात्तो मथ्यमानोऽग्निर्न जायेत यदि क्वचित्।
लौकिकेऽभावजाकर्णविप्रपाण्योरसव्ययोः ॥ ११३ ॥
दर्भस्तम्बेऽप्सु वाऽनुज्ञा परयोर्होमयोर्द्वयोः।
यद्वैकस्यैव होमस्य काष्ठेऽनुज्ञाप्य वा भुवि ॥ ११४ ॥
अरण्यारोपितोऽप्यग्निर्मथ्यमानो न चेद्भवेत्।
तत्रापि गतिरेषैव कर्त्तुं युक्ता मनीषिभिः ॥ ११५ ॥
अरण्यारोपितस्याग्नेः पक्षान्तरमपीच्छति।
बौधायनो न शक्यं चेन्मन्थनं वाऽपि धारणम् ॥ ११६ ॥
लौकिकं वह्निमादीप्य विहृत्याग्नेस्तु मध्यतः।
आरोपितारणीं क्षिप्त्वा जुहुयादग्निहोत्रकम् ॥ ११७ ॥

उदात्त इति। यदाऽग्निरुदात्तस्तदा मन्थनेनाग्निं सम्पादयेत्। मथ्यमानोऽपि यद्यग्निर्नोत्पद्यते, तदा लौकिकाग्न्यादौ परयोर्होमयोरभ्यनुज्ञा। मतान्तरे लैकस्यैव होमस्य ब्राह्मणानुज्ञया काष्ठादौ करणम्। द्वितीयस्तु होमः सर्व्वथाऽग्निमुत्पाद्य तत्रैव करणीयः। असव्ययोर्दक्षिणयोः ॥ ११३ ॥ ११४ ॥

अरणीति। अरण्यामग्निमारोप्याहिताग्नेः प्रवासो विहितः। प्रवासे चारणिं मथित्वाऽग्निमुत्पाद्य तत्राग्निहोत्रं कर्त्तव्यम्। यदि तु मथ्यमानोऽप्यग्निर्न जायते, तदा पूर्व्वोक्तैव गतिः ॥ ११५ ॥

अथ मतान्तरमाह अरणीति द्वाभ्याम्। अरण्यामारोपितस्याग्नेरिति सम्बन्धलक्षणा षष्ठी। बौधायन इच्छतीति गतेन सम्बन्धः। अग्निरारोपितो यस्यां तामरणिमग्नेर्मध्यतः क्षिपेत्यन्वयः ॥ ११६ ॥ ११७ ॥

मन्थनं धारणं वाऽग्नेयवित्कालं न सम्भवेत् ।
तावत्कालं जुहोत्येवमव्वागौपवसथ्यतः ॥ ११८ ॥
पश्चादौ यदि निर्मन्थ्यो मथ्यमानो न जायते ।
तत्कार्य्ये हेमशकलं भवतं न इति क्षिपेत् ॥ ११९ ॥
अभिहृत्य व्याहृतिभिरथाग्नावग्निरित्यपि ।
सावित्र्यादि प्रपद्येत भरद्वाजमुनेर्मतात् ॥ १२० ॥
पत्नी चेद्विधवा भूत्वा प्रमीयेत कदाचन ।
तदा श्रौताग्निशून्यत्वान्निर्मन्थ्येनैव दह्यते ॥ १२१ ॥
पुनः परिणयाधाने स्वामिनो यदि सिध्यतः ।
पत्न्यै मृतायै श्रौताग्निं दद्यान्निर्मन्थ्यमन्यथा ॥ १२२ ॥

एतादृशप्रकारेण होमस्यावधिमाह । मन्थनमित्यादिना ॥ ११८ ॥

पश्चादाविति । निर्मन्थ्य इति मन्थनोत्पन्नस्याग्नेर्नामधेयम् । मथ्यमानः सन् यदि निर्मन्थ्यो न जायते तदा भवतं न इति मन्त्रेण तत्कार्य्ये हेमखण्डं क्षिपेत् ॥११९॥

मतान्तरमाह । अभिहृत्येति ॥१२०॥

पत्नीति । प्रमीयते म्रियेत । श्रौताग्निशून्यत्वादिति । पूर्व्वमृतस्य पत्युर्दाहे तद्विनियोगादिति भावः ॥१२१॥

पुनरिति । पत्न्यां मृतायां पत्युः पुनः परिणयस्य पुनराधानस्य च सम्भावनायां श्रौताग्निना पत्नीं दग्ध्वा पुनः परिणयं पुनराधानं च कुर्य्यात् । तदसम्भावनायान्तु निर्मन्थ्याग्निनैव सा दग्धव्या॥ १२२॥

तथैवानेकभार्य्यस्य यद्येकाऽत्र प्रमीयते ।
नेच्छेत् पुनर्विवाहं चेन्निर्मन्थ्येनैव तां दहेत् ॥ १२३ ॥
किन्त्वेतावदिहाप्यस्ति दग्ध्वा निर्मन्थ्यवह्निना ।
उत्सर्गेष्ट्या त्यजेदग्नीन् पुनस्तानादधीत च ॥ १२४ ॥
मृतभार्य्यस्य यागादौ सर्व्वं स्त्रीकर्म्म लुप्यते ।
नान्येन केनचित् कार्य्यं मृतायाः कर्म्म किञ्चन ॥१२५॥
फलीकरोति यः कश्चिदिह दासी पिनष्टि च ।
संपत्नीयाहुतिस्तत्र सर्व्वथैव च लुप्यते ॥ १२६ ॥
अस्त्रीकस्य हविःपाको नियतः पूर्व्वपावके ।
सर्व्वथा नापरे वह्नाविति कात्यायनोऽब्रवीत् ॥१२७॥

तथैवेति। स्पष्टार्थः श्लोकः ॥१२३॥

अत्रैव विशेषमाह। किन्त्विति। मृतां पत्नीं निर्मन्थ्याग्निना दग्ध्वा उत्सर्गेष्टिविधिना अग्नीन् परित्यज्य तानग्नीन् पुनरादधीत ॥१२४॥

मृतभार्य्यस्येति। पत्नीकर्म्मशून्य एव तस्य याग इत्यर्थः। पत्न्याः प्रतिनिधिरूपेणापि केनचित्तत्कर्म्म न कर्त्तव्यमित्याह। नान्येनेति ॥ १२५॥

पत्नीकर्म्मलोपे फलीकरणादिकमपि न स्यात् तदभावे च हविरेव न निर्वहेदित्याशङ्क्याह। फलीकरोतीति। यः कश्चित् शिष्यादिः। स्पष्टमन्यत् ॥१२६॥

विशेषमाह। अस्त्रीकस्येति ॥१२७॥

एवमुत्सर्गतः सर्व्वं पत्नीकर्म्म विलुप्यते ।
मृतभार्य्यस्य चैकाकिनोऽग्निहोत्रादि जुह्वतः ॥ १२८ ॥
पत्नीमन्त्रान् जपेत् स्वामी जीवन्ती चेन्न शक्नुयात् ।
लोपएवाथवा तेषामिति सूत्रेषु केषु चित् ॥ १२९ ॥

उपसंहरति। एवमिति ॥१२८॥

मृतभार्य्यस्य विधिमुक्त्वेदानीं जीवन्त्येव पत्नी यद्यशक्ता भवति तदा किं कर्त्तव्यमित्याकाङ्क्षायामाह । पत्नीमन्त्रानिति । मतान्तरे तु जीवन्त्यामशक्तायां पत्न्यां पत्नीमन्त्राणां लोप एवेत्यर्थः ॥ १२९॥

एवं केशवसिद्धान्तो मृतभार्यस्य भाषितः ।
आचार्यान्तरसिद्धान्ताः पुनराधौ प्रपञ्चिताः ॥ १३०॥

एवमिति । एवं पूर्वोक्तप्रकारोमृतपत्नीकस्य केशवसिद्धान्तानुसारेण भाषितः उक्तः । ननु अपत्नीकस्यान्येऽपि शाखान्तरगोचराविषयाः सन्तीति न्यूनत्वमाशङ्क्य परिहरति । आचार्येति । भविष्यन्तीति शेषः । स्वसूत्रसूत्रान्तरेषु। तेषां भिन्नप्रदेशीयत्वेन नात्रोद्भाविताः, किन्तु पुनराधिस्थले एव तेषां प्रपञ्चनं भविष्यतीति भावः ॥१३०॥

अपत्नीकाधिकारेऽपि अत्रैव विषय, इत्यादि।

प्रसूतायामशक्तायामपेतायां च केचन ।
रजस्वलाविधिं प्राहुर्मैथुनात्स्नानवर्जितम् ॥ १३१ ॥

17

प्रसूतायामिति। प्रसूताशब्देन पुत्रजननमित्तकविंशतिदिनात्मककर्मानधिकाररूपाशौचवती लक्ष्यते * । कन्याजननप्रयुक्तैकमासात्मकत्वं कन्याजनौ । अशक्ता असमर्था रोगादिना । अपेता । इण गतौ । अप दूरं इता गता । अप दूरमसर्पणे इति विश्वः । मृतायामिति यावत्। चकारात् प्रोषिता पतिताऽपि संगृह्यते । केचन आचार्याः । अत्र कश्चिदिति वक्तव्ये वहुवादिसम्मतिदर्शनद्वारा स्वाभिमतत्वयुक्तत्वं व्यञ्जयन् केचनेत्याह ।

अास्तु रजस्वलाधर्मातिदेशार्थमाह । रजस्वलेति । रजस्वलायां सत्यां योविधिः कल्पे दृष्टः स एवात्र प्रसूतादिषु प्राक्तः। तामपरुध्य यजेतेत्यादिकः। पत्नीकर्मलोपपत्तो योऽन्वाधादनादिरूपो वा पक्षः। उभयरूपोविधिरिति यावत् । श्रूयते चापस्तम्बसूत्रे मैथुनाह्वानसंज्ञकं कर्म, तस्यादृष्टार्थत्वमाशङ्क्य रजस्वलाधर्मातिदेशाच्च प्राप्तं परिहरति। मैथुनेति। मैथुनार्थमाह्वानं मन्त्रकरणकं शास्त्रेणोपदिष्टम् । तदिहायान्यत् प्रसूतादिषु भवतीत्यर्थः। तस्य दृष्टार्थत्वे सति पुरुषार्थत्वादिति भावः। ननु न देवताग्निशब्दक्रियाः परार्थत्वादिति प्राक् प्रपञ्चितम् । तत्र मन्त्राणां प्रतिनिधिर्न वेति सन्देहे निषते सामान्यतः प्रतिनिधिः स्यात् । आरम्भनियमः दोषशासमाप्तौ † ॥१२१॥

---

* लभ्यते, – इति क॰ पुस्तके पाठ ।

† अत्र कियान् ग्रन्थस्त्रुटित इति प्रतिभाति ।

होतुर्याज्याऽनुवाक्यासु विस्मृतिर्यदि जायते।
तदाऽऽग्नेयीभिरैन्द्रीभिः प्राजापत्याभिरेव च ॥ १३२॥
यजेद्याज्यानुवाक्याभिर्व्याहृतीभिरथापि वा।
अनुमन्त्रणमन्त्रेषु याजमानेषु विस्मृतौ ॥ १३३ ॥
तदा व्याहृतिभिः कुर्य्यात् स्वामी तदनुमन्त्रणम्।
दीक्षावेदनसुब्रह्मण्यादिकार्य्यप्रशेषतः ॥ १३४ ॥
पित्रादीनां सुतादीनां मध्ये यन्नामविस्मृतौ।
अकृतं यस्य वा नाम निर्दिशेत्तं तमेव वा ॥ १३५ ॥
जातिनक्षत्रगोत्रानुष्ठानान्यतमसंज्ञया।
तथैष्टौ प्रियपुत्रस्य पित्रादीनां पितृकृतौ ॥ १३६ ॥
छिन्नं लूनञ्च पिष्टञ्च सान्नाय्यं मृन्मयं तथा।

होतुरिति। याज्या नाम हविस्त्यागार्था ऋचः। अनुवाक्याश्च देवताह्वानार्थाः। तद्विस्मरणे आग्नेय्यादीनामन्यतमाभिर्ऋग्भिर्व्याहृतिभिर्वा यजेत्। यद्यपि मन्त्रे प्रतिनिधिर्नेत्युक्तं, तथापि वचनात् क्वचित्तथात्वमादरणीयम्। स्पष्टमन्यत्। नामाधिकृत्याह। दीक्षेति॥ पित्रादीनामिति। पित्रादीनां पुत्रादीनां वा कस्य चित्रा-म्नोविस्मरणे प्रमादादनिर्देशे वा समस्तस्यैव वाक्यस्य तन्नाममात्रस्य वा निर्देशः कार्य्यः ॥१३२॥१३३॥१३४॥१३५॥

नामविस्मरणे निर्देशप्रकारमाह। जातीति ॥१३६॥

छिन्नमिति। यथाविध्यनुत्पाद्य लोकसिद्धच्छेदनहीयात्तदा

लोकसिद्धं गृहीतश्चेन्मन्त्रा जप्याः कठाशयात् ॥ १३७॥

छिन्नादि लोकसिद्धं चेदाद्रियत क्रतुं प्रति ।
तत्तन्मन्त्रजपं प्राह भरद्वाजः कृताकृतम् ॥ १३८ ॥

छिन्ने चावहृते लूने पिष्टे दग्धे च मृन्मये ।
खाते च लौकिके प्राप्ते जपोनास्त्येव वाजिनाम् ॥१३९॥

उक्तानि परिमाणानि वेदेरग्निसद्मनाम् ।
तदसम्भवतो ह्रासं कुर्य्यादर्थाविरोधतः ॥ १४० ॥

अङ्गुलस्य प्रमाणं तु व्याख्यातमनलाहितौ ।
तस्यासम्भवतस्तिर्य्यग्यवचितयमङ्गुलम् ॥ १४१ ॥

प्रयोगकाले तत्तन्मन्त्रा जप्तव्याः ॥१३७॥

मतान्तरमाह छिन्नादीति । तथाच भरद्वाजमते तत्तन्मन्त्रान् जपेद्वा न वा जपेत् ॥१३८॥

मतान्तरमाह । छिन्ने इति। तथाच कठानां मन्त्रजपोनियतः, भरद्वाजीयानां कृताकृतः, वाजिनान्तु न भवत्येव ॥१३९॥

उक्तानीति । वेदेरग्निगृहस्य च शास्त्रोपदिष्टपरिमाणासम्भवे यावता परिमाणेन प्रयोजनं निर्व्वहति तावत्परिमाणं ह्रस्वमपि कुर्व्वीत ॥१४०॥

अङ्गुलस्येति । यथोक्तपरिमाणासम्भवे तिर्य्यक्स्थापितयवचितयमेवाङ्गुलपरिमाणं भवति ॥१४१॥

वेदिसन्नमनार्थाय रज्जोराकर्षणे यदि ।
महीतलं न पर्य्याप्तं तदेमं विधिमाचरेत् ॥ १४२ ॥

श्रोण्यंसदेशान्तरालमात्रीं रज्जुं विधाय तु ।
तस्य द्वादशकं भागमपरं तत्र निक्षिपेत् ॥ १४३ ॥

रज्जुस्त्रयोदशांशेन शङ्कौ न्यस्ता यथा स्पृशेत् ।
श्रोण्यंसयोरन्यतरं तावद्दूरे निहन्ति तौ ॥ १४४ ॥

शङ्कुदक्षिणश्रोण्यंसौ दक्षिणेन ततस्तयोः ।
शङ्कोर्निक्षिप्य तत्पाशौ तां रज्जुं तदनन्तरम् ॥१४५॥

श्रोणिं प्रति समाकृष्य तत आरभ्य चांसतः ।
दृढकार्य्यं लिखन्नेव वेदिं दक्षिणतो नमेत् ॥ १४६ ॥

एवमुत्तरतो नामः पूर्व्वपश्चिमतोऽपि च ।
यस्यां दिशि नमेद्वेदिस्तस्यां श्रोण्यंसतो वहिः ॥ १४७॥

श्रोणिभ्यां च तथाऽंशाभ्यां द्वौ द्वौ शङ्कू वहिः क्षिपेत् ।
रज्जुर्द्वयोर्द्वयोः शङ्कोः पूर्ववत् न्यस्य नामयेत् ॥१४८॥

पूर्वपश्चिमयोरज्जुस्तत्मानानुसारिणी ।
तत्तद्रज्ज्वनुसारेण तत्तच्छङ्कोर्वहिः क्रिया ॥ १४९ ॥

वेदीति । एषा च प्रक्रिया याज्ञिकेभ्योऽवगन्तव्या ॥१४२॥
१४३॥१४४॥१४५॥१४६॥१४७॥१४८॥१४९॥

मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनम्।
न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणम् ॥ १६२ ॥

एकपक्षगतो यावान् होमसङ्घोऽतिपद्यते।
पक्षहोमविधानात्तं हुत्वा तन्तुमतीं यजेत् ॥ १६३ ॥

स्वकालोत्कर्षतः कश्चिद् गौणकालो निरूपितः।
अपकर्षादथान्योऽपि गौणकालो निरूप्यते ॥ १६४ ॥

आमयाव्यार्त्तिमानापद्गतो वाऽध्वगतोऽपि वा।
राष्ट्रभ्रंशे धनाभावे गुरुगेहे वसन्नपि ॥ १६५ ॥

अन्येष्वेवंप्रकारेषु निमित्तेष्वागतेषु च।
समासमग्निहोत्राणां यथासम्भवमाचरेत् ॥ १६६ ॥

उत्तरमाह। मुख्येति ॥ १६२॥

अथेदानीं पक्षहोममधिकृत्याह। एकेति। अतिपद्यते लुप्यते। अतिपत्यते इति तु समीचीनः पाठः। तं होमषण्डम्। तन्तुमती नाम प्रायश्चित्तेष्टिविशेषः ॥१६३॥

स्वेति। पूर्वं स्वकालोत्कर्षेण स्वकालात् परत इत्येतत्, पूर्वस्य कर्मणो गौणकालो निरूपितः, अथेदानीं स्वकालात् पूर्वतोऽपि गौणकालो निरूप्यते ॥१६४॥

तच निमित्तान्याह। आमयावीत्यादिना। समासः सङ्क्षेपः ॥ १६५॥१६६॥

निमित्तानामिहैतेषां निर्दिश्यैकं यदुच्यते ।
तत्सर्वेषु निमित्तेषु जानीयात् प्रतिपादितम् ॥ १६७॥
पशुहोमानशेषान् वा शेषहोमानथापि वा ।
समस्य जुहुयात्तत्र प्रयोगोऽयं निरूप्यते ॥ १६८ ॥
प्रतिपद्युन्नयेत्सायमापद्यन्यत्र वा दिने ।
यावन्त्यौपवसथ्याह्नात् प्राग्दिनानि भवन्ति हि॥ १६९॥
तावन्ति परिगृह्णीयाच्चतुरुन्नयनानि च ।
पात्रान्तरसहायायां नित्यायां प्राकृतस्रुचि ॥ १७० ॥
स्थूलं स्रुगन्तरं वाऽपि कृत्वा तत्र समुन्नयेत् ।
एका समित् सकृद्धोमः सकृदेव निमार्जनम् ॥ १७१ ॥
उपस्थानं सकृत्कार्य्यं शेषा प्रकृतिरिष्यते ।

निमित्तानामिति। एषां निमित्तानां मध्यादेकं निमित्तं निर्दिश्य यदुच्यते, तत् सर्व्वेषु निमित्तेषूक्तं जानीयात् ॥१६७॥

पश्वेति। तत्रायं वक्ष्यमाणः प्रयोगो निरूप्यते ॥१६८॥

प्रतिपदीति। औपवसथ्याह्नात् पर्व्वदिनात् प्राक् यावन्ति दिनानि, तावन्ति चतुरुन्नयनानि प्रतिपदि दिनान्तरे वा सायं गृह्णीयात्। एकस्यां स्रुचि तावतामसमावेशमाशङ्क्याह। पात्रान्तरसहायायामिति। स्रुति पात्रान्तरे स्रुचं स्थापयित्वा तत्र चतुरुन्नयनानि गृह्णीयादित्यर्थः ॥१६९॥१७०॥

मतान्तरमाह। स्थूलमिति। समुन्नयेदिति तावन्ति चतुरुन्नयनानि इत्यनेन संबध्यते। होमप्रकारमाह। एकेति॥१७१॥

अमुमेव प्रकारं प्रातर्होमेऽप्यतिदिशति ।

एवमेवोत्तरत्राह्नि प्रातर्होमान् समस्य तु ॥ १७२ ॥
जुहुत्यौपवसथ्याहःप्रातर्होमावधीन् सकृत् ।

एवमिति । उत्तरत्राह्नि द्वितीयदिने। प्रातर्होमान् कीदृशान्? औपवसथ्याहः पर्वदिनं, तत्कालीनप्रातर्होमपर्यन्तान् समस्य, तावतां चतुरन्नयनानां समासं कृत्वा, सकृदेकेन प्रयत्नेन जुहोति। यत्तु बौधानीये पर्वहोमपर्यन्तं समासोऽत्र भवतीत्युक्तम् । तत्राग्रे व्यवस्था भविष्यति ॥१७२॥

ततश्च पक्षद्वयोपन्यासार्थमाह ।

समारोपविधानेन समारोपयतेऽनलान् ॥ १७३ ॥
ये धार्यन्तेऽथवा धार्यान्धारयत्येव पूर्ववत् ।

समारोपेति । समारोपस्य विधानं विधिस्तेनाग्नीन् समारोपयन्ते। बहुवचनोपादानात्केषामित्याकाङ्क्षायामाह । य इति । ये अग्नयो नित्यं धार्यन्ते । तेषामित्यर्थः । ततश्च नित्याजस्राणाङ्गतस्रियादीनां सर्वेष्वग्निषु । अन्यथा गार्हपत्य एवेति भावः । पक्षान्तरमाह। अथ वेति। धार्यान्। गार्हपत्यस्य त्रयाणां पूर्ववन्नित्यहोमार्थं धारणं यथा प्राप्तं तथैव कृतहोमसमासस्यापि धारणं भवतीति भावः । बहुवचनन्तु, अन्वाहिताजस्राभिप्रायेण। स चार्थं द्वादशरात्रमेव भवति। एवं चापदनुसारेण कृतहोमसमासस्य समारोपोऽस्त्यमुनैव न्यायेन । नित्यं होमिनोऽपि प्रवासामयाविलनि-

मित्तवशाद्धारणाशक्तौ होमप्रयोगमपहत्य प्रत्यहं समारोपोऽप्युक्तो- भवति। तथा चाथर्वपरिशिष्टे। अत्यशक्तौ काले काले प्रच- र्यात्मनि समिधि वाऽऽरोपयेदत्यन्ताशक्तावपहृत्यापि प्रचर्यारोपये- न्नित्यानि नातिपातयेन्नोत्कर्षेणावरोपयेदिति॥१७३॥

पक्षहोमप्रकारमुक्त्वा शेषहोमप्रकारमाह।

एवं प्रतिपदोऽन्यत्र यत्रापदुपपद्यते * ॥ १७४ ॥
तथैवौपवसथ्याहात् प्रागथचापद्विनश्यति †।
तृतीयायां चतुर्थ्यां वा पञ्चम्यां वा परत्र वा॥१७५॥
तदादीनां तदन्तानां होमानां स्यात्समस्यता ‡।

एवमिति। एवं येन प्रकारेण पक्षहोम उक्तस्तेनैव प्रकारेण शेषहोमः कार्य इत्यर्थः। अयञ्च विशेषः। प्रतिपद्व्यतिरिक्तद्विने द्वितीयादिषु यस्मिन् दिने चापत्प्राप्तिस्तद्दिनमारभ्य पर्वहोमदि- नात् प्राक्, अथवा यद्दिने चापन्निवृत्तिस्तद्दिनपर्यन्तं वा भवति। सर्वोऽप्ययं समस्य होम एव। आपन्निमित्तकोद्धारदिनात्मकोऽपि भवतीत्याह। तृतीयायामिति। स्पष्टम्॥१७४॥१७५॥

अत्रार्थे कठसम्मतिं दर्शयन्नाह।

---

* नश्यति -- इति ग॰ पुस्तके पाठः।

† तथैवौपवसथ्यात् प्राक् यत्र ह्यापद्विनश्यति, -- इति ग॰ पुस्तके पाठः। यदाऽथच विनश्यति इति ङ॰ पुस्तके पाठः।

‡ समासता, -- इति क॰ ङ॰ पुस्तकयोः पाठः।

आपद्देवावधिर्होमसमासस्याभ्युपेयते ॥ १७६ ॥
तस्मात् कदाचिदारभ्य यावतस्तावतोऽपि वा ।
आपत्कालसमान् होमान् समस्येदेकपक्षगान्* ॥१७७॥
अतएव द्विरात्राय चिरात्रायाधिकाय वा ।
समस्य जुहयाद्धोमानित्येवं पठ्यते कठैः ॥ १७८ ॥
प्रवासिनोऽग्निहोत्रस्य पञ्चाहं सप्त वा पुनः ।
सायं प्रातः पृथग्घोमा एकस्मिन्नहनीति च ॥ १७९ ॥
एवमेकत्र पक्षे ये होमास्तेषामशेषतः ।
न्यूनानां वा समासः स्यान्न पक्षान्तरवर्तिभिः ॥१८०॥
सर्वथौपवसथ्याहे सायं होमः पृथग् भवेत् ।
तथैव यजनीयाहे प्रातर्होमो भवेत् पृथक् ॥ १८१ ॥

आपदिति । अवधिरारम्भसमाप्त्योः । ननु होमसमासस्यापद्वधित्वेन दीर्घापदि तावत्कालं होमसमास इत्यत आह । एकपक्षगानिति । तत्स्वरूपमाह । अतएवेति । स्पष्टम् । प्रवासनिमित्तविशेषेण समासे विशेषमाह । प्रवासिन इति । उपसंहरति । एवमिति । एकपक्षे ये होमास्तेषां मध्ये अशेषतः अशेषाणां न्यूनानां वा समासः । न तु पक्षहोमाख्यया पक्षान्तरवर्त्तिभिर्दिनैः सह समासः । तत्र हेतुमाह । सर्वथेति । सर्वथा महापत्त्वेऽपि । औपवसथ्याहे पर्व्वदिने सायंहोमः पृथक्, न समासेन । तथैवापत्त्वेऽपि

* संक्षिपेदेकपक्षगान्,- इति ग० पुस्तके पाठः ।

यजनीयाहे यागदिने प्रातर्होमः पृथक् भवेत्। तथा च सायं समासहोमानां चतुर्दशीसायंहोमान्तानां समासः। एवं पर्वप्रातर्होमान्तानां च प्रातर्होमानां समासः। न ततः परम्। औपवसथ्याहे पर्वदिने ॥१७६॥१७७॥१७८॥१७९॥१८०॥१८१॥

पर्वोपवासशून्यश्चेत् प्राप्तं केनापि हेतुना।
तदा तत्सायंहोमोऽपि पूर्वैः सह समस्यते ॥ १८२ ॥

यदा दैवात् मानुषादा प्रतिबन्धात्पर्वणि यमनियमाकरणे तु पर्वसायंहोमोऽपि पूर्वैः सह समस्तो भवति। एकपक्षगतलात्। प्रातर्होमस्तु पृथगेव। अन्ये तु पर्वसायंप्रातर्होमावपि पूर्वैः सह समस्तौ। समासस्यापन्निमित्तकलात् ॥१८२॥

तावता नापगच्छेच्चेदापत्पक्षान्तरेऽपि च।
पुनस्तत्रापि कर्त्तव्यः समासः पृथगेव हि ॥ १८३ ॥

तावतेति। तत्रापि पक्षान्तरेऽपि ॥१८३॥

पूर्वोक्तमेवानुवदति।

न तु पक्षान्तरस्थानां समासस्त्रोद्यते मिथः।
एवमापन्नतः पक्षे पक्षे चैवं समाचरेत् ॥१८४॥
तृतीयेऽनन्तरे पक्षे समासं न समाचरेत्।

न त्विति। दीर्घापदि पक्षहोमनियममाह।

एवमिति। स्पष्टम् ॥१८४॥

ननु निमित्तमर्द्धे किं कार्य्यमत आह ।

तावता नापगच्छेच्चेदापत्पक्षे तृतीयके ॥ १८५ ॥
कृच्छ्रेणापि विनिर्वर्त्य तत्र होमान्दिने दिने ।
पक्षान्तरे पुनः कामं पक्षहोमादिमाचरेत्* ॥ १८६ ॥
काठैः पक्षद्वयन्त्वेव† पक्षहोमो विनियम्यते ।

तावतेति । कृच्छ्रेण सङ्कटेन । एवमपि आपदनिवृत्तौ चतुर्थ-पक्षे पुनः पक्षहोमः कार्य इत्याह । पक्षान्तरे इति । तत्र कठसम्म-तिमाह । पक्षद्वयमात्रं पक्षहोमो भवतीति नियमात् ॥१८५॥१८६॥

अन्याचार्यमतमुत्थापयति ।

आपच्चेदनुवर्त्तेत दीर्घकालं कदाचन ॥ १८७ ॥
यावज्जीवमविच्छिन्नान् पक्षहोमान् समाचरेत् ।
आपद्देवावधिस्तत्र न पक्षगणनाऽवधिः ॥ १८८ ॥

आपदिति । स्पष्टम् ॥१८७॥१८८॥

समासहोमे प्रकारान्तरमाह ।

अथापरः समासस्य प्रकारः प्रतिपाद्यते ।
सायंप्रातस्तनौ होमावुभौ सायं समस्य तु ॥१८९॥
आपन्नोजुहुयात्तत्र समिदेकाऽथवा द्वयम् ।

* पक्षहोमादि चाचरेत्, — इति ङ० पुस्तके पाठः ।
† पक्षद्वयं यावत्, — इति ग० पुस्तके पाठः ।

अथेति। सायंप्रातर्होमौ सायं समस्य होतव्यौ। समिच्चैकादे वा भवतः। उभयथा श्रवणात् ॥१८९॥

तन्त्रे विशेषमाह।

सायंहोमस्य मुख्यत्वात्तदीयं तन्त्रमिष्यते ॥ १९० ॥
चतस्र आहुतीः कुर्यात् तत्र द्वे सायमाहुती।
द्वे प्रातराहुती सायंहोमे चैका समिद्यदि ॥ १९१ ॥
समित् कृता द्वितीया चेत् सा भवेत् प्रातराहुतौ।
द्विःसायंहोमवन्मृज्याद्द्विःप्रातर्होमवत्स्रुचम् ॥१९२॥
भक्षमन्त्रे भवेदूह आग्नेयं सौर्यमित्यपि।
उपस्थानं सकृत्कार्यं शेषं प्रकृतिवद्भवेत् ॥ १९३ ॥
केचिद्द्वे आहुती हुत्वा संविश्यैव निमील्य वा।
विच्छिद्यैतावता* होमौ कुर्याद्द्वे आहुती ततः॥१९४॥
कल्पभाष्ये पुनश्चान्यदापत्कल्पान्तरं स्थितम्।
पक्षहोमादिकाः पूर्वमापत्कल्पानिरूपिताः ॥ १९५ ॥
सायंप्रातःकालभेदसंपाद्याः सर्व एव ते।
आपद्गुरुत्वमालोच्य कदाचित्सायमेव ते ॥ १९६ ॥
उभयेऽपि समस्यन्ते सायंप्रातस्तना अपि।
इत्थं समस्तहोमानां† समासान्तरमापदि ॥ १९७ ॥

---

* विच्छिद्य तावता, — इति क॰ पुस्तके पाठः।

† समस्य होमानां, — इति ग॰ पुस्तके पाठः।

सायन्तनान् समस्यादौ सर्वान् प्रातस्तनानपि ।
पुनस्तानुभयान् सायं समस्येदुक्तमार्गतः ॥ १९८ ॥

सायमिति ।

सायमादिप्रातरन्तमेकं कर्मप्रचचते इत्युक्तत्वात् कर्मणः साय-मुपक्रमत्वेन सायंहोमस्य मुख्यत्वम् । यतश्च इति । यद्येका समित् क्रियते तदा सा सायंहोमे होतव्या। समिद्द्वयपचे त्वेका सायंहोमे प्रातर्होमे चैका होतव्या । स्रुचं च वारद्वयं सायंहोमवत् वारद्वयं च प्रातर्होमवत् मृज्यात् ॥१९०॥१९१॥१९२॥

विशेषान्तरमाह । अचेति । मतान्तरमाह । केचिदिति । आहुरिति शेषः । आहुतिद्वयहोमानन्तरं संवेशं निमीलनं वा कृत्वा तावतैवापराहुतिद्वयेन विच्छेदं सम्पाद्यापराहुतिद्वयं होतव्यं न तु नैरन्तर्य्येणेति भावः ॥१९३॥१९४॥

मतान्तरमाह । कल्पेति । आपत्कल्पेऽपि समस्यमाना होमाः सायंप्रातःकालभेदेन सम्पादनीयाः । सायंहोमाः सायं, प्रातर्हो-माश्च प्रातः समाद्या इत्यर्थः । आपदो गौरवातिरेके तु सायमे-वोभयहोमाः कर्त्तव्याः । तत्रापि प्रकारमाह । सायन्तनानिति ॥ १९५॥१९६॥१९७॥१९८॥

पक्षहोमे हि तत्रैकमुदाहृत्योच्यते मनाक् ।
चतुरुन्नयनान्यस्मिन्नष्टाविंशतिरुन्नयेत् ॥ १९९ ॥
चतुर्द्धा कृत्वा जुहुयात् षट्पञ्चाशतमाहुतीः ।
प्रक्षेपास्तत्र चत्वारः प्रतिप्रक्षेपमाहुतीः ॥ २०० ॥

मन्त्रेण* जुहुयादिद्वांश्चतुर्द्दश चतुर्द्दश ।
पक्षहोमसमं शेषं सायं प्रातः समाचरेत्† ॥ २०१ ॥
सर्व‡दिराचहोमादावभ्यूह्यमिदमीदृशम् ।
कठा अप्येवमेवार्थमङ्गीकुर्वन्ति केचन ॥ २०२ ॥
दीर्घकालापदं मत्वा पक्षहोमे हुते सति ।
तत्रान्तराले यद्यापत्कदाचिदपगच्छति ॥ २०३ ॥
काले काले पुनर्होमान् जुहुयात् प्राग्घुतानपि ।
कठेष्वेवं विदुः केचिन्नेच्छन्त्यन्ये पुनर्हुतिम् ॥ २०४ ॥
यावन्तोऽत्र समासास्ते सर्वे सायमुपक्रमाः ।
प्रातःकालापवर्गाश्च न तु प्रातरुपक्रमाः ॥ २०५ ॥

तमेव प्रकारमुदाहरणोपन्यासेन विशदयति। पचेति ॥१९९॥ २००॥२०१॥

अमुमेव प्रकारमन्यचातिदिशति। सर्व्वेति ॥२०२॥

यदा तु दीर्घकालीनामापदमवधार्य्यापकर्षरीत्या पचहोमाः कृताः परतस्तु पचमध्य एवापदपगता, तत्र मतभेदेन व्यवस्थाभेदमाह। दीर्घेति ॥२०३॥२०४॥

होमसमासस्यौत्सर्गिकीं रीतिमाह। यावन्त इति ॥२०५॥

---

* तन्त्रेण, — इति क॰ पुस्तके पाठः।

† समासवत्, — इति क॰ पुस्तके पाठः।

‡ सर्व्वं, — इति क॰ पुस्तके पाठः।

प्रातर्होमादिका यदा समासा इति भाषितम् ।
कल्पव्याख्यातृभिः कैश्चित् प्रातश्चेदापदागता ॥२०६॥
तथा पूर्वापराह्लादि* निमित्तेऽथ समस्यति ।
पूर्वपक्षे तु रात्रौ चेन्मृतिशङ्काऽग्निहोत्रिणः ॥ २०७ ॥
सायं हुत्वा तदैवाथ जुहुयात् प्रातराहुतीः ।
यदि त्वपरपक्षे स्यान्मृतिशङ्काऽग्निहोत्रिणः ॥ २०८ ॥
हुतावशिष्टाः पक्षेऽस्मिन् जुहुयात् सकलाहुतीः ।
दर्शेष्टिञ्च तदा कुर्यादिष्टिर्यदि न सम्भवेत् ॥ २०९ ॥
देवतानां प्रधानानामेकैकस्य पृथक् पृथक् ।
पुरोनुवाक्यायाज्याभ्यां चतुरात्तघृताहुतीः ॥ २१० ॥

यदि तु प्रातरापदागच्छति तदाऽपि पूर्व्वमते सायमुपक्रम एव होमसमासः प्राप्नोति, तच्च मतान्तरेण प्रातरुपक्रमत्वमाह । प्रातरिति ॥२०६॥

अग्निहोत्रिणोमरणशङ्कायां विशेषमाह । पूर्व्वपचे इति । पूर्व्वपचे शुक्लपचे ॥२०७॥२०८॥

इष्ट्यसम्भवे आह । इष्टिरिति ॥२०९॥

चतुरात्तं चतुरवत्तं घृतं तदाहुतीः पृथक् पृथक् जुहुयात् ॥२१०॥

* पराह्लादौ, – इति क॰ पुस्तके पाठः ।

जुहुयादेवमन्यच्च सर्वत्रापदि हूयते ।
अथेष्ट्ययनमध्ये स्यात् पत्युर्मरणसंशयः ॥ २११ ॥
अवशिष्टेष्टिदेवेभ्यस्तत्सङ्ख्यानि हतानि च ।
चतुर्गृहीतान्येकत्र गृहीत्वा चमसे सह ॥ २१२ ॥
पुरोनुवाक्यायाज्याभिः पूर्ववज्जुहुयात् पृथक् ।
चातुर्मास्यान्तराले चेत् स्वामिनो मृतिशङ्कनम् ॥२१३॥
तत्रान्यपर्वपर्यन्तमग्निहोत्राण्यप्रेपतः ।
तदेव कुरुते दर्शान् पौर्णमासान् बहूनपि ॥ २१४ ॥
चातुर्मास्यावशिष्टानि पर्वाण्यत्र समापयेत् ।
पश्वलाभे पुरोडाशं निर्वपेत् पशुदैवतम् ॥ २१५ ॥
आमिक्षामथ वा कुर्यात् पूर्णाहुतिमथापि वा ।

अथेति । तत्सङ्ख्यानि देवतासङ्ख्यानि चतुर्गृहीतानि हतानि पुरोनुवाक्यायाज्याभि. पृथग् जुहुयात् ।

चातुर्मास्ययागमध्ये यजमानमरणशङ्कायामाह । चातुर्मास्येति । अन्यपर्वपर्यन्तं चातुर्मास्ययागीयान्यपर्वपर्यन्तम् ॥२११॥२१२॥ २१३॥२१४॥

यदि तु तदानीं पशुर्न लभ्यते तदाऽपि प्रतिनिधिना निर्वर्त्तनीयमित्याह । पश्वलाभे इति । सर्वासम्भवे पूर्णाहुतिः कर्त्तव्या । तावतैव सर्व्वं निर्वहति ।

आहिताग्निः कदाचित्तु कृष्णपक्षे मृतो यदि ॥ २१६ ॥
तदा शेषाहुतीः सर्वा जुहोतीत्याश्वलायनः ।
अन्ये तदैव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु ॥ २१७ ॥
शुक्लपक्षे निशि प्रेतस्येच्छन्ति प्रातराहुतिम् ।
एवं प्रतिनिधिः प्रोक्तस्तत्कार्ये च विधिः पृथक् ॥२१८॥
अवशिष्टोऽच यः कश्चित् स्वे स्वे स्थाने वदामि तम् ॥

आश्वलायनसम्मतिमाह । आहिताग्निरिति ।

अत्रैव मतान्तरमाह । अन्ये इति ॥२१५॥२१६॥२१७॥

प्रतिनिधिप्रकरणमुपसंहरति । एवमिति । प्रतिनिधिस्तन्निर्वर्त्त्ये कर्मणि विधिश्चोक्तः । न्यूनतापरिहारार्थमाह । अवशिष्ट इति ॥२१८॥

इति वादिभटमुद्गरकुठार श्रीकुमारस्वामिसूरिसुत-त्रिकाण्डमण्डनभास्करमिश्रसोमयाजिकृतापस्तम्बसूत्र-ध्वनितार्थकारिकासु प्रतिनिधिनिरूपणं* समाप्तम् ॥

---

* प्रतिनिधिनिरूपणं कार्य्यनिरूपणं, — इति क० पुस्तके पाठः ।

तृतीयकाण्डम् ।

श्रीगणेशाय नमः।

ॐ नमो विश्वेश्वराय ।

नो दृष्टं गुरुसन्मुखं श्रुतिमुखं नो दर्शनानां मुखं
नो वा वादिमुखं न याजकमुखं नो वा क्रियाणां मुखम् ।
स्फुर्जत्संशयजातजालमथनव्यापारपारङ्गमं
विद्वन्मण्डनमण्डनं कथमहो व्याख्यातुमाचक्ष्महे ॥१॥
क्वाहं मन्दमतिः क्वेदमकूपारविलोडनम् ।
तथापि साहसं कुर्वे तत्क्षन्तः चन्तुमर्हथ ॥२॥

एवं प्रतिनिधौ निरूपिते मुख्यालाभे प्रतिनिधिनाऽप्यननुष्ठितासु क्रियासु ।

उपघातः क्रियालोप उपेक्षा च प्रमादतः ।
चतुर्विधमिदं प्रोक्तं पुनराधानकारणम् ॥
प्रसिद्धः कर्मणां लोप उपघातोऽन्यजादिना ।
उपेक्षा च प्रवासेन प्रमादोऽग्नेरधारणम् ॥

इति वचनात् क्रियालोपवशात् पुनराधानं प्राप्नोति । तत्प्रसङ्ग-सङ्गत्या पुनराधाननिमित्तानि कानिचित् पुनराधेयनिमित्तान्यपि वक्तुमारभते ।

कामे निमित्तयोगे वा पुनराधेयमिष्यते ।
निमित्तेषु यथायोगमाधानमथवा भवेत् ॥ १ ॥

काम इति। कामे इति* निमित्तसप्तमीयं विषयसप्तमी वा। कामनायां सत्याम्। वेत्यथवा। निमित्तस्य यशोभावश्री इत्यादिकस्य योगे प्राप्तौ सत्याम्। पुनराधेयं तत्संज्ञकं काम्यं नैमित्तिकञ्च कर्म इष्यते अङ्गीक्रियते। कल्पकृद्भिरिति शेषः।

कामनायां तावत्। राज्ययशस्कामेति†। अस्यार्थः। राज्ययशस्कामस्य पुनराधेयं भवति। वरुणो हैतद्राज्यकाम आदधे सोमो यशस्काम इति। तथा यशो भवति राज्यं आगच्छति‡ य एवं विद्वानाधत्त इति श्रुतेः।

नैमित्तिकशब्देन केनचिन्निमित्तेन विनष्टस्य पुनः सन्धानात्मकं प्रायश्चित्तापरपर्य्यायं कर्मोच्यते। तच्च भिन्ने जुहोतीत्यादिकम्। भेदननिमित्तेन होमस्य विधानात् तस्य नैमित्तिकत्वम्। पुनराधेयस्यापि यशोभावश्री इत्यादिना नष्टस्याग्निनिष्ठाधान§जन्यसंस्कारापूर्वातिशयस्य(1) पुनरग्नेस्तादृशापूर्वोत्पादकत्वेन नैमित्तिकत्वम्। एवमेव पुनराधानस्यापि। पुनराधेयस्य तु पुनः काम्यत्वमपि। तादृशा-

* इति, — इति नास्ति ङ० पुस्तके।

† इत्थमेव पाठः सर्व्वत्र।

‡ गच्छति, — इति ङ० पुस्तके पाठः।

§ नष्टस्याग्निनिष्ठान, — इति ङ० पुस्तके पाठः।

(1) आधानेन हि अग्निनिष्ठः कश्चित् संस्कारापूर्व्वातिशयः जन्यते, अग्निनाशेन स विनश्यति, पुनराधेयाख्येन कर्म्मणा पुनः स संस्कारापूर्व्वातिशय उत्पद्यते।

पूर्वातिशयनाशाभावेऽपि यशस्कामादीन् प्रति विधीयमानत्वात् । पुनराधेयपुनराधाने इति कर्मणोर्नामधेये संव्यवहारार्थे ।

पुनराधानस्य तु केवलं नैमित्तिकत्वमेवाह । निमित्तेष्विति । निमित्तेषु जातेषु वेत्यथवा आधानं पुनराधानं भवेत् । सर्वेष्वपि निमित्तेषु पत्ते पुनराधानमेव स्यादत आह । यथायोगमिति । युज्यते अनेनेति योगः धर्मो युज्यते शास्त्रेणातो योगः शास्त्रमिति यावत् । तमनतिक्रम्येति, यथायोगं यथाशास्त्रमित्यर्थः । तथा च शास्त्रेण यस्मिन्निमित्ते पुनराधेयं पुनराधानं वाऽऽम्नातमस्ति तत्र तदेव स्यादिति भावः ॥ १ ॥

पूर्वं यथायोगमित्युक्तं, तदेवासन्दिग्धमाह ।

तत्र येषु निमित्तेषु शृङ्ग्याह्निकया विधिः ।
तत्रैव पुनराधेयमन्यथाऽऽधानमिष्यते ॥ २ ॥

तत्रेति । तत्र येषु निमित्तेषु शृङ्ग्याह्निकान्यायेन विधिः पुनराधेयविधिः प्रोक्त इति शेषः । तत्रैव पुनराधेयं स्यात् । अन्यथा पुनराधेयशब्दाभावे । आधानं पुनराधानमिष्यते अङ्गीक्रियते । याज्ञिकैरिति शेषः । तत्र पुनराधानशब्दे विद्यमानेऽविद्यमाने वा, अतिक्रमे तदाग्नीनां* विनाश इत्यादौ नाशलौकिकादिशब्दैः पुनराधानमेव भवतीति शायो वादः† ॥ २ ॥

---

* यातियामेत्तदाग्नीनां, — इति ख॰, घ॰ पुस्तकयोः पाठः ।

† शृङ्ग्याह्निकमिव-शृङ्ग्याह्निकेत्यर्थः, — इत्यधिक पाठः क॰ पुस्तके ।

मतान्तरमाह।

अन्यत्राप्यपरे[*] प्राहुः पुनराधिं विकल्पतः।
अन्ये तृतीयं नियतमग्न्याधेयं[†] वितन्वते ॥ ३ ॥

अन्यत्रापीति। अपरे आचार्या अन्यत्रापि पुनराधेयनिमित्तेष्वपि विकल्पेनेति विकल्पतः सार्वविभक्तिकस्तस्। पुनराधिं पुनराधानं प्राहुः। द्वयोरप्यग्निनिष्ठसंस्कारोत्पादनक्षमत्वात्। सर्वत्राधेयस्थलेऽपि पुनराधानप्राप्तौ मतभेदेनापवादमाह। अन्ये त्विति। अन्ये आचार्याः नियतं नियमेन, तृतीयं अग्न्याधेयं पुनराधेयमेव, वितन्वते विस्तारयन्ति, कुर्वन्तीत्यर्थः। आधानानन्तरं केनचिन्निमित्तेन पुनराधेयपुनराधानान्यतरस्मिन्[‡] कृते पुनः[§] पुनराधानस्याधेयस्य वा निमित्तसम्पाते पुनराधेयमेव भवतीति तृतीयशब्दार्थः ॥ ३ ॥

तत्र प्रथमं काम्यमेवाह।

आधाय वत्सरे तस्मिन् वृद्धीच्छौ[¶] पुनराहितिः।
प्रजां पशूंस्तथा पुष्टिमिच्छतामन्यदाऽपि च ॥ ४ ॥

आधायेति। आधाय अग्नीनिति शेषः। आधानं कृत्वेत्यर्थः। तस्मिन् वत्सरे वृद्धीच्छौ वृद्धेर्वित्तस्य इच्छायां सत्याम्। पुनरा-

* अन्यथाऽप्यपरे, — इति ङ॰ पुस्तके पाठः।

† नियतमन्याधेयम्, — इति ग॰ पुस्तके पाठः।

‡ पुनराधेयपुनराधानान्यतमे, — इति ङ॰ पुस्तके पाठः।

§ पुन, — इति नास्ति क॰, ख॰, घ॰ पुस्तकेषु।

¶ आधानवत्सरे यस्मिन् यदि स्यात्, — इति, आधानवत्सरे यस्मिन् वृद्धीच्छोः, — इति च पाठौ ग॰ पुस्तके।

हितिः पुनराधेयं भवति । अपि च अन्यदा वत्सरादूर्द्धमपि प्रजां सुतादिसन्ततिं पशून् गवादीन् पुष्टिं पुष्टिजनकामादीन् इच्छतां यदा कदाचिदपि पुनराधेयं भवति ॥ ४ ॥

वृद्धिकामत्वेन* पुनराधेयमुक्तमधुना तदेवावृद्धिनिमित्ते नैमित्तिकमाह ।

आधानवत्सरे जातो यद्याधातुरुपद्रवः ।
अवृद्धिर्नाम सा प्रोक्ता तच्च स्यात् पुनराहितिः ॥ ५ ॥

आधानेति । तच्च स्यादिति† । तच्च अवृद्धौ सत्यां, निमित्तसप्तमीयं, पुनराहितिः पुनराधेयं भवतीति शेषः । अवृद्धिलक्षणमाह । आधानेति । आधानस्य वत्सरे वर्षे चेद् यदि आधातुराधानकर्तुर्यजमानस्येति यावत् । उपद्रवो गृहदाहतस्करादिजन्यः । सा अवृद्धिर्नाम प्रोक्ता उक्ता ॥ ५ ॥

निमित्तान्तरमाह ।

यज्ञभागाङ्गवैधुर्य्याद्यदाधानस्य‡ कारणम् ।
आद्ये संवत्सरे तच्चेत्तत्रैव पुनराहितिः ॥ ६ ॥

यज्ञेति । यज्ञस्य भागः यज्ञियद्रव्यम् । अङ्गस्य पाण्यादेर्वैधुर्य्यं राहित्यं नाश इति यावत् । तस्माद्धेतोर्यदाधानस्य कारणं पुन-

---

* वृद्धिकामत्वे, — इति क॰ पुस्तके पाठः ।

† तच्च तस्मामिति, — इति ख॰ पुस्तके पाठः ।

‡ यद्वा स्यादङ्गवैधुर्य्यादयमाधानस्य, — इति ग॰ पुस्तके पाठान्तरम् ।

राधानकारणं निमित्तं कैश्चिदुक्तम्। चेद् यदि तन्निमित्तं आद्ये वत्सरे प्रथमवर्षे जातं, तत्रैव तस्मिन्नेव निमित्ते पुनराहितिः पुनराधेयमेवेति ॥ ६ ॥

पुनराधेयनिमित्तान्येव वक्तुं प्रतिजानीते।

तत्रैतानि निमित्तानि सूत्रकारैरशेषतः।
निरूपितानि वक्ष्यामि पुनराधेयकर्मणि ॥ ७ ॥

तत्रेति। तत्र पुनराधेयकर्मणि सूत्रकारैर्बौधायनादिभिरशेषतः साकल्येन निरूपितानि प्रोक्तानि निमित्तानि वक्ष्यामि। अशेषत इत्यस्य वक्ष्यामीत्यनेनान्वयो वा* ॥ ७ ॥

प्रतिज्ञातमाह।

यद्वित्तं जीवनायालं कुटुम्बस्यैकवत्सरे†।
तन्नाशे पुत्रमर्त्यानां ज्ञातीनामवरोधने ॥ ८ ॥

यदित्यादिपञ्चभिः। यदिति। एकवत्सरे एकवत्सरमभिव्याप्य कुटुम्बस्य वृद्धपित्रादेर्जीवनाय‡ जीवनं कर्तुं अलं पर्याप्तं यद्वित्तं धनं धान्यादि वा। तन्नाशे चौर्यादिना तदपाये पुनराधेयमिष्यते अङ्गीक्रियते। पुत्राश्च ते मर्त्याश्च पुत्रमर्त्याः पुत्ररूपा मनुष्या-अपत्यानीति यावत्। पुमान् पुत्रो जायते इत्यत्र पुंशब्दश्रवणात्

---

* वक्ष्यामीत्यन्वयो वा, — इति क॰, ख॰, घ॰ पुस्तकेषु पाठः।

† क्षुद्रं वाऽस्यैकवत्सरे, — इति ग॰ पुस्तके पाठः।

‡ यजमानापत्यादेर्जीवनाय, — इति ङ॰ पुस्तके पाठः।

पुत्रशब्दस्यापत्यार्थत्वेन दृष्टत्वात्। तेन स्त्र्यपत्यस्यापि सङ्ग्रहः। कन्या त्वविवाहितैव। करभपात्रे विशेषश्रवणेनाविवाहितकन्यासङ्ख्यया कर्त्तव्यत्वेन विहितत्वादिति। पुत्रशब्दस्य सन्ततिवाचकप्रजाशब्दापरपर्यायत्वेन पुत्रपौत्रप्रपौत्रहानौ पुनराधेयमित्यभियुक्ताः।

कथंभूतानां पुत्रमर्त्यानां? ज्ञातीनां सवर्णजातानामित्यर्थः। अथवा, ज्ञातीनां कुलजातानां पुत्रव्यतिरिक्तानामपि, अवरोधने मरणे निमित्ते पुनराधेयमिष्यते इत्युत्तरश्लोकस्थेनान्वयः। मर्त्यायामिति पाठे मर्त्याशब्देन मृतिः। मरणे इति पाठे तु स्पष्ट एवार्थः। अत्र ज्ञातिशब्देन त्रिपुरुषीति विज्ञायते। सा च स्वपितरमारभ्य वेदितव्या। पुत्रभ्रातृपितृमातृबन्धुपशूनामिति यज्ञतन्त्रोक्तेः। अङ्गसम्बन्धकारणाद् बन्धुरिति दुर्गवृत्तिकारः। अवरोधनमुपरोधः स च राजादिकृत इत्यापस्तम्बः। बलवद्भिरपरैर्निरुध्यमानत्वं रुध्यमानत्वं तदेवावरोधनमित्युक्तं श्रीरुद्रदत्तभाष्ये। पूर्वव्याख्यायां गोबलीवर्द्दन्यायेन प्रवृत्तिः *॥८॥

अङ्गनाशेऽङ्गनानाशे पुनराधानमिष्यते।
ज्यानिः सर्वस्वहानिः स्यात् स्पष्टं माध्यन्दिनश्रुतेः॥९॥

अङ्गनाशे इति। तथा अङ्गनाशे पाण्यादिहानौ, अङ्गनानाशे स्त्रीमरणे निमित्ते पुनराधेयमिष्यते। एता निमित्तसमष्टयः। तथाच प्रतिनिमित्तं नैमित्तिकमावर्त्तते। भाष्ये तु अङ्गनाशब्देन कनिष्ठपत्नी आधानाननुप्रविष्टपत्नी वाऽऽग्न्यारम्भणीयोत्तरमजातपूर्व-

* प्रवाक्ति, — इति क॰ पुस्तके पाठः।

मासस्य ज्येष्ठपत्नी वा प्राशेयकम् । ज्येष्ठपत्न्या दोषविशेषेणानधिकारापत्तावेतदिति स्मृतिचन्द्रिकायाम् । एकवत्सरपर्याप्तद्रव्यहानौ पुनराधेयमप्यमन्नं मन्वानस्य कस्यचिन्मतेनाह । ज्यानिरिति । ज्यानिशब्देन सर्वस्वहानिरुच्यते । इति माध्यन्दिनश्रुतेः मकाशात् स्पष्टम् ॥८॥

अतोऽल्पद्रव्यनाशे तु पुनराधिर्न तन्मतात् ।
अग्न्यावपहृतेऽग्न्याधिः सत्याषाढादिदर्शनात् ॥ १० ॥

अत इति । अतः एतस्मादेव कारणात् अल्पद्रव्यनाशे । यस्य यत् सर्वस्वं ततो न्यूनस्वहानौ तन्मताद्धेतोः न पुनराधेयं भवति । तथाच श्रुतिः । योऽग्नीनाधाय सर्वज्यानिं जीयते स पुनरादधीतेति । सर्वस्वशब्दार्थस्तु विश्वजिदधिकरणे ज्ञेयः । सत्याषाढादिदर्शनात् । सत्याषाढः कश्चित् कल्पकारः, स आदिर्यस्य स सत्याषाढादिर्बौधायनमानवादयस्तेषां* दर्शनाच्छास्त्रात् ।

(†"दीपको धूपकश्चैव तापार्थं यश्च नीयते ।
सर्वे ते लौकिकाः ज्ञेयास्तावन्माचापवर्गतः ॥
इदं वचनं चयनविषयमिति मिश्राः ।)† अग्नौ अपहृते चौर्यादिना भ्रान्त्या वा नीते सति अग्न्याधेयं पुनराधेयं भवतीति शेषः ॥१०॥

प्रमीते पुनराधानमृत्विग्भ्रातृपुरोहिते ।
बौधायनमुनिः प्राह नेष्टं सूचान्तरेष्विदम् ॥ ११ ॥

---

* इत्यमेव पाठः सर्व्वत्र ।

† ( ) एतच्चिह्नान्तर्गतः पाठो नास्ति क०, ख०, घ० पुस्तकेषु ।

बौधायनमुनिः, ऋत्विक्भ्रातृपुरोहिते। ऋत्विक् च भ्राता च पुरोहितश्चेति समाहारद्वन्द्वः। तस्मिन् प्रमीते मृते सति पुनराधानं प्राह। इदं ऋत्विगादिमरणनिमित्तं पुनराधानं कल्पान्तरेषु नेष्टं, न भवतीति भावः ॥११॥

आधानाद्यामयावित्वे बह्वृचाः पुनराहितिम्।
कथयन्ति प्रतिज्ञातमंशे तामेव वाजिनः ॥ १२ ॥

आधानेति। आधानस्य आदौ आदिमवर्षे, आमयावित्वे आमयो रोगस्तद्वत्त्वे सति पुनराधेयं बह्वृचाः आश्वलायनाचार्याः कथयन्ति शंसन्ति। अत्रामयशब्देन क्षयादिमहारोगो ग्राह्यः। सामान्यरोगस्य तु नित्यत्वेन[१] नैमित्तिकत्वाभावात्। अतएव यजमानस्य महारोगो वा जायते इति यज्ञतन्त्रोक्तिः सङ्गच्छते। उदरव्याधिरिति वृत्तौ। अन्ये त्वामयोरोग इत्याहुः। तथाच सूत्रम्*। आधानाद्यामयावीति। अत्र यद्यपि प्रथमवर्षे इति सूत्रकृता नोक्तं तथाप्यर्थाल्लभ्यत इत्युक्तं वृत्तौ। नैमित्तिकान्तरमपि तैरेवोदाहृतम्। यदि वार्ध्यर्धयेरन्निति। अस्यार्थः। अर्धा पुत्रपश्वादयः यदि व्यर्धेरन्विपद्येरन्निति। प्रपञ्चितं चैतद्विस्तरतो वृत्तिकृद्भिः। पुत्रपश्वादिविपत्तिनिमित्तस्य पूर्वसूत्रत्वाच्चोदङ्कितं मूले। तामेव पुनराहितिमेव वाजिनो वाजसनेयिनः, तामेकदेशे नामग्रहणमिति

* सत्सूत्रम्, — इति ङ॰ पुस्तके पाठः। एवमुत्तरत्र।

(१) यः कश्चित् स्वल्परोगः शरीरे सर्वदैव न्यूनाधिकभावेन वर्त्तते इति भावः।

न्यायात्। प्रतिज्ञातभंगे प्रतिज्ञातस्य भंगे नाशे सति कथयन्ति। तथाच तत्सूत्रम्। पुनराधेयमाधानाप्रतिज्ञातस्येति। अस्यार्थः। आधानेन: लक्षणेन यस्याप्रतिज्ञातमप्रकाश्यमुपजायते स आधानाप्रतिज्ञात इति भर्तृयज्ञाचार्या व्याचक्षते। यस्याधानसमनन्तरमेव प्रतिज्ञातमपगतं स आधानाप्रतिज्ञात इति कर्कः।

अत्रैवं श्रूयते। यस्याधानमनर्थकं स्यात् स पुनरदधीतेति। तथा, योऽग्नीनाधाय सर्वज्यानिं जीयते स पुनरादधीतेति। सूत्रार्थस्तु, प्रतीतः प्रसिद्धो ज्ञातः प्रतिज्ञातः। प्रादयोगताद्यर्थे प्रथमयेति समासः। यो धनवित्ताध्ययनादिमत्तया प्रसिद्धः पुरुषः, स प्रतिज्ञात उच्यते। न प्रतिज्ञातः अप्रतिज्ञातः। आधानेन लक्षणेन निमित्तेन वा अप्रतिज्ञातः आधानाप्रतिज्ञातः। यः प्रागाधानाल्लब्धप्रतिष्ठोऽपि आधानसमनन्तरं संवत्सरादर्वागेव वित्तमानादिहानेन लाभाभावाद्वा अप्रतिज्ञातोऽप्रसिद्ध इव स्यादप्रतिष्ठ इव भवेत् स एवमुच्यते। तस्येदं दुष्टाग्न्युत्सर्गपूर्वकादुष्टाग्न्युत्पादकं पुनराधेयसञ्ज्ञकं कर्म भवति। तथा चाथर्वणे पठ्यते। आधानादृद्धिश्चेत् संवत्सरादर्वाग् रोहिण्यामग्निहोत्रमुत्सृज्य पुनर्वस्वोः पुनरादधीतेति। शाङ्खायनस्य। काम्यं पुनराधेयमज्ञानानस्येति। अस्यार्थः। आधानसंस्कृतेष्वग्निषु पुत्रादिप्राप्त्यर्थानि कर्माणि कुर्वन्नपि अग्निदोषाद् यः कामान्न प्राप्नोति सो ऽज्ञानन्नित्युच्यते। तस्य दुष्टाग्निपरित्यागेनादुष्टाग्न्युत्पादकतया काम्यं कामेभ्यो हितं पुनराधेयं भवतीत्यर्थः। आपस्तम्बः। अग्नीनाधाय तस्मिन् संवत्सरे यो नर्ध्नुयात् स पुनरादधीत प्रजाकामः पशुकामः पुष्टिकामो जाम्यां पुत्र-

मर्त्यायाम् । मानवे च । श्राहितेषु व्यूध्यमानः पूर्वां पौर्णमासीमुपो-
ष्याग्नये वैश्वानराय द्वादशकपालं निर्वपेत् पौर्णमास्यां ज्वलतो-
विश्विजेदग्न्याधेयेन व्याख्यातविकारांस्तु व्याख्यास्याम इति । काठके च ।
दृष्टो पुनराधेयमिति । तेन भर्तृयज्ञस्तव्याख्यानं युक्तमिवाभाति ।

अथवाऽयमर्थः। प्रतिज्ञानशब्दः प्रियवचनः। कुतः? एतद्वाऽस्य प्रिय-
तमं* प्रतिज्ञाततमं धाम न यथा प्रियः पुत्रो वा हृदयं वेत्यादौ[1]
तथा दर्शनात् । हरिस्वामिभिर्माधवाचार्यैश्च तथैव व्याख्यातत्वाच्च ।
अतः प्रतिज्ञातं प्रियं, न प्रतिज्ञातमप्रतिज्ञातमप्रियमित्यर्थः। आधान-
समनन्तरमेव सर्वस्वहरनिपुत्रमरणप्रतिष्ठाहान्याद्यनिष्टदर्शनेनाधान-
मप्रतिज्ञातमप्रियमनिष्टफलत्वाद्यस्य स आधानाप्रतिज्ञात-
स्तस्य आधानाप्रतिज्ञातस्य पुनराधेयं भवतीति । अयमेव सोज्ज्वलः
सूत्रार्थः। पुत्रमर्त्यायामित्यत्र पुत्रशब्दस्यापत्यमात्रवचनः। नारायण-
वृत्तौ पुमांस एव मे पुत्रा जायेरन्नित्यत्रापत्यवाचित्वोक्तेः। जनयद्
बहुपुत्राणीति लिङ्गात् । पुमान् पुत्रो जायत इति च । पौत्री
मातामहस्तेनेति मनूक्तेः । पुत्र्या अपत्यमित्यर्थे तु स्त्रीभ्योढगिति
पौत्रेय इत्यापत्तेः । न चान्तर्वर्तिनीं विभक्तिमाश्रित्य[2] पुंस्त्ववि-
शिष्टस्यैवापत्यस्य प्रतीतिरिति वाच्यम् । निमित्तगतसङ्ख्यालिङ्गयो-
रविवक्षितत्वेन सिद्धान्तितत्वात्पुत्रशब्दगतं पुंस्त्वमविवक्षितम् ।

* प्रियतमम्, — इति नास्ति क०, ख०, घ० पुस्तकेषु ।

(१) यथा पुत्रः प्रियः हृदयं च प्रियं तथैतद् स्थानं प्रियं न किन्तु
अत्यन्तं प्रियमिति श्रुत्यर्थः ।

(२) पुत्रस्यापत्यमित्यत्र विभाव्यर्थं पुंस्त्वमाश्रित्येत्यर्थः ।

प्रपञ्चितं चैतद्दौहित्रमरण इत्यत्र भास्करभट्टैः। तथाच पुत्रशब्द-स्यापत्यार्थपरतया तन्मर्यैव लिङ्गाविशिष्टपौत्रपौत्र्यादिमर्त्याऽपि(१) निमित्तं भवितुमर्हतीति भावः ॥१२॥

पुनराधाननिमित्तमाह ।

उद्वातेऽग्नौ विहारात्प्राङ्मथ्यमानेऽप्यजन्मनि ।
लोकाग्न्यादावनिक्षिप्तेऽभ्युदयेऽस्तमयेऽपि वा ॥ १३ ॥

उद्वातेति। विहारात् प्राक् विहरणात् पूर्वमग्नावुद्वातेऽनुगते सति मथ्यमानेऽप्यग्नावजन्मनि न विद्यते जन्म यस्य तस्मिन्नजन्मनि सति लोकाग्न्यादौ। आदिशब्देनोद्पात्रकुशवटुब्राह्मणाजानां ग्रहणम्। श्रुतिदर्शनात्। अनिक्षिप्तेऽनिधापिते सति अभ्युदयेऽस्तमये वा निमित्ते जाते ॥१३॥

विशिष्टहेतुनाऽनेन* जातवेदा विनश्यति ।
विहारोत्तरकालं वा नष्टौ पूर्वापरानलौ ॥ १४ ॥

विशिष्टेति। अनेन पूर्वोक्तविशिष्टहेतुना उद्धरणप्राक्कालीनै-काग्न्यनुगमनिमित्तमन्यनाग्न्यजननहेतुकत्वौ किकाग्न्यादिनिधानरा-हित्यविशिष्टास्तोदयकालरूपनिमित्तेन जातवेदा अग्निर्विनश्यति नाशं प्राप्नोति। अत्राग्निशब्देनाग्निनिष्ठाधानजन्यसंस्कारापूर्वं लक्ष्यते। शक्याग्नेर्देवतात्वेन नाशासम्भवादन्वयानुपपत्तेः। पुनराधानं भवतीति

* तेन, — इति ग॰ पुस्तके, तच, — इति क॰, ख॰, घ॰ पुस्तकेषु पाठः।

(१) पुत्रमरणमिव पौत्र्यादिमरणमपीत्यर्थः।

भावः। अथाप्यल्पर्गर्भिणीन्यायेन केवलगार्हपत्योपशमे उभावग्नी इत्यादिनिमित्तसद्भावेन पुनराधेयमेव केचिद् आजगुः।

विहरणात् प्राक् तादृशविशिष्टहेतुनाऽग्निनाश इत्युक्तम्। अधुना विहारोत्तरमपि तादृशेनैव हेतुनाऽग्निनाशो भवतीत्याह। विहारेति। वेत्यथवा। विहारोत्तरकालं यथा स्यात् तथा पूर्वापरौ गार्हपत्याहवनीयौ नष्टावनुगतौ ॥१४॥

शेषं पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति।
वैधं काष्ठमनिर्मथ्य प्रागेवाग्न्युदकादिके ॥ १५ ॥
विन्यस्तेष्वग्निनाशः स्यादुदयास्तमये सति।

शेषं मथ्यमानेऽप्यजननादिकं सर्वं पूर्वोदितं यदि स्यात्तत्रापि तन्निमित्तेऽपि अग्निद्वयं विनश्यति। अग्निरित्येकवचनं जात्यभिप्रायेण। न्यायस्य तुल्यत्वात्। विनाशशब्देन पुनराधेयं भवतीत्याह। यस्योभावग्नी इति विशेषश्रवणात्। अथ विशिष्टहेतावुद्धरणोत्तरकालीनेति विशेषणीयम्। पूर्वोक्तविशिष्टहेतौ मन्थनाग्न्यजननहेतुकेति विशेषणस्य कृत्यमाह। वैधमिति। उद्धरणात्प्रागुत्तरं वाऽग्न्यावनुगते सति वैधं शास्त्रचोदितं काष्ठमरणिरूपमनिर्मथ्यामथित्वा प्रागेव मन्थनात् पूर्वमेव अग्न्युदकादिके विन्यस्तेष्वपि स्थापितेष्वपि[1] उदयास्तमये जाते नाशोऽग्निनिष्ठसंस्कारध्वंसो भवति। पुनराधेयं भवतीति भावः ॥१५॥

---

(१) बहुवचनैकवचनबहुवचनान्तयोरन्वयश्चिन्तनीय। ममतु, विन्यस्तेऽप्यग्निनाशः स्यात्, — इति पाठः प्रतिभाति।

अस्मिन् विषये कर्कमतमाह ।

कालाल्पत्वे त्वनिर्मथ्य लौकाग्न्यादि क्षिपेद्यदि ॥१६॥
उदयास्तमयात् पूर्वं कर्कोऽत्रानाशमिच्छति ।

कालेति । उद्धरणात् पूर्वमुत्तरं वाऽनुगमे कालाल्पत्वे सति, कालस्याल्पत्वं कालाल्पत्वं स्वल्पकालत्वे सति, अस्तोदयभयान्मन्थनारम्भमकृत्वैव यदि चेत् उदयास्तमयात् पूर्वमेव लौकिकाग्न्यादि क्षिपेत् खरे स्थापयेत् । अस्मिन्निमित्ते कर्काचार्यः अनाशं नाशाभावमिच्छति । मन्थनपर्याप्तकाले सति अनिर्मथ्य कृतेऽपि खरे ऽग्निस्थापने पुनराधेयमेवेति भावः ॥१६॥

मतान्तरमाह ।

लौकाग्न्यादावलब्धेऽपि पुराऽर्कास्तमयोदयात् ॥१७॥
मन्थनारम्भमात्रेण नाशो वृद्धैर्निवारितः ।

लौकेति । अर्कस्य सूर्यस्यास्तमयोदयात्पुरा पूर्वं लौकाग्न्यादौ, आदिशब्देनोदकादिके अलब्धे सति अप्राप्ते सति *, स्वल्पकालेऽपि मन्थनस्यारम्भमात्रेण केवलेनारम्भेण वृद्धैः पूर्वाचार्यैर्नाशः संस्कारनाशो निवारितः । न भवतीत्यर्थः । तत्प्रयुक्तं पुनराधेयं पुनराधानं वा न भवतीति भावः । किन्त्वनुगमप्रायश्चित्तमेव । मन्थनारम्भस्तु भस्मस्पर्शेन भवतीत्युक्तं नारायणवृत्तौ ॥१७॥

पूर्वमस्तोदयकालीनोभयानुगमस्य निमित्तत्वमुक्तमधुना तज्ज्ञानस्य निमित्तत्वं मतभेदेनाह ।

---

* अप्राप्ते सति, — इति नास्ति क०, ख०, घ० पुस्तकेषु ।

उभयोद्दानविज्ञानादूर्ध्वमर्कोऽस्तमेति चेत् ॥ १८ ॥
कर्कोऽग्निनाशमाचष्टे पश्चाज्ज्ञाते न दुष्यति* ।

उभयेति । उभयस्याग्न्योर्द्वयोः उद्दानमनुगमस्तस्य ज्ञानाज्ज्ञाना-नन्तरं अर्कोऽस्तं चेत् एति उदयं प्राप्नोति तदा कर्काचार्योऽग्नि-नाशमाचष्टे कथयति । पश्चात् अस्तोदयानन्तरं ज्ञाते अनुगमज्ञानं चेन्न दुष्यति दोषयुक्तो न भवति । अर्थादग्निः । पुनराधेयं तदा न भवतीति भावः ॥१८॥

उभयानुगमेऽपि पुनराधेयं नेति मतान्तरेणाह ।

एकयोनित्वपक्षे तु सर्वाग्न्यनुगमो यदि† ॥ १९ ॥
उदयास्तमये चैव नाशमेके न तूभयोः ।

एकेति । एके आचार्या एकयोनित्वपक्षे, एका योनिरग्निर्येषां ते एकयोनयस्तेषां भावस्तत्वं तस्य पक्षे, सर्वाग्न्यनुगमः सर्वेषां त्रया-णामग्नीनामनुगमो यदि चेत्, तु पुनरुदयास्तमये च रवेर्जाते सत्येव नाशं वदन्ति । नियोगार्थ एवशब्दः । तु पुनरुभयोर्गार्हपत्या-हवनीययोरनुगमे न भवतीत्यर्थः ॥१९॥

तस्मिन्नेव पक्षे सर्वाग्न्यनुगमेऽपि कश्चिद्विशेषमाह ।

अन्यश्चेदुभयोद्दानेऽभ्युदयास्तमयात् पुरा ॥ २० ॥
परोऽग्निरेको जातश्चेत्तावताऽपि न नश्यति ।
तदनुत्पादमात्रेण स्यादग्न्याधिर्न पूर्वयोः ॥२१॥

---

* पश्चाज्ज्ञातेऽपि नेच्छति, — इति ग०, छ० पुस्तकयोः पाठः ।
† यदा, — इति ग० पुस्तके पाठः ।

अत्र इति। उभयोद्वाने उभयानुगमे चेद्यदि अग्न्यस्तद्विषयक-ज्ञानाभाववानित्यर्थः। उदयास्तमयात् पुरा पूर्वं मन्थनेन लौकिकाग्निस्थापनादिना वा परोऽग्निः पाश्चात्योऽग्निर्गार्हपत्य इति यावत्। एकः केवलश्चेद्यदि जातः पश्चादाहवनीयाद्यनुगमज्ञाने जातेऽपि तावता तन्मात्रनिमित्तेन न नश्यति नष्टो न भवति।

तत्रैवं प्रपञ्चः। यत्रोभावग्नी इत्यादिना उभयानुगमो निमित्तम्। तत्रोभयलस्योद्देश्यविशेषणस्यापि विवक्षितत्वेन सिद्धान्तितत्वान्नैकानुगमे पुनराधानमित्येकः पक्षः। अन्तर्गर्भिणीन्यायेन केवलं गार्हपत्यैकाग्न्यनुगमे पुनराधेयमिति द्वितीयः। कर्कमते तूभयानुगमज्ञानं निमित्तम्। तेनोभयानुगमस्यास्तोदयात् प्राक् ज्ञाने पुनराधेयम्। तदुत्तरं ज्ञाने तु न भवति, किन्त्वनुगमप्रायश्चित्तमेव। केचित्तूभयानुगमस्य भिन्नयोनिपरत्वे निमित्तत्वमभिन्नयोनित्वपक्षे तु सर्वाग्न्यनुगमज्ञानस्य निमित्तत्वमाहुः। अत्रापि यमदूरात् परापश्येदित्यादि बोध्यम् ॥२०॥

तदिति। तस्य गार्हपत्याग्नेरनुत्पत्तिमात्रेण, अनुत्पत्तिरेव अनुत्पत्तिमात्रं, तेनाग्न्याधि. पुनराधेयं भवति पूर्वयोराहवनीयदक्षिणाग्न्योरनुत्पत्त्या नेत्यर्थः।

अस्तोदयात् पूर्वमहृतोद्धरणस्य गार्हपत्यस्यानुगमे सत्यन्तर्गर्भिणीन्यायेनोभयानुगमाशङ्का हत्वाचिन्त्येयम् ॥२१॥

केचित्त्वविहृतावस्थे परेऽग्नावनुगच्छति।
नाधानं मन्वते तत्र नोभयानुगमो हि सः ॥ २२ ॥

केचिदिति। अविहृतावस्थे, अकृतविहरणा अवस्था दशा यस्य, विहरणात्प्रागिति यावत्। परेऽग्नौ पाश्चात्येऽग्नौ गार्हपत्येऽनुगते सति, केचित् केचन, तु अप्यर्थे, केचिदपीत्यर्थः। तत्र तस्मिन्निमित्ते आधानं पूर्वोक्तं पुनराधेयं न मन्यते। अत्राधानशब्दोऽनुत्पादकत्वेन पुनराधेये उपचर्यते। हि यस्मात् सः उभयानुगमी न, नैवेत्यर्थः॥ ॥२२॥

यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरित्यनेनास्तोदयकालीनोभयानुगमननिमित्ते नैमित्तिकत्वेनाम्नातस्य पुनराधेयस्येष्ट्यङ्गभूतान्यस्माधानोत्तरकालीन-तादृग्गोभयानुगमननिमित्तेऽपि सति निमित्ते नैमित्तिकमिति न्यायेन कर्त्तव्यत्वेन प्राप्तस्य निवृत्तिं बोधयन् निमित्ताभावमाचष्टे।

अन्वाहितोभयध्वंसेऽप्यग्निनाशो न विद्यते।
अन्वाहितविधिः कार्यो हव्यवाहद्वये पृथक्॥ २३॥

अन्विति। अनु अन्वाधानेनाहितः संस्कृतः अन्वाहितोऽर्थादग्निः। तस्योभयं गार्हपत्याहवनीयरूपं, तस्य ध्वंसोऽभावः, स च साऽऽदिरनन्तः[1]। तस्मिन् सति। यद्वा, अन्वाहितात् अन्वाधानानन्तरं उभयध्वंसे सति। अन्वाहितशब्दोऽत्रान्वाधानवचनः अनुपूर्वकस्या-

(१) स च ध्वंसश्च। घटादिर्ध्वंसोहि मुद्गरपातादिना जायते इत्यसौ सादिः। ध्वंसस्तु कदाचिदपि न नश्यति। तन्नाशे घटाद्युन्मज्जनाप्रत्तेः। अतोऽसावनन्तस्थेत्यर्थः।

तस्माद्यथा तिथेर्होमकालीनस्य भुजिक्रिया ।
नाग्निहोत्राङ्गमेवं न गृहीतानुगमस्त्विह ॥
किन्त्वनादिष्टमात्रेण पुनरुद्धरणं भवेत्" ।

इति वचनात् अनादिष्टमनुगतप्रायश्चित्तम्। अन्वाहितविषेयस्तु कल्पभेदेन नानालाम्बूले नोक्त इति सङ्क्षेपः ॥२३॥

क्वचिदनुगमभ्रान्त्या कृते मन्थने पूर्वाग्निदर्शने च ज्ञाते तत्र किं स्यादिति अनुगमप्रसङ्गान्नैमित्तिकान्तरमाह।

नाशभ्रान्त्या मथित्वाऽग्निं पूर्वाग्निं यदि पश्यति ।
मथिताग्निं समारोप्य पूर्वाग्नौ वर्त्तयेत् क्रियाः ॥२४॥

नाशेति। नाशोऽनुगमस्तद्भ्रान्त्याऽनुगत इति बुद्ध्याऽग्निं मथित्वा तद्द्वारेणोपलब्धिगोचरं कृत्वा पूर्वाग्निं स्वरस्थिताग्निं यदि पश्यति । तदैव मथिताग्निमरणिस्थाग्निं समारोप्य पात्रान्तरे स्वरे वा कृत्वा समारोपविधिनाऽरण्योः समारोप्य* कृत्वा क्रिया होमादिरूपा पूर्वाग्नौ स्वरस्थाग्नौ वर्त्तयेत् कुर्यादित्यर्थः । कालप्राप्तक्रियानुवादोऽयम् । अनुगतभ्रान्त्या मथितस्याग्नेस्त्यागः सर्वप्रायश्चित्तं चेत्युक्तं देवयाज्ञे । समारोपस्य तु नानालाम्बूले नोक्तः। अत्रैव भ्रान्त्योद्धृतस्य पूर्वाग्नेरुपरि निधाने कृते अग्नयेऽग्निमतेऽष्टाकपालः पुरोडाशो भवति पूर्णाहुतिं वा जुहुयात्। कात्यायनेन तु उपस्थानमपि आम्नातम्। एवमाहवनीयदक्षिणाग्न्यन्यतराग्न्यनुगमभ्रान्त्या गार्हपत्यादुद्धरणे कृते

---

* समारोप्य, – इति क॰, ख॰ पुस्तकयोः पाठः।

पश्चात् पूर्वज्ञाने प्रायश्चित्तं कृत्वा आग्न्योद्धृतस्य गार्हपत्यमध्ये पश्चात्प्रक्षेपः कार्यः। अथ सद्भूत्यदोषदुष्टोऽयमग्निरित्येवं बुद्धिश्चेत् तदा इदं प्रायश्चित्तं कुर्यात् । तं* आग्न्योद्धृतमाहवनीयस्य पश्चात् पुरस्ताद्वा स्थापयित्वा उभयत्राग्निद्वये होमं कुर्यात् । तत्रैवं कर्त्तव्यता। खातवतीं प्रणालवद्गुर्वीं पूर्वां समिधमाधाय एकमेव चतुर्गृहीतं तस्यां समिधि होतव्यं, यथा कृतं द्रव्यमुभयोरग्न्योः प्राप्नोति। एवमुभयत्र होमः कृतो भवति । एवमेव आग्न्योद्धृतस्याहवनीयदक्षिणाग्न्योरुपरि निधाने कृते पूर्वोक्तमिष्टिरूपमुपस्थानरूपं वा प्रायश्चित्तं बोध्यमिति सङ्क्षेपः ॥२४॥

प्रागस्तोदयादग्न्यनुगमे लौकाग्न्यादीनामनिक्षेपे च सति पुनराधेयस्य विकल्पमाह ।

उद्दातोदयनिम्रोकाद्† यावदग्निविनाशनम् ।
अग्न्याधिपुनराधेये‡ स्यातां तत्र विकल्पतः ॥ २५ ॥

उद्दातेति । उद्दतोऽनुगमः, उदयश्च निम्रोकश्चेति समाहारद्वन्द्वः । उद्दातादुद्दातमारभ्य उदयनिम्रोकाद्यावदुदयास्तपर्यन्तमित्यर्थः । अग्निविनाशनम्, लौकिकाग्न्यादिक्षेपराहित्येन पूर्वमुक्तम्।

* तं, — इति नास्ति क॰ ख॰ घ॰ पुस्तकेषु ।

† निम्रोकाद्, — इति ग॰ पुस्तके पाठः । एवं परत्र ।

‡ अग्न्याधिपुनराधाने, — इति ग॰ पुस्तके पाठः ।

तत्र तस्मिन्निमित्ते सति । अग्न्याधिपुनराधेये । पुनराधानपुनराधये विकल्पतो विकल्पेन स्यातां भवतः । तदुक्तं यज्ञपार्श्वे,—

"उद्वासनमथापूर्वं गार्हपत्यो गतो यदि ।
भस्मनाऽरणिमारोप्य तूर्णं कुर्यात्तु मन्थनम् ॥
मथ्यमानो न जायेत लौकिकान्यादिकं क्षिपेत् ।
ततो विहरणं कृत्वा होमं कुर्याद्यथाविधि ॥
यद्यग्न्यादावनिक्षिप्ते उद्वासनमयो भवेत् ।
खरस्थानं यदा शून्यं तदा स्यात् पुनराहितिः" ॥ इति ।

पुनराहितिपदस्योभयवाचकत्वादिति ॥२५॥

निमित्तान्तरमाह ।

मन्त्रं विना समारूढोऽरण्योरात्मनि वा यदि ।
तत्र ज्वलनशान्तौ* स्यादसमारूढशान्तिवत् ॥ २६ ॥

मन्त्रेति । अरण्योः, वेत्ययथवा, मन्त्रं समारोपमन्त्रं विना भ्रान्त्या मन्त्रान्तरेण† समारूढः कृत इति शेषः । ततो ज्वलनशान्तौ खरस्थाग्न्युपशमे तत्र तस्मिन्निमित्ते सति असमारूढशान्तिवत् असमारोपितस्य शान्तिस्तया तुल्यं स्यात् । अनुगमप्रायश्चित्तं मथनपूर्वकं भवतीति भावः । ‡समारोपित इति बुद्ध्या मथनानुगमप्रायश्चित्ते चेन्न करोति तदा तृतीयहोमकालात्प्राक् ज्ञाते मन्थनादि कार्यम् । तदूर्ध्वंज्ञाते तु पुनराधानमिति ‡ ॥२६॥

---

* शान्ति', — इति ग॰ पुस्तके पाठः ।
† मन्त्रान्तरेण वा, — इति ङ॰ पुस्तके पाठः ।
‡ ‡ अयमंशः ख॰ घ॰ पुस्तकयोस्त्रुटितः ।

इत्यवरोहणमन्त्रं विनाऽप्येतदेव नैमित्तिकं भवतीत्याह ।

आरूढोऽपि यथाशास्त्रमवरूढो न शास्त्रतः ।
तृतीये होमकाले वा सम्प्राप्ते पुनराहितिः ॥ २७ ॥

आरूढेति । यथाशास्त्रं, शास्त्रमनतिक्रम्येति यथाशास्त्रं मन्त्रः* । तेन आरूढः समारोपितोऽपि, यदीति पूर्वोक्तमाहार्य्यम् । शास्त्रतोऽमन्त्रेण नावरूढः, प्रत्यवरोहणमन्त्रं विना अन्यथाऽन्यमन्त्रेण वाऽवरूढोऽपि नावरूढस्तदा तृतीयहोमकालात्प्रागवरोहणमन्त्रपूर्वकं मन्थनं कार्य्यम् । तृतीयात् परन्तु पुनराहितिः स्यात् । इदन्तु शाखान्तरविषयम् । कस्यांचिदवरोहणस्यानाम्नानात् ।

यद्वा हेतुपरतया व्याख्येयम् । तद्यथा । आरूढेति । यथाशास्त्रं शास्त्रोक्तविधिना शास्त्रोक्तक्रिययेति यावत् । आरूढोऽपि शास्त्रतः शास्त्रेण सार्वविभक्तिकस्तस् । नावरूढोऽरणिमात्मानं वा प्राप्तः । अनेनेदं कर्म कर्त्तव्यमिति नियमविध्यन्यथाभावात् । विद्यमानेऽग्नौ यथोक्तः समारोपोधारणं वा कार्य्यम् । उपशान्तौ तु भस्मस्पर्शादि प्रायश्चित्तहोमान्तं कार्य्यम् । अथ मन्थने क्रियमाणे चेदग्निर्न जायेत तत्र किं स्यादत आह । तृतीयेति । स्वरस्याम्यसुगमोत्तरं मथ्यमानेऽप्यजनमनीत्यध्याहार्य्यम् । असमारूढशान्तिवदित्युक्तत्वात् तृतीये होमकाले सम्प्राप्ते पुनराहितिः पुनराधानं भवतीति । वा शब्दोऽवधारणे । तदुक्तम् ।

---

* शास्त्रमात्र', — इति ङ॰ पुस्तके पाठः ।

"अग्नावनुगते यस्य होमकालद्वयं भजेत् ।
उभयोर्विप्रवासे वा पुनराधानमर्हति" ॥२७॥

प्रागस्तोदयादग्न्यनुगमे लौकिकाग्न्यादिषु होमं सम्पाद्य मन्थनं कार्यमित्युक्तमधुना तदवधिकथनपूर्वकं पुनराधाननिमित्तमाह ।

यदा तु लौकिकाग्न्यादि निधाय हवनं तदा ।
हुतेऽपि लौकिकाग्न्यादौ मथ्यमानोऽप्यनन्तरम् ॥ २८ ॥
द्वितीयाद्वा तृतीयाद्वा होमकालात्पुरा यदि ।
अग्निर्न जायते तत्र पुनराधानमाचरेत् ॥ २९ ॥

यदेति द्वाभ्याम् । यदा यस्मिन् काले लौकिकाग्न्यादि निधाय तदा तस्मिन् काले तस्मिन्नेवाग्नौ हवनं कार्यमिति शेषः । न तूत्तरभाविमथिताग्नौ ।

तु पुनरर्थे । लौकिकाग्न्यादौ हुतेऽपि अनन्तरं होमानन्तरं मथ्यमानोऽपि अग्निः द्वितीयाद्वा तृतीयाद्वा होमकालात् पुरा यदि न जायते तत्र पुनराधानमाचरेत् । होमस्तु लौकिकाग्नौ एक एव । द्वितीयहोमकालात्प्राक् अजनने पुनराधानमिति रामाण्डारः । शाङ्खायनसूत्रे अग्न्यवस्थसात्मन्यरण्योः समिधि नाग्निं समारोपयत इति । होमस्तु समारोपमथ्यमानविषयो नानुगतमथ्यमानविषयइत्युक्तं वृत्तौ ॥ २८ ॥ २९ ॥

लौकिकाग्निनिधानात्प्रागुत्तरं वा भस्मस्पर्शादिविशिष्टाग्न्युत्पत्तिरेव पुनराधाननिवर्त्तिकेत्याह ।

जातोऽपि वा विना भस्मस्पर्शं जातजपं विना।
प्रायश्चित्तं विना काष्ठं मन्थने चोदितं विना॥ ३०॥
लौकिकः स्यादतो लुप्तादारभ्यावर्त्तयेत् पुनः।

जातेति। भस्मस्पर्शं विना यस्मिन् गोमयपिण्डे दारुणि वाऽग्न्युपशमस्तद्भस्मनाऽरण्योः स्पर्शमन्तरेण मन्थनात् प्रथम-द्वितीय-तृतीयहोमकालात्प्राक् जातोऽपि लौकिकः स्यादित्युत्तरस्येन लौकिकपदेनान्वयः प्रत्येकं बोध्यः। यत्राग्न्युपशमस्तद्भस्मनाऽरणी संस्पृशेदिति वचनात्।

एवं, जातजपं विना जातोऽपि लौकिकः स्यात्। इदञ्च जातजपाभावरूपं पुनराधाननिमित्तं यस्यां शाखायां जातेऽग्नौ जातजपोविहितोऽस्ति तच्छाखापरम्। एवं जातोऽपि प्रायश्चित्तं विना लौकिकः स्यात्। अत्र प्रायश्चित्तशब्देनानुगतप्रायश्चित्तमेवोच्यते। तथाच प्रमादादिना प्रायश्चित्ताकरणेन लौकिको भवति।

अत्र केचित्। भस्मस्पर्शरूपस्यैवादिष्टप्रायश्चित्तस्य कृतत्वादन्यदनुगतप्रायश्चित्तं न भवति तेनानुगतप्रायश्चित्ताभावेऽपि लौकिकत्वं नेत्याहुः। परे तु भस्मस्पर्शस्याग्निहोत्रप्रकरणपठितत्वेन तत्परत्वात्तत्रैव भस्मस्पर्शो नान्यत्र। तद्व्यतिरिक्ताग्न्यनुगमे भस्मस्पर्शो न भवति किन्त्वनुगतप्रायश्चित्तमेवेति कर्काः। तदुक्तं रेणुकाचार्य्यैः।

"विहारकालादन्यत्र यदा नर्य्योऽनुगच्छति।
मथित्वा नर्य्यमुद्धृत्यानादिष्टं तत्र हूयते"॥ इति।

मन्थने चोदितं काष्ठं विना प्रमादादिना प्रमन्थान्तरेण भ्रान्त्या

वा लौकिकारणीभ्यां जातोऽपि लौकिकः स्यात् । एवमचोदित-पाकादिकमपि पुनराधानप्रयोजकम् ।

"अचोदितेन पाकेन कृतेनोद्धरणेन च ।

लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति" ॥

इति बौधायनीयात् । अतो यस्मादग्निविनाशो जात इति हेतो-र्लुप्तात् लुप्तपदार्थाद्वास्वर्गादिरूपादारभ्य यस्य पदार्थस्य भस्म-स्वर्गादिर्लोपो जातस्तमारभ्य पुनरावर्त्तयेत् । यदि स्वर्गो विहितो-जातजपस्तत्कृतस्तदा जातजपमारभ्यावृत्तिः, स्वर्गस्य कृतत्वात् । एव-मूह्यम् ॥२०॥

अकृतस्वर्गादिपदार्थानां कालावधिमाह ।

यदि नावर्तयेदग्नौ तादृश्येव जुहोति च ॥ २१ ॥
हूयमानेऽपि लुप्येत होमकालाष्टकात्परम् ।

यदीति । प्रमादादालस्याद्वा यदि नावर्तयेत् पुनरावृत्तिं न कुर्यात्तादृश्येव स्वर्गादिरहिते एव चेत् जुहोति, तदा अष्टमहो-मकालमभिव्याप्य लौकिको न भवति । इत ऊर्ध्वं होमकालाष्ट-कात्परं हूयमानेऽपि सति लुप्यते*। अग्निनिष्ठः संस्कार इति शेषः । लौकिको भवतीति भावः ।

इदमत्राकूतम् । अष्टमहोमपर्यन्तं तथाविधेऽप्यग्नौ कृतानां कर्मणां फलजनकत्वमव्याहतं तदुत्तरं तु नैष्फल्यमिति होमाधि-करणस्य लौकिकत्वात् । तेन लुप्तपदार्थस्य विस्मृत्या स्मरणोत्तरं चतुर्षु दिवसेषु मध्ये करणं इत ऊर्ध्वं पुनराधानमेव ॥२१॥

* लुप्यते,– इति ख० घ० पुस्तकयोः पाठः ।

जातोऽपि वा विना भस्मस्पर्शं जातजपं विना ।
प्रायश्चित्तं विना काष्ठं मन्थने चोदितं विना ॥ ३० ॥
लौकिकः स्यादतो लुप्तादारभ्यावर्त्तयेत् पुनः ।

जातेति । भस्मस्पर्शं विना यस्मिन् गोमयपिण्डे दारुणि वाऽग्न्युपशमस्तद्भस्मनाऽरण्योः स्पर्शमन्तरेण मन्थनात् प्रथम-द्वितीय-तृतीय-होमकालात्प्राक् जातोऽपि लौकिकः स्यादित्युत्तरस्थेन लौकिक-पदेनान्वयः प्रत्येकं बोध्यः। यदाग्न्युपशमस्तद्भस्मनाऽरणी संस्पृशेदिति वचनात् ।

एवं, जातजपं विना जातोऽपि लौकिकः स्यात् । इदञ्च जातजपाभावरूपं पुनराधाननिमित्तं यस्यां शाखायां जातेऽग्नौ जातजपो विहितोऽस्ति तच्छाखापरम् । एवं जातोऽपि प्रायश्चित्तं विना लौकिकः स्यात् । अत्र प्रायश्चित्तशब्देनानुगतप्रायश्चित्तमेवोच्यते। तथाच प्रमादादिना प्रायश्चित्ताकरणेन लौकिको भवति।

अत्र केचित् । भस्मस्पर्शरूपस्यैवादिष्टप्रायश्चित्तस्य कृतत्वादन्यदनुगतप्रायश्चित्तं न भवति तेनानुगतप्रायश्चित्ताभावेऽपि लौकिकत्वं नेत्याहुः । परे तु भस्मस्पर्शस्याग्निहोत्रप्रकरणपठितत्वेन तत्परत्वात्तत्रैव भस्मस्पर्शो नान्यत्र। तद्व्यतिरिक्ताग्न्यनुगमे भस्मस्पर्शो न भवति किन्त्वनुगतप्रायश्चित्तमेवेति कर्काः। तदुक्तं रेणुकाचार्यैः ।

"विहारकालादन्यत्र यदा नश्योऽनुगच्छति ।
मथित्वा नश्यमुद्धृत्यानादिष्टं तत्र हूयते" ॥ इति ।

मन्थने चोदितं काष्ठं विना प्रमादादिना प्रमन्थान्तरेण भ्रान्त्या

वा लौकिकारणीभ्यां जातोऽपि लौकिकः स्यात् । एवमचोदित-पाकादिकमपि पुनराधानप्रयोजकम् ।

"अचोदितेन पाकेन हृतेनोद्धरणेन च ।
लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति" ॥

इति बौधायनीयात् । अतो यस्मादग्निविनाशो जात इति हेतो-र्लुप्तात् लुप्तपदार्थादग्न्यस्पर्शादिरूपादारभ्य यस्य पदार्थस्य भस्म-स्पर्शादिर्लोपो जातस्तमारभ्य पुनरावर्त्तयेत् । यदि स्पर्शो विहितो-जातजपस्तत्कृतस्तदा जातजपमारभ्यावृत्तिः, स्पर्शस्य कृतत्वात् । एव-मूह्यम् ॥२०॥

अकृतस्पर्शादिपदार्थानां कालावधिमाह ।

यदि नावर्तयेदग्नौ तादृश्येव जुहोति च ॥ २१ ॥
हूयमानेऽपि लुप्येत होमकालाष्टकात्परम् ।

यदीति । प्रमादादालस्याद्वा यदि नावर्तयेत् पुनरावृत्तिं न कुर्यात्तादृश्येव स्पर्शादिरहिते एव चेत् जुहोति, तदा अष्टमहो-मकालमभिव्याप्य लौकिको न भवति । इत ऊर्ध्वं होमकालाष्ट-कात्परं हूयमानेऽपि यति लुप्यते*। अग्निनिष्ठः संस्कार इति शेषः। लौकिको भवतीति भावः ।

इदमत्राकूतम् । अष्टमहोमपर्यन्तं तथाविधेऽप्यग्नौ कृतानां कर्मणां फलजनकत्वमव्याहतं तदुत्तरं तु नैष्फल्यमिति होमाधि-करणस्य लौकिकत्वात् । तेन लुप्तपदार्थस्य विस्मृत्या स्मरणोत्तरं चतुर्षु दिवसेषु मध्ये करणं इत ऊर्ध्वं पुनराधानमेव ॥२१॥

* क्षुप्यते,—इति ख० घ० पुस्तकयोः पाठः ।

भस्मस्पर्शस्य पुनराधाननिमित्तानित्यतां मतान्तरकथनेनाह।

भस्मस्पर्शं विनाऽप्येके लौकिकत्वं न मन्वते ॥ ३२ ॥
होमाष्टकाऽधिके लुप्ते धृतोऽप्यग्निर्विनश्यति।
ततोऽल्पहोमलोपेऽपि यद्युद्रायेद्विनश्यति ॥ ३३ ॥
आधानपुनराधाने विकल्पेनात्र चोदिते।

भस्मेति। एके आचार्या भस्मस्पर्शं विनाऽपि लौकिकत्वं न मन्वते। अर्थादग्नेः। क्रियालोपनिमित्ते पुनराधेयं भवतीत्याह। होमेति सार्द्धेन। धृतोऽपि ज्वलमानोऽप्यग्निर्होमानामष्टकं तस्मादधिके होमे लुप्ते सति विनश्यति नष्टसंस्कारो भवति। ततो-होमाष्टकादल्पहोमलोपेऽपि यदि उद्रायेदनुगमम्प्राप्नुयात् तर्हि विनश्यति। द्वित्रिचतुर्होमलोपेऽपि नष्टो भवति। विद्यमाने तु होमाष्टकपर्यन्तं नाशोन, तदुत्तरं नाशोऽग्नेरिति भावः।

अत्रास्मिन् निमित्ते आधानपुनराधाने। आधानशब्देन पुनराधेयमुच्यते तत्राप्यग्न्युत्पादकत्वेनाधानपदस्य भाक्तव्यवहारात्। विकल्पेन चोदिते। आधेयं पुनराधानं वा भवतीति भावः ॥ ३२॥३३॥

अत्र लौगाक्षिमतमाह।

लुप्ते होमद्वये प्राह लौगाक्षिरनिलाहितिम् ॥ ३४ ॥
ज्वलत्स्वग्निषु कर्तव्या तन्तुमत्येव केवला।

लौगाक्षिनामा ऋषिर्होमद्वये लुप्ते सति पुनराहितिं पुन-

राधानं प्राह । तथा चैतत्कृतेनाग्निष्वसत्सु होमद्वयलोपे पुनराधानमेव भवति । तथाचोक्तं भृगुणा ।

"होमद्वयात्यये दर्शपूर्णमासात्यये तथा ।
पुनरेवाग्निमादध्यादिति भार्गवशासनमिति" ॥

विद्यमानेष्वग्निषु तु पुनराधानं नेत्याह । ज्वलत्स्विति । अग्निषु ज्वलत्सु विद्यमानेषु केवला एकहविष्का तन्तुमत्येव तन्तुमतीष्टिरेव कर्तव्या । होमाष्टकलोपे ततोऽधिकलोपेऽपि पुनराधानं नेति * पूर्वस्माद्भेदः । यद्वा केवलां तन्तुमतीष्टिं कृत्वाऽप्यनिवृत्तौ अतिक्रान्त होमान् कृत्वैव होमाः कार्या इति केवलशब्दार्थः ॥३४॥

इदमापद्विषयकमित्याह ।

आपद्यग्निषु दीप्यत्सु मासार्द्धं चेन्न हूयते ॥ ३५ ॥
सर्वहोमानतिक्रान्तान् पश्चान्ते पक्षहोमवत् ।
समस्य जुहुयात्पश्चादिष्टिस्तन्तुमती भवेत् ॥ ३६ ॥
न तत्र पुनराधेयमिति कौषीतकी श्रुतिः ।

आपदीति । आपदि राष्ट्रभ्रंशादिविपत्तौ अग्निषु दीप्यत्सु विद्यमानेषु सत्सु मासार्द्धं पक्षपर्यन्तं न हूयते होमो न क्रियते चेत्, अतिक्रान्तान् सर्वहोमान् दिनसङ्ख्यात † सायं प्रातर्होमान् पक्षहोमवत् समस्य समासं कृत्वा जुहुयात् । पश्चादनन्तरं तन्तुमतीसंज्ञका इष्टिः प्रायश्चित्तं भवेत् । तत्र पुनराधानं पुनराधेयं

---

* विकल्पेन नेति, – इति ख॰ पुस्तके पाठः ।

† 'दिनसंख्यात', – इति क॰ पुस्तके पाठः ।

वा विकल्पेनोक्तं न भवेदिति कौषीतकी श्रुतिर्ब्राह्मणम्। पञ्च-होमवदित्युपलक्षणम् । तेन पञ्चन्यूनहोमलोपेऽपि तावद्दिनमध्यात-होमान् कृत्वा तन्तुमतीष्टिः ।

अत्रातिक्रान्तहोमकरणमिति लौगाक्षिमतान्नेदः। स्वकाला-दुत्तरोगौण इत्युक्तेर्गौणोऽप्यत्रेदृशो भवेदित्युक्तेश्च होमकरणं युक्तम् ॥ २५॥२६॥

आपदि पक्षादूर्ध्वमपि होमलोपे नाग्निनाश इति मतान्तरेणाह षड्भिः ।

वत्सरं वत्सरार्द्धं वा होमलोपे मतान्तरात् ॥ ३७ ॥
आपत्काले न नश्यन्ति दीप्यन्ते चेद्धुताशनाः ।

वत्सरं वत्सरपर्यन्तमित्यर्थः । कालाध्वनोरत्यन्तसंयोगे इति द्वितीया। वेत्यथवा। वत्सरार्द्धं वर्षस्यार्द्धं षण्मासपर्यन्तम् । आपत्काले दुर्भिक्षादिना महापदि होमलोपे सति हुताशनाश्चेद्दीप्यन्ते अनु-गताः कदाचिदपि न भविष्यन्ति, तर्हि न नश्यन्ति पुनराधानं नेत्यर्थः । बहुवचनमन्तरागर्भिणीन्यायेन बोध्यम् । नित्यधारिल-पक्षाभिप्रायेण वा । यद्यनुगमनं समारोपो वा तदा पुनराधान-मिति पूर्वोक्तं ज्ञेयम् । समारूढाग्नेरप्येकाहाद्यग्निहोत्रानारम्भे तन्तु-मतीं कृत्वा प्रतिहोमं मनस्वतीं च प्रायश्चित्तमित्युक्तं प्रायश्चित्त-प्रदीपे ॥२७॥

वत्सरार्द्धोत्तरमापन्निवृत्तौ अतिक्रान्तहोमान् कृत्वा पथकृदवि-ष्टेष्टिः कार्येत्याह ।

पञ्च कार्याः पुरोडाशा होमे लुप्तेऽर्द्धवत्सरम् ।
पथिकृत् प्रथमो ज्ञेयः पावकः शुचिरेव च ॥ ३८ ॥
व्रतपतिस्तन्तुमांश्चाग्नेर्देवतायाः गुणाः क्रमात् ।
सप्त कुर्यात पुरोडाशान् होमे लुप्ते तु वत्सरम् ॥ ३९ ॥
पवमानः पावकश्च शुचिः पथिकृदित्यपि ।
वैश्वानरो व्रतपतिस्तन्तुमानिति सप्तभिः ॥ ४० ॥
विशेषितोऽग्निरेव स्याद्देवताञ्च यथाक्रमम् ।

पञ्चेति । अर्द्धवत्सरं, वत्सरस्यार्द्धमित्यर्द्धवत्सरं, होमे लुप्ते सति । एकवचनं सामान्याभिप्रायेण । पञ्च पुरोडाशाः कार्याः । तानाह । प्रथमः पथिकृत् ज्ञेयः, द्वितीयः पावकः, तृतीयः शुचिरेव चेत्यपरः, चतुर्थो व्रतपतिः, पञ्चमस्तन्तुमान् । एते पथिकृदादयोऽग्नेर्देवतायाः क्रमात् गुणा विशेषणानि भवन्ति । तथाचाग्निः पथिकृदेको,ऽग्निः पावको, ऽग्निः शुचि, रग्निर्व्रतपति, रग्निस्तन्तुमान् क्रमेण देवता भवन्ति । द्रव्यदेवताग्रहणाद्यागोविधीयते । स चैकतन्त्रेण पृथक् तन्त्रेण वा भवति । वत्सरं होमे लुप्ते सति तु सप्तसङ्ख्याकान् पुरोडाशान् कुर्यात् । सप्तहविष्कैकेष्टिः । पवमानेष्ट्यादिसप्त वा प्रायश्चित्तेष्टीः कुर्यात् । अत्र यथाक्रमं क्रममनतिक्रम्य सप्तभिर्विशेषितो विशिष्टोऽग्निरेव देवता स्यात् । तत्र पवमान एकोगुणः, पावको द्वितीय इत्यादयः सप्त गुणाः, तद्विशिष्टः । अग्निः पवमान-एकः अग्निः पावको द्वितीयोऽग्निः शुचिस्तृतीयोऽग्निः पथिकृच्चतुर्थोऽग्निर्वैश्वानरः पञ्चमोऽग्निर्व्रतपतिः षष्ठोऽग्निस्तन्तुमान् सप्तम इति

देवता भवन्ति। अत्र पक्षादूर्ध्वमपि होमलोपे नाधानमिति कौषीतकमताद्भेदः ॥३८॥३९॥४०॥

घोरापद्विषयमाह ।

एकारभ्यपरार्द्धान्तविच्छेदेष्वविशेषतः ॥ ४१ ॥
मनस्वतीं व्रतयुतां नाधानमनले सति ।

एकेति । अर्थाद्धोमानामेकारभ्यपरार्द्धान्तविच्छेदेषु एकहोमलोपमारभ्य परार्द्धसङ्ख्यान्तहोमलोपेषु । अत्र परार्द्धपदमनेकवाचकत्वे भाक्तम् । यावज्जीवनिमित्तस्य तत्कालमध्यपातित्वाच्छक्यार्थानुपपत्तेः[१] । दृष्टश्चैतत् सहस्रसंवत्सरं सत्रमुपासीरन्नित्यत्र । अनले सति, खरे विद्यमाने अरण्योर्वा समारोपिते, आधानं पुनराधानं नेति । अत्र यत्र यत्राधानपदं तत् मुख्यार्थान्वयानुपपत्तेः पुनराधानं लक्षयति । किन्तु अविशेषतः व्रतयुतां व्रातपतेष्टिसहितां मनस्वतीं तत्सञ्ज्ञिकामाहुतिं जुहुयादिति शेषः । तेन एकहोमलोपे यावज्जीवहोमलोपे च नाधानं व्रातपत्येष्टिमनस्वतीहोमरूपं प्रायश्चित्तं घोरापदिनिवृत्तौकार्यमित्युक्तं भवति ॥४१॥

इयमापत्सु घोरासु मिलितास्वपयोश्च्यते ॥ ४२ ॥
द्वादशाहुतिविच्छेदे * कुर्वन्त्यन्ये मनस्वतीम् ।

* द्वादशाहाहुतिच्छेदे, — इति ग॰ पुस्तके पाठः ।

(१) यावज्जीवं खल्वग्निहोत्रादिकं कर्त्तव्यतया चोद्यते । जीवनकालस्च शतायुर्वै पुरुष इत्युक्तलक्षणः । एवञ्च परार्द्धसंख्यकहोम एव जीवनकाले न सम्भवति कुतस्तल्लोप सम्भवः । एवञ्चानायत्या परार्द्धपदमनेकबोधकमिति भावः ।

* मनोज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो या अनिष्टास्ताः सन्तनोमि मनसा घृतेन स्वाहा । इति ।

इयमिति । इयं व्रतयुता मनस्वती घोरासु दुर्घटासु आपत्सु मिलितासु एककालं प्राप्तासु उपयोक्तव्या, नान्यथा । पयोपस्रवेऽर्थ्या होमद्रव्याद्यभावे शरीरापाटवे च प्रसक्तौ । मतान्तरमाह । अन्ये आचार्या द्वादशाहुतिविच्छेदे मनस्वतीं कुर्वन्ति । तदूर्ध्व-माधानमेव भवति । इदं स्वल्पापद्विषयमिति मिश्राः । मनस्वती मन्त्रपाठमाह । मनोज्योतिरिति ॥४२॥

निमित्तान्तरमाह ।

नाशदाहावरण्योश्चेदग्निं यत्नेन पालयेत् ॥ ४३ ॥
अन्यारण्योर्यावदेव नारोप्य मथितः पुनः ।
उद्वाने पुनराधानं छन्दोगपरिशिष्टतः ॥ ४४ ॥

नाशेति । अरण्योश्चेन्नाशदाहौ स्तः । नाश उपघातः । दाहः प्रसिद्धः । तदा तावत्कालपर्यन्तं अग्निं यत्नेन पालयेत् । यावदेव अन्यारण्योरारोप्य पुनर्न मथितः । तत्पूर्वमुद्वाते[†] अनुगते सति पुनराधानं छन्दोगपरिशिष्टतः भवतीति शेषः ॥४३॥

अधिकरणप्रसङ्गादाह ।

---

* यत्र मनस्वतीपाठाभ्यादृशः । तद्यथा । इत्यधिकं ग॰ पुस्तके । ङ॰ पुस्तके मनोज्योतिः,—इत्येतावन्मात्रं वर्त्तते । पुस्तकान्तरेषु नास्त्ययं मन्त्रः ।

[†] इत्यमेव पाठः सर्व्वत्र ।

आत्मारोपे शरीरस्य नाशे नश्यति पावकः।
शवदेहे विनष्टेऽपि दक्षिणः पाणिरस्ति चेत् ॥ ४५ ॥
लोकाग्नौ स्थापयित्वाऽस्य पाणिं पुत्रो जपेद्यजुः।
उपावरोह जातेति तूष्णीमग्निं नयेत्ततः ॥ ४६ ॥
द्वादशोपात्तेनाज्येन तूष्णीकं जुहुयात् स्रुचा।
हस्तस्यातः प्रपद्येत प्रेतेऽमात्या इतिक्रियाः ॥ ४७ ॥
सकले कुणपे लब्धेऽप्ययेष एव विधिर्भवेत्।
अग्न्यावरण्योरारूढे प्रमीयेत पतिर्यदि ॥ ४८ ॥
प्रेतं स्पृष्ट्वा मथित्वाऽग्निं जप्त्वा चोपावरोहणम्।
घृतञ्च द्वादशोपात्तं तूष्णीं हुत्वा शवक्रियाम् ॥ ४९ ॥

उपावरोह जातवेद इमं प्रेतं स्वर्गाय लोकाय नय प्रजानन्। आयुः प्रजाः रयिमस्मासु धेहि प्रेताहुतीश्चास्य जुषस्व स्वाहा। इत्युपावरोहणमन्त्रपाठः।

आत्मेति। आत्मारोपे शरीरस्य नाशे सति पावकः नश्यति। नारणीनाशे। अत्र शरीरनाशशब्देन शवालाभ उच्यते। स च व्याघ्रादिभक्षणेन जलप्रवाहादिना वा भवति। तत्र व्याघ्रादिना, शवदेहे शवरूपं देहं* तस्मिन् विनष्टेऽपि चेत् दक्षिणः पाणिरस्ति, तदा न नाशः। तत्र किं स्यादत आह। लोकेति। अस्य शवस्य पाणिं लोकाग्नौ स्थापयित्वा पुत्रः पुत्रादिरुपावरोहजातेति यजुर्जपेत्। ततस्तूष्णीमग्निं नयेत्। यस्यां शाखायां श्मशानं प्रति नयने

* इत्यमेव पाठ सर्व्वत्र।

मन्त्राभावं तन्मा भूदित्यभिप्रायपरं तूष्णीं पदम् । ततः पितृभूमौ तस्मिन्नेवाग्नौ दादशोपात्तेन द्वादशवारं गृहीतेनाज्येन स्रुचा तूष्णीकं जुहुयात् । प्राकृतमन्त्रनिषेधार्थं तूष्णीकं पदम् । अतः परं अमात्या यष्टपुरुषाः पुत्रादयः प्रेते इतिक्रियाः पात्रविन्यासादयः, ताः सर्वाः पृच्छ्य कुर्युः । यदि सकले कुणपे शवे लब्धे* तथापि एषएव विधिर्भवेत् नाग्निनाशः । पृच्छ्य शवस्य चालाभे तु अस्थ्नां प्रेता-धानपूर्वकोदाहः । तेषामप्यलाभे तत्पूर्वकः पर्णशरदाहः । आत्म-समारोपणविषयमेतत् । समह्नादरणिसमारोपविषयमाह । अग्ना-विति । अरण्योरग्नावारूढे यदि पतिर्म्रियेत, प्रेतं स्पृष्ट्वा उपावरोहणं यजुर्जप्त्वाऽग्निं मथित्वा तस्मिन्नग्नौ द्वादशोपात्तं घृतं तूष्णीं हुत्वा शव-क्रियाः कुर्युरिति शेषः । उद्वमन्त्रार्थं मन्त्रपाठमाह । उपावरो-हेति ॥४४॥४५॥४६॥४७॥४८॥४९॥

विच्छिन्नाग्न्यादिविषयमाह ।

विच्छिन्नवह्निमुत्सृष्टपावकं विधुरानलम् ।
आहिताग्निं मृतं दग्धुं त्रेताग्न्युत्पत्तिसिद्धये ॥ ५० ॥
भरद्वाजादयः प्राहुः प्रेताधानविधिं पृथक् ।

विच्छिन्नवह्निं विच्छिन्नाग्निं उत्सृष्टपावकं उत्सृष्टाग्निं विधुरा-नलं विधुराग्निम् । एतादृशं मृतमाहिताग्निं दग्धुं त्रेताग्न्युत्प-

---

* इत्यमेव पाठः सर्वत्र । यदि सकलः कुणपः शवो लब्धः,—इति तु भवितुमुचितम् ।

† प्रेता,—इति ङ० पुस्तके पाठः । एवं परत्र ।

त्तिसिद्धये प्रेताधानविधिं पृथक् स्वतन्त्रं प्रेताधानमेव भारद्वाजादयः प्राहुः ॥५०॥

तमेवाह ।

प्राचीनावीतिवानुद्धृत्यावोक्ष्यायतनान्यथ ॥ ५१ ॥
प्रेतं स्थाप्यालये क्षिप्ता पश्चिमाग्न्यालयेऽरणी ।
सन्निधायानलं मन्थेद्यस्येति यजुषा ततः ॥ ५२ ॥

यस्याग्नयो जुहुतोमांऽसकामाः सङ्कल्पयन्ते यजमानमांऽसम् । जानन्तु ते हविषे सादिताय स्वर्गं लोकमिमं प्रेतं नयन्तु । इति मन्त्रः ।

अर्थात् पुत्रादि प्रेताधानविधिं करिष्ये इति कङ्कल्प्य प्राचीनावीतिवान् भूत्वा अथ आयतनानि उद्धृत्यावोक्ष्य यजमानस्थाने प्रेत स्थाप्य, पश्चिमाग्न्यालये गार्हपत्यागारे अरणी सन्निधाय यस्येति यजुषाऽनल मन्थेत् मन्थनमन्त्रस्यैकविधत्वात्* पाठमाह । यस्येति । ॥५१॥५२॥

प्रणीय पावकं तूष्णीं द्वादशोपात्तसर्पिषा ।
तूष्णीं हुत्वा ततः कुर्युः प्रेतेऽमात्या इतिक्रियाम् ॥५३॥

ततः पावकं प्रणीय आहवनीयस्थाने निधाय तूष्णीं द्वादशवारं गृहीतेनाज्येन तूष्णीमेवाहवनीये हुत्वा ततोऽमात्याः पुत्रादयः प्रेते इतिक्रियां कुर्युः ॥५३॥

---

* इत्यमेव पाठ सर्व्वत्र । मम तु, मन्थनमन्त्रस्यानेकविधत्वात्, -- इति पाठ प्रतिभाति ।

अथारण्योरप्यभावे विधिमाह ।

नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत् ।
आहरेदरणिद्वन्द्वमाधानोक्तविधानतः ॥ ५४ ॥
तद्वदेवाभिमन्त्र्याथ तन्मन्त्राभ्यां विनिष्टपेत्* ।
निर्मथ्ये पावके यद्वौपासनार्थे† तदस्ति चेत् ॥ ५५ ॥
ततोऽग्निशून्यप्रेतोक्तमन्थनादि प्रपद्यते ।
यत्तु यस्याग्नयोजुहुत्यादिमन्त्रकमीरितम् ॥ ५६ ॥

नष्टेष्विति । अग्निषु नष्टेषु अरण्योर्नाशे च सति यदि स्वामी-म्रियेत, तदा पुत्रादिराधानोक्तविधानेन यथोक्तलक्षणमरणिद्वन्द्वमाहरेत् । तद्वदेव वक्ष्यमाणनूतनारणिस्वीकारविधिवदेव । तन्मन्त्राभ्यां वक्ष्यमाणनूतनारणिस्वीकारविधुक्ताभ्यां निर्मथ्ये लौकिकारणिमन्थनोत्पन्ने पावके लौकिकेऽग्नौ विनिष्टपेत् प्रतपेत् । तदरणीद्वयं औपासनार्थं औपासने इत्यर्थः । प्रतपेत् । चेत्तदस्ति । सर्वाधानिनस्तु निर्मन्थ्याग्नौ । ततस्तयोररण्योरग्निशून्यप्रेतोक्तमन्थनादि, अग्निशून्यानि यानि आहिताग्निप्रेतानि विच्छिन्नोत्सृष्टविधुराहिताग्निप्रेतानीत्यर्थः । तेषु उक्तं मन्थनादि ईरितं पूर्वोक्तं यत्तत्सर्वं प्रपद्यते प्राप्नोति । मन्थनं विशिनष्टि । यत्त्विति । यस्याग्नयो जुहुत्यादिमन्त्रो यस्मिन् तथाभूतं, स्वार्थेकप् । प्रपञ्चादिदं विधिद्वयं भरद्वाजप्रोक्तमेव मूलकृतोक्तम् ॥५४॥५५॥५६॥

---

* विनिक्षिपेत्, – इति ग० पुस्तके पाठः ।

† चासनार्द्धे, – इति क० ख० घ० ङ० पुस्तकेषु पाठः ।

अथानेकपुनराधाननिमित्तानुगतधर्मचक्रान्तर्भूतोपेचारूपनिमित्तं वक्तुमारभते ।

भार्यायां प्रोषितयाञ्चेदुदेत्यर्कोऽस्तमेति वा ।
तत्र स्यात्पुनराधेयमन्ये प्राहुरिहान्यथा ॥ ५७ ॥

भार्यायामित्यादिना । सा चोपेचा च प्रवासादि इति पूर्वोक्तलक्षणा । आदिपदात् पत्नीसीमाद्यतिक्रमणादि । भार्यायां पत्न्यां प्रोषितायां, प्रकर्षेणोषिता प्रोषिता तस्यां, गृहसीमामतीत्यान-तीत्यवाऽन्यत्राग्निशालातोगतायामर्कश्चेदुदेति वाऽस्तमेति चेत्, तत्र तन्निमित्ते पुनराधेयं भवति । अन्ये आचार्या इह एतादृशस्थले अन्यथा प्राहुः। * अत्र सीमाशब्देन गृहसीमा युक्ता। तदुक्तं छन्दोगपरिशिष्टे ।

"विहारकाले यदि कार्यलोभात्-
पत्नी तु सीमानमतीत्य गच्छेत् ।
निःसंशयोऽग्नि' खलु नाशमेति
गृहस्य सीमाऽत्र विवचितोऽर्थः" ॥ *

एकभार्यकविषयमिदमिति वदन्ति। तदुक्तं यज्ञपार्श्वादौ।

"पत्न्याः प्रवासविषये पुनराधिरुदाहृता ।
वाक्यैर्मनीषिभिः प्रोक्तैरेकभार्यस्य सेव्यते" इति ।

तत्र प्रवासोनाम ।

यदि सीमामतिक्रम्य रात्रौ तत्रैव वत्स्यति ।

---

* * मतचिह्नान्तर्गत पाठ ङ॰ पुस्तकातिरिक्तपुस्तकेषु नास्ति ।

"अगृहस्य प्रयाणं यत् प्रवास उच्यते बुधैः" ।

अत्र सीमाशब्देन स्वग्रामसीमोच्यते । तेनाग्निगृहं विहाय स्वग्रामेऽन्यग्रामे वा रात्रौ वासः प्रवासः । रात्रिपदमुदयास्तमयकालोपलक्षकम् । मूलैकवाक्यतानुरोधात् ।

"यत्तु नारायणेनोक्तम् ग्रामात्खाग्निसमन्वितात् ।
सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतम् ॥
एकाकिनी यदा पत्नी कदाचिद् ग्राममाव्रजेत् ।
होमकालेऽभिसम्प्राप्ता न सा दोषेण युज्यते ॥
अथ तत्रैव निवसेत् ग्रामं दृष्ट्वा प्रमादतः ।
लौकिकाग्निः स विज्ञेयः इत्येषा नैगमी श्रुतिः" । इति

वचनाद् ग्रामान्तरे रात्रौ वासः प्रवासः । तेन स्वग्रामे पत्न्याः रात्रौ वासे न दोषः । अत्रापि रात्रिपदमुदयास्तमयोपलक्षकम् । अन्यथा सायंहोमानन्तरं गमने उदयात् प्राक् परावृत्तौ पुनराधानप्रसङ्गः स्यात् । रात्रिवासमद्भावात् । अपिच रात्र्यहर्वासयोरविशेषात् । यद्देवमिश्रादिग्रन्थे ।

"ग्रामान्तरे नगर्यां वा पल्ल्यां वाऽन्यत्र वा क्वचित् ।
सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतमिति" ॥

तत् पूर्वोक्तप्रवासलक्षणवाक्यैकवाक्यतया व्याख्येयम् । तादृगर्थेवार्थस्योपलब्धेर्न लक्षणान्तरमिति । ननु

"प्रवसेद्धनयमाप्त्यै न तीर्थाय कदाचन ।
इति कूर्मपुराणोक्तं तथा बौधायनेन च" इति ॥

बौधायनीयाद्धनार्जनस्य प्रवासप्रयोजकत्वात्पत्न्यास्तु तदभावात्

कथं तत्प्रसक्तिः । यय एवाधनाः स्मृता इति स्मृतेश्चेति चेन्न । अस्ति चासां अपि धनवत्ता । सम्भाव्यते च तदतान्यनसमृद्धिर्लोके । स्त्रीधनानि पडिति स्मृतेः । किञ्च भवति हि पितृमातृभ्रातृपुत्र-दर्शनेन धनोपलब्धिः ।

"दत्तं स्वसृदुहितृभ्यामनन्तफलदं भवेत्" ।

इति दानखण्डे दत्तोक्तेः । दीयते च दूरादागताभ्यः स्वसृप्रभृतिभ्यो वासप्रभृति । यत्त्वधना इत्युक्तं, तदस्वातन्त्र्यपरतया व्याख्येयम् । अतएव न कुर्युरग्न्युपस्थानमिति वक्ष्यते । एवञ्चोपस्थिते यजमानवत्पत्न्या अपि प्रवासे यदि करोति तदाऽनेन भार्यायां प्रोषितायामिति वाक्येन स निषिध्यते । अतो बहुभार्यस्यैकभार्यस्य वा पत्न्याः प्रवासे पुनराधेयमेवेति मूलकाराः । इदमेकभार्यकविषयं न तु बहुभार्यकविषयमित्यन्ये । तच्च स्यात् पुनराधानमिति क्वचित्पाठः । युक्त एवायम् ॥५६॥

अनेकपत्नीकस्यैकपत्नीकस्य वा नियतपत्नीप्रवासे स्त्रीकस्य पुनराधेयस्य मतान्तरेण पत्नीनियममाह ।

ज्येष्ठा चेदग्निसंयुक्ता गच्छन्त्यन्या यथारुचि ।
यजमानेन सहिता यदा ता एव केवलाः ॥ ५८ ॥

ज्येष्ठेति । ज्येष्ठा पत्नी अग्निसंयुक्ता चेत्, संयुक्तशब्दः सामीप्यवचनः । मुख्यार्थासम्भवात् । अन्याः कनिष्ठाः यथारुचि, क्रियाविशेषणमिदम् । यथेच्छं, उदयास्तमयकालपर्यन्तमपि गच्छन्ति । दोषाभावज्ञापनार्थं लट् । गच्छन्त्वन्या इति लोडन्तोऽपि क्वचित्पाठः ।

बहुभार्यस्य ज्येष्ठा चेत् प्रवसेत् पुनराहितिरिति।
वाक्यान्तरात्। कीदृश्योऽन्याः। यजमानेन भर्त्रा सहिताः। यद्वा, केवला यजमानरहितास्ता एव यवीयस्य एव यथाकामं गच्छन्तु। तेन ज्येष्ठासन्निधाने भर्तुः सन्निधाने सत्यपसति वा इतरासां प्रवासोनिमित्तं न भवतीति भावः। अत्र ज्येष्ठाप्रवास एव पुनराधाननिमित्तमिति पूर्वस्माद्भेदः ॥५८॥
कदाचित् कनिष्ठासहकृतप्रवासयष्टुः कतिचिन्नियमान् प्रसङ्गा-दाह।

प्रोषितः स्यादधः शायी ऋतुपायी त्वमैथुनम्।
वदन् बौधायनस्त्वेवमेका चेदग्निसन्निधौ ॥ ५९ ॥
इतरासां यथाकामं प्रवासमनुमन्यते।
इत्युक्तं भवभाष्येऽपि तातश्लोकेष्वपीरितम् ॥ ६० ॥

प्रोषित इति। प्रोषितः पत्नीसहितकृतप्रवासः अधः शायी स्यात्। अधःशब्देनाग्निस्थानान्नीचत्वमुच्यते। खट्वाद्युदासार्थं, न लास्त-रणनिषेधार्थम्। ऋतुपायी स्यात्। ऋतौ पीयतेऽसौ ऋतुपायी ऋतुजायोपयायी स्यात्। तु यस्मादमैथुनम्। मैथुननिषेधः प्रोक्त इति शेषः। यद्वा, ऋतुगमनं अमैथुनं प्रोक्तमिति। उक्तं चर्तुगम-नस्यामैथुनत्वन्दानधर्मेषु भीष्मयुधिष्ठिरसंवादे। अधुना ज्येष्ठाया-अपि प्रवासे बौधायनमतेन दोषाभावमाह। वदन्निति। बौधा-यनस्तु, एका कनिष्ठा ज्येष्ठा वा अग्निसन्निधौ चेद्दिश्यते, एवं वदन्

इतरासां अन्यासां यथाकामं यथारुचि प्रवासं अनुमन्यते ।* अतएव ज्येष्ठाप्रवासेऽपि न पुनराधानमिति देवयन्ये सङ्गहवचनम् ।

"ज्येष्ठा चेद्वहुभार्यस्य ह्यतिचारेण गच्छति ।

पुनराधानमत्रैके इच्छन्ति न तु सूरयः" ॥

इति सङ्गृह्यते । ज्येष्ठाप्रवासेऽपि दोषाभावस्य प्राशस्त्यं सूरि-पदादिज्ञायते । न तु गौतमः,—इति मिश्रग्रन्थपुस्तकेकल्पिकपाठस-माश्रयणे ज्येष्ठाप्रवासे पुनराधानं स्यादेवेति विकल्पः । तथाच बहु-भार्यस्यान्यतरपत्नीसन्निधाने पुनराधानन्नेति पूर्वस्माद्भेदः । एतदेव बहुवादिसम्मत्या द्रढयति । इत्युक्तमिति । भवभाष्यसन्ज्ञके ग्रन्थेऽपि इति अनेनैव प्रकारेण उक्तम् । तथा तातश्लोकेष्वपि कारिकास्वपि ईरितं उक्तमिति ॥५८॥६०॥

अथुनैकभार्यस्यानेकभार्यस्य वा स्वामिनोऽग्निसन्निधाने सर्वथैव पुनराधानं नेत्यपरमतेनाह ।

एकस्यामप्यतिष्ठन्त्यामग्निहोत्रसमीपतः ।
पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे विदुः ॥ ६१ ॥

एकस्यामिति । एकस्यामपि ज्येष्ठकनिष्ठान्यतरपत्न्यामपि अग्नि-होत्रसमीपतः समीपे इत्यर्थः । अतिष्ठन्त्यामविद्यमानायां सत्यां, पतिः स्वामी चेत्तिष्ठति विद्यते । अग्निहोत्रसमीपत इत्यनुषज्यते । चेत्, नाशोऽग्निनिष्ठसंस्कारनाशो नेत्यपरे आचार्या विदुरिति । *तत्र

---

* एतच्चिह्नान्तर्गतः पाठो ङ॰ पुस्तके नास्ति ।

रुद्रदत्तरामाण्डारभाष्यपर्य्यालोचनयाऽनेकभार्य्यस्यैकभार्य्यस्य वा प्रवासो भवति । तथैव पूर्व्वं पूर्व्वपक्षीकृत्य पत्न्यास्तुल्यस्वामित्वं बाधित्वाऽङ्गत्वमापाद्य तत्समर्थनाय पुंस्त्वविशिष्टचोदनाऽभिधानपूर्व्विका कल्पान्तरोक्तिः प्रदर्शिता । तदर्थमेव दाशरथिभीष्मादिमहत्तमानामाचारं दर्शयित्वा जैमिनिसूत्रास्योपष्टम्भनम् । तस्मात् सिद्धमभावेऽपि पत्न्या न कर्म्मणो निवृत्तिरिति । एवमेव मीमांसकशिरोमणिनीलकण्ठादिभिरपि 'कर्म्मजन्यफलेच्छावत्पत्न्यास्तुल्याधिकारोऽन्यथापाचाज्यमीक्षितयवपश्वादिवदङ्गत्वमुक्तम् * । सर्व्वासामसन्निधानेऽपि न पुनराधानमिति बौधायनमतात् पूर्व्वमतादपि च भेदः ॥ ६१॥

एवं स्वामिपत्न्योरन्यतरसन्निधाने मतभेदैर्दोषाभावमुक्त्वाऽधुनोभयासन्निधाने †मतभेदेनाह ।

सन्ध्यावदन्यदाऽप्यग्नीन् हित्वा चेद्दम्पती गतौ ।
ग्रामान्तं वाऽथ सीमान्तं तथैकेऽग्निशमं विदुः ॥ ६२ ॥
अन्ये ग्रामान्तवसनात् ‡ न त्वतिक्रममात्रतः ।
सीम्नि त्वतिक्रमादेव केवलान्नाशमब्रुवन् ॥ ६३ ॥
यदोभावप्यतिक्रम्य सीमां प्रत्यागतौ पुनः ।
उदयास्तमयात्पूर्व्वं न नाशोऽस्तीति केचन ॥ ६४ ॥

---

* अथ, आज्यपयूषे, — इत्यधिकः पाठः ख० घ० पुस्तकयोः ।

† मतभेदानाह, — इति ङ० पुस्तके पाठः ।

‡ ग्रामान्तरं गत्वा, — इति ग० पुस्तके पाठः ।

सन्ध्यावदित्यादिभिः। दम्पती पत्नीस्वामिनावुभौ अन्यदा यस्मिन् कस्मिन् कालेऽग्नीन् हित्वा चेद्गतौ गमनं कुरुतः ग्रामस्य स्वावसथग्रामस्यान्तं यावत्पर्यन्तं जनानां वसतिः तत्पर्यन्तमित्यर्थः। वेत्यथ वा। ग्रामसीमान्तं स्वावसथग्रामसीमापर्यन्तं, तत्र तस्मिन्निमित्ते सन्ध्यावत् अग्निगमं नाशं विदुः। यथाऽस्तोदयकाले उभयोरसन्निधानेन नाशः प्रसिद्धोऽस्ति, तद्वदुभौ यदा कदाचित् जनवसतेरूर्ध्वं सीमोर्ध्वं वा गतौ चेत्, पुनराधानमिति सन्ध्यावदित्युक्तम्। अत्र सीमाशब्देनाग्निसंश्रितग्रामसीमेति नारायणवृत्तौ। अन्यगारसीमेत्याशार्कः। ग्रामसीमान्यगारसीमेति प्रतन्दयीभाष्ये*। अत्र कैमुतिकन्यायेन तत्सिद्धौ पुनर्ग्रहणं तथापि निमित्ततां प्रतिपादयितुम्। अन्ये आचार्या ग्रामान्ते वसनात् पुनराधानं न पुनरतिक्रममात्रेण सीम्नि तु केवलाद्वासरहितादतिक्रमादेव नाशमब्रुवन्। अत्र ग्रामान्तवाससीमातिक्रमणे निमित्ते इति पूर्वस्माद्भेदः। सीमातिक्रमणेऽपि दोषाभावमाचष्टे। यदेति। यस्मिन् काले उभावपि स्वामिनौ सीमामतिक्रम्यापि पुनः उदयास्तमयात् पूर्वं स्वग्रामं प्रत्यागतौ अत्रास्मिन्निमित्ते नाशोनेति केचनाहुरिति शेषः'। अयमेव पूर्वमतादिशेषः ॥६२॥ ६३॥६४॥

उदयास्तमयोत्तरमपि अपराह्वृत्तौ स्वमतेन दोषाभावमाह।

---

* प्रतन्दयाभाष्ये, — इति क॰ पुस्तके पाठः। प्रतभाष्ये — इति ख॰ ---- पाठः। 'प्रत' शब्दात् परं रक्षितं किञ्चित् स्थानं घ॰ पुस्तके।

छन्दोगपरिशिष्टोक्तहोमकालात्यये ऽनलः* ।
सीमातिक्रमणान्नश्येन्नोदयास्तमयादपि† ॥ ६५ ॥

छन्दोगेति । उभयोरित्यध्याहारः, सीमातिक्रमणोत्तरं, छन्दोगपरिशिष्टे कर्मप्रदीपस्तदुक्तोयोनवघटिकात्मकोहोमकालस्तदत्यये सति अनलो अग्निर्नश्येत्, उदयास्तमयहेतुना नेति । तदुक्तं देवयाज्ञिकैः मङ्गलवचनैः ।

"विहायाग्निं सभार्यश्चेत् सीमासुमञ्च गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते इति ॥
यजमानस्य पत्नी च उभौ प्रवसितौ यदा ।
आ होमान्निवर्त्तते पुनराधानमर्हति" ॥

यदीभावत्यतिक्रम्येति मूलवत् पूर्वार्द्धं पठित्वा ।

"होमकालमतिक्रम्य तदा नश्यन्ति वह्नयः" — इति च ॥
"पत्नी सीमामतिक्रान्ता यजमानोऽगृहे यदि ।
आ होमाद्यदि नागच्छेत् पुनराधानमर्हति ॥
एकाकिनी यदा पत्नी कदाचिद्ग्राममाव्रजेत् ।
होमकालेऽभिमप्राप्ता न सा दोषेण युज्यते ॥
अथ तत्रैव निवसेद्ग्राममङ्गला प्रमादतः ।
लौकिकोऽग्निः स विज्ञेय इत्येषा नैगमी श्रुतिः" — इति॥

तस्मात् नवनाडिकोत्तरं सीमातिक्रमणेनोभया सन्निधाने पुनराधानमिति निर्गलितोर्थः ॥६५॥

---

* पुनः, — इति क॰ ख॰ घ॰ ङ॰ पुस्तकेषु पाठः ।
† सीमातिक्रान्तयोर्नश्येन्नोदयास्तमयादिति, — इति ग॰ पुस्तके पाठः ।

सीमातिक्रममङ्गत्या नद्यतिक्रमणेऽप्याह ।

विनाऽग्निभिर्यदा पत्नी नदीमम्बुधिगामिनीम् ।
अतिक्रामेत्तदाऽग्नीनां विनाशः स्यादिति श्रुतिः ॥ ६६॥

विनेति । पत्नी आधानमहकृता अग्निभिर्विनाऽम्बुधिगामिनीं समुद्रगामिनीं स्वेनैव मार्गेण न तु गङ्गादिसहायेन, सर्वेषां जलप्रवाहानां तादृशत्वात् । नदीं, नदीलक्षणं स्वये वक्ष्यते, अतिक्रामेदुत्तीर्य गच्छेत्, तदाऽग्नीनां विनाश इति श्रुतिः वेदश्रवणमित्यर्थः ॥ ६६॥

इदानीमसमुद्रगामिनीविषयमाह ।

पत्न्यन्तरेऽथवा पत्यौ हुताशनसमीपगे ।
अन्या पत्नी यथाकाममतिक्रामेन्नदीमपि ॥ ६७ ॥
न कुर्युरग्न्युपस्थानं प्रवसन्त्योऽपि योषितः ।
प्रोषिता न जपं कुर्युरन्त्येव सधर्मकम् ॥ ६८ ॥
आगतोपस्थितिञ्चापि स्त्रीणां नेच्छन्ति सूरयः ।

पत्न्यन्तरेति । पत्न्यन्तरे ज्येष्ठाकनिष्ठयोन्यतरस्मिन्, अथवा पत्यौ हुताशनोऽग्निस्तस्य समीपगे सति पत्नी यथाकामं यथेच्छं नदीमपि अतिक्रामेन्न दोष इति यावत् । एतेन पतिपत्न्यन्तरसन्निधाने समुद्रगाऽतिक्रमेण पुनराधानमितरस्यास्त्वतिक्रमेणोभयोरसन्निधाने पुनराधानं सन्निधाने नेति भावः। अत्र पत्नीग्रहणात् सीमा-

तिमकणे नद्यतिक्रमणे प्रवासे वा यजमानेन कृते न दोष इति। तथा।

"रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा।
प्रवसन्नग्निमानग्निः पुनराधानमर्हति॥
पत्नीनामपि चैकस्यामुदक्यायान्तु न प्रजेत्।
एकादशे चतुर्थेऽह्नि गन्तुमिच्छेन्निमित्ततः॥
पर्वो मुक्त्वा तु यो लोभात् प्रवसेत् पर्वसन्धिषु।
करोति पुनराधानं प्रायश्चित्तमृणादृते॥
नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि।
न विना च निमित्तेन क्रीडाद्यर्थन्तु न प्रजेत्॥
प्रवसेद्रुनसम्पत्त्ये न तीर्थाय कदाचन।
इति कूर्मपुराणोक्तं तथा बौधायनेन च॥
सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि मानवः।
पुराणवचनात्साग्नेः प्रवासोऽस्तीति केचन"॥

इत्यादिवचनैरेतद्व्यतिरिक्तस्थले बोध्यम्। पूर्वोक्तमतभेदैर्ज्येष्ठायाः कनिष्ठाया वा प्रवासोपस्थितौ तुल्य एवाधिकारः स्यादिति स्वयमेव साधिते तुल्याधिकारे यजमानवत् प्रवासोपस्थानादिकं स्यादत आह। नेति। प्रवसन्त्योऽपि योषितोऽग्न्युपस्थानं न कुर्युः। प्रोषिताः सन्त्यः अपन्थागोपस्थानरूपं न कुर्युः। नहि कर्मजन्यफलभोक्तृत्वं न स्यादत आह। सधर्मकं समानधर्मकं फलं अस्त्येव। प्रदक्ष्याधिकान्यायेन प्रवासोपस्थानमेव न स्यादत आह। आगतेति। आगतस्य प्रवासादागतस्य या यजमानस्योपस्थितिरुपस्थानं साऽपि स्त्रीणां सूरयोनेच्छन्ति। न भवतीति भावः॥१७॥१८॥

सीमातिक्रमप्रसङ्गादाह ।

पत्नी सीमामतिक्रामेद्विना भर्त्त्राऽग्निभिः सह ॥ ६८ ॥
तत्र नाशोऽपरे त्वाहुर्भयाद्याने न दुष्यति ।
किन्तु साग्निर्विना भर्त्त्रा गत्वा संस्कृतसर्पिषा ॥ ७० ॥
ह्रावयेच्चतुरात्तेन प्राप्ते देशे मनस्वतीम् ।
सायंप्रातस्तनौ होमावेवं स्याद्गमनेऽन्वहम् ॥७१ ॥

पत्नीति । पत्नी भर्त्त्रा विनाऽग्निभिः सहाग्निं गृहीत्वेत्यर्थः । सीमामतिक्रामेत्, तत्र नाशः । अपरे तु भयाद्याने विड्वराद्यादिना गमने न दुष्यतीत्याहुः । तथाच यष्टरि प्रवसितेऽप्रवसिते वा अकस्मात् परचक्रादिप्राप्तौ अग्नीन् गृहीत्वा सीमातिक्रमणादिके पत्न्या विहिते न दोष इति भावः । तदुक्तं देवयाज्ञिकैः सङ्ग्रहवाक्यम् ।

"एकाकिनी यदा पत्नी वह्निमादाय गच्छति ।
तत्र नाशोऽपरे त्वाहुर्भयाद्याने न दुष्यतीति ॥
न गच्छेकाकिनी पत्नी प्रयायादग्निभिः सह ।
राष्ट्रभङ्गादिगमने उचितं यानमीदृशमिति च ।
अन्यथा हि प्रवसन्त्यां वह्नयो लौकिकाः खलु" ।

पत्न्याः साग्निप्रवासे यावत्प्रवासं प्रात्यहिकं प्रतिहोमं प्रायश्चित्तमाह । किन्त्विति । किन्तु परन्तु एवं यजमाने प्रोषिते चेदेकाकिनी पत्नी ग्रामाद्बहिरग्नीन् नयेत्, स्वयं वा बहिर्गत्वा होमकाले नागच्छेत्, तदा पुनराधानम् । एवं पत्न्यां प्रोषितायां

यदि यजमानादुक्तापराधद्वयं भवति। एवं बहुपत्नीकस्यापि कस्याश्चित् प्रोषितायां पत्न्यन्तरं विद्यमानमपि अपराधद्वये पुनराधानमिति अर्थादवगम्यते । ग्रन्थान्तरेऽप्युक्तमस्ति । भर्त्रा विना साग्निः पत्नी गत्वा अग्निभिः सह गमनं कृत्वा देशे तद्दिनप्राप्तदेशे संस्कृतघर्पिषा संस्कृताज्येन । किं भूतेन? चतुरात्तेन चतुर्गृहीतेन, मनस्वतीं तत्षडृकामाहुतिं हावयेदध्वर्युद्वारा जुहुयात् । विजन्तोऽयम् । तदुक्तम् ।

"राष्ट्रभंगादिगमने प्राप्ते देशे मनस्वतीम् ।

जुहुयाच्चतुरात्तेन स्मार्त्तेऽग्नौ सर्व्वसंस्थितम्" ॥

इति याज्ञिकग्रन्थे । आज्यसंस्कारस्य नानात्वाञ्चोक्त इति। ततः सायंप्रातस्तनौ सायंप्रातर्भवौ होमौ ऋत्विजा कार्यौ न स्वयम् ।

"न वै कन्या न युवती नाल्पविद्यो न बालिशः ।

होता स्यादग्निहोत्रस्य नार्त्तोनासंस्कृतस्तथेति" ॥

स्मरणात् । अन्यद्गमने प्रत्यहमेवं स्यात्, मनस्वतीहोमं कुर्यादिति भावः । सायंप्रातस्तनाविव्यत्र तुटः प्रागनादेशः ॥६८॥७०॥७१॥

साग्निप्रवासवच्च वास्तोष्पतीयहोमा अपि भवन्तीत्याह ।

वास्तोष्पतीयहोमाद्या भवन्त्यवाप्यप्रोषतः ।
आपद्यपि च कष्टायां विना पत्न्या * नरान्तरैः ॥ ७२ ॥

---

* पत्नी,—इति ख॰ घ॰ पुस्तकयोः पाठः। पत्नीं,—इति ग॰ पुस्तके पाठः।

सीमाऽतिक्रमणेऽग्नीनां न कथञ्चिदनुग्रहः ।

अत्रापि यथारम्भे पत्न्याः साग्निप्रवासेऽपि अग्निपतोऽविशेषेण वास्तोष्पतीयहोमाद्याः पदार्थाभवन्ति । भयादृयानेऽपि किञ्चिद्विशेषमाह। आपदीति। कष्टायामपि महत्यामिति यावत् । आपदि, पत्न्या नरान्तरैः ऋत्विग्भिर्विना अग्नीनां सीमातिक्रमणे कथञ्चित् केनापि प्रकारेणानुग्रहोदोषाभाव इति यावत्, न भवति । अतएव यष्टुः प्रवासोपस्थितौ,

"निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा ।

प्रवसेत्कार्यवान् विप्रो न वृथैव चिरं वसेदिति" ॥

वाक्योक्ता ऋत्विक्कल्पना कृतार्था भवति ॥७२॥

साग्निप्रवासप्रसङ्गादाह ।

प्रत्यक्षेण नयन्नग्निमुच्छ्सेच्चेद्विनश्यति ॥ ७३ ॥
यदि वाऽनुच्छ्सन् गत्वा निधायोच्छ्स्य तं पुनः ।
हरेदनुच्छ्सन्नेव नश्येन्निर्हरणेऽनलः ॥ ७४ ॥

प्रत्यक्षेति । अग्निं प्रत्यक्षेण समारोपादृते शिक्यादिना नयन् यजमानस्तत्पुरुषोवा चेद्यदि उच्छ्सेच्छासम्त्यजेत्, तर्हि विनश्यति संस्कार इति शेषः । स्वग्रामविषयमेतत् ।

"ग्रामात्सीमान्तरं गच्छेत् प्रत्यक्षोऽग्न्यवाहनः ।

शिक्येनोद्वाहयेदग्नीन् पुनराधानमर्हतीति" ॥

स्मरणात् ।

"अग्नीविना समारूढ ऊर्ध्वं ग्राम्यापरासनात् ।

घतोऽग्निर्लौकिकोज्ञेयः श्रुतौ सर्वत्र दर्शनात्" इति च॥

"कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे।

समारोपं विनैवाग्नीन्नोद्धरेद्विपश्चितः॥

आरोप्याग्नीनरण्योस्तानुद्वसेत्तद्दाग्निभिः"—इति च।

यदि वा अथवाऽनुच्छ्वसन् श्वासोच्छ्वासमकुर्वन् गत्वा स्थलान्तरमिति शेषः। निधाय प्राप्तदेशे स्थापयित्वोच्छ्वस्य पुनस्तमग्निमनुच्छ्वसन्नेव हरेन्नयेत्। तदूर्ध्वं पुनः स्थलान्तरनयने लौकिकत्वमाह। नश्येदिति। एवं स्थाप्यस्थाप्य नयनेऽपि त्रिर्हरणे त्रिवारहरणे अनलोऽग्निर्नश्येदिति॥७३॥७४॥

सीमान्तरादतिदूरं साग्निप्रवासे विशेषमाह।

शकटेनातिदूरं वा हरेद्देशं यथारुचि।
स्वाङ्गेनैवाथवा शम्यापरासात् प्राङ्नयेच्छ्वसन्॥ ७५॥
कर्मार्थहरणेऽग्नीनां नानुच्छ्वासादि चोद्यते।

शकटेति। यथारुचि यथेच्छन्देशं अतिदूरं वा देशं शकटेनानसा आहरेन्नयेत् स्वाङ्गेन शिक्यादिना। तथाच दूरप्रवासे समारोप्याग्नीन्नयेत्, प्रत्यक्षनयनपक्षे शकटेन नाङ्गेनेति। शिक्यादिना स्वाङ्गेन नयनेऽभिहितस्यानुच्छ्वासस्यापवादमाह। अथ वा शम्यापरासात्प्रक्षेपात् प्राक् देशं श्वसन् स्वाङ्गेनैव नयेत्। शम्यापरासलक्षणे तु।

"दाचिंशदङ्गुला शम्या जवात् क्षिप्ता परापतेत्।

यावद्देशमसौ देशः शम्याप्रास उदीर्यते" इति॥

शम्यापरासादूर्ध्वन्तु श्वासगतिर्निरुध्यते। चोदनागतहरणे नैष

दोष इत्याह। कर्मार्थमिति। कर्मणे इति कर्मार्थम्। गार्हपत्य-धिष्ण्यादिषु अग्नीनां हरणे शम्यापरामादूर्ध्वमपि नयने अनुच्छ्वा-सादिकं, न उच्छ्वासोऽनुच्छ्वासमत्तादादिकं शकटादि न चोद्यते नोद्यते। स्वाङ्गेनोच्छ्वसताऽपि हरणं भवतीति भावः। तदुक्तं छन्दोगपरिशिष्टे।

"कात्यायनमतात् केचिच्छ्वसन्तोऽप्यतिदूरतः।
प्रत्यक्षेण नयन्त्यग्नीन् शकटेन विनाऽपि तु"—इति॥
"स्वगृहस्य प्रयाणं यत्तत्पल्यग्निसमन्वितम्।
क्लिष्टश्चेत्तत्प्रदत्यर्थे मनसा सह गच्छति॥
अनस्यारोपयेदग्नींस्तत्पात्राण्यपि तत्र वै"।

एतेनाहिताग्नेरनस्यारोहणं प्रत्युक्तं भवति। गोयानत्वात्तस्य। रथस्य तु न निषेध इति।

"स्वाङ्गेन वा नयेदग्निं कात्यायनमतादपि।
नयेद्वा ब्राह्मणस्तन्योजवेन सह गच्छति"।

अत्र जवप्रदोपादानादनुच्छ्वसन्नेवाहरेत्। नानुच्छ्वासादि चोद्यते इति तु कर्मार्थाहरणविषयमिति दिक्॥७५॥

प्रत्यक्षस्याछढस्य वाऽग्नेर्नयनेऽन्वारम्भोभवतीत्याह।

नदीसन्तरणेऽग्नीनां सीमातिक्रमणे तथा॥७६॥
सर्वत्रायन्तसीम्नोर्वा स्वामिस्पृष्टाः स्युरग्नयः।

नदीति। अग्नीनामनोगतानामरणिगतानां वा नदीसन्तरणे असमुद्रगाऽसमुद्रगासाधारणनदीपदवाच्यजलसङ्घोत्तरणे, तस्मिन् काले

इति यावत्। अग्नयश्च स्वामिस्पृष्टाः स्युः, स्वामित्वस्योभयनिष्ठत्वादु-भाभ्यामपि अनोऽन्वारम्भः कार्यः। समारोपणपक्षे त्वरण्योः। अन्यत-रेणेति दीपिका। पत्न्यास्त्वङ्गुलेन स्वामिन एवेत्यन्ये। तथैव सीमा-तिक्रमणे स्वाम्यन्वारम्भिताः स्युः। अथ वा आद्यन्तसीम्नोरध्युषित-ग्रामाधिष्ठातव्यग्रामसीम्नोः स्वामिस्पर्शिताः स्युः ॥७६॥

अत्राग्निपदेन प्रत्यक्षमयनएव प्राप्नोत्यत आह।

प्रत्यक्षमरणि* द्वारमन्यथाऽग्निविनाशनम् ॥ ७७॥

प्रत्यक्षमिति। प्रत्यक्षं साक्षात्त्वेन प्रसिद्धं, अरणिद्वारं अरणिरूपं द्वारम्। शाकपार्थिवादिना समासः। यतोऽस्ति, ततः ते अपि स्वामिस्पृष्टे स्याताम्। अन्यथा यदि स्वामिस्पृष्टे न स्तस्तदाऽग्निवि-नाशनम्। पुनराधानमिति यावत् ॥७७॥

आत्मारोपणपक्षे किं स्यादत आह।

आत्मारोपणपक्षे तु नान्वारम्भणमिष्यते।
न काप्यारम्भणं केचिल्लौगाक्ष्याद्यनिबन्धनात् † ॥७८॥

आत्मारोपणपक्षे तु, आत्मनि पाणिद्वारा समारोपणपक्षे अन्वारम्भणं नेष्यते। अर्थलोपादिति भावः। केचिदाचार्या लौगा-

---

* प्रत्यक्षं वाऽरणि,—इति ग० पुस्तके पाठः।

† किञ्चिल्लौगाक्ष्याद्यनिबन्धनात्,—इति क० ख० घ०ङ० पुस्तकेषु पाठः। परन्त्वसमीचीनः टीकाविरुद्धश्च।

त्रिप्रभृतीनां निबन्धनं वचनं, तस्मात्(१) क्वापि कुत्रापि अन्वारम्भणं नेष्यन्त इति शेषः * ॥७८॥

प्रसङ्गान्नदीलक्षणमाह ।

कूलद्वयान्तरालन्तु नदीशब्देन नोच्यते ।
किन्तु तद्देशवर्त्त्येव जलसङ्घो नदी भवेत् ॥ ७९ ॥
अष्टौ धनुःसहस्राणि न प्रस्रवति†यज्जलम् ।
नदीशब्दाभिधेयत्वं तस्येच्छन्ति न सूरयः ॥ ८० ॥
एकेन नामधेयेन शतयोजनगामि यत् ।
उदकन्तन्नदीशब्दवाच्यमित्यपरे जगुः ॥ ८१ ॥

कूलेति । नदीशब्देन कूलद्वयस्यान्तरालं मध्योनोच्यते किन्तु तद्देशवर्त्त्येव कूलद्वयान्तरालवर्त्ती जलसङ्घो नदीपदवाच्योभवेत् । जलसङ्घं विशिनष्टि । अष्टाविति । अष्टौ अष्टसङ्ख्याकानि धनुषां सहस्राणि, तत्परिमितदेशपर्यन्तमिति यावत् । यज्जलं न प्रस्रवति न वहति, तस्य जलस्य नदीपदवाच्यत्वं नेच्छन्ति। अपरे सूरयो-

---

* इत्थमेव पाठः सर्व्वत्र । अन्वारम्भणं नेच्छन्तीति शेषः, — इति तु भवितुमुचितम् ।

† संस्रवति, — इति ग० पुस्तके पाठः ।

---

(१) लौगाक्षिप्रभृतीनां वचनात् नान्वारम्भणं, तेषां तन्निषेधकवाक्यादिति भावः । तथाच लौगाक्ष्याद्यनिबन्धनादिति मूले लौगाक्ष्याद्यानां निबन्धनादित्याद्यपदं न स्यादिपदम् । तथात्वे ह्यनिबन्धनादवचनादिति व्याख्यातुमुचितं स्यात् । तदेव तु समीचीनमिति प्रतिभाति ।

ऽभियुक्ता यत् जह्मकेन नामधेयेन यमुनादिनाम्ना शतयोजनगामि चतुःशतक्रोशगामि, तदुदकं नदीशब्दवाच्यमिति जगुः। क्रोशलक्षणन्तु मात्स्यपुराणे।

"क्रोशोधनुःसहस्रे द्वे गव्यूतिर्द्विगुणा ततः।
द्विगुणं योजनन्तस्मात् प्रोक्तं सङ्ख्याविशारदैः"।

धनुर्लक्षणं तत्रैव। चतुर्हस्तोधनुर्दण्ड इति ॥७८॥८०॥८१॥

प्रजार्थिनः कामार्थिनो वा दारान्तरसङ्ग्रहणेच्छोर्विषयमाह[1]।

कर्त्तव्यं पुनराधानं पुनः परिणये सति।
अग्न्याधेयमुशन्तीह केचिदुद्वाहकर्मणि॥ ८२ ॥
लौगाक्ष्याद्यनिबद्धत्वादुभयन्नेति केचन।
तत्रौपासनिनी पत्नी परा पूर्वाऽग्निहोत्रिणी ॥ ८३ ॥

कर्त्तव्यमिति। पुनः परिणये विवाहे कृते सति तदुत्तरं पुनराधानं कर्त्तव्यम्। केचिदाचार्या इहोद्वाहकर्मणि जीवत्पत्नीकस्य पुनर्विवाहोत्तरमग्न्याधेयमपूर्वाधानमुशन्ति वदन्ति। यदा, अग्न्याधेयं पुनराधेयम्। केचनाचार्या लौगाक्ष्यादिभिरनिबद्धत्वादनुक्तत्वादुभयं पूर्वोक्तं नेति ब्रुवन्ति। यदोभयमपि लौगाक्ष्यादिमतेन नानुष्ठीयते, तदा परा पत्नी द्वितीया औपासनिनी विवाहाग्निसंयोगात्। पूर्वा प्रथमा अग्निहोत्रिणी। तयैव* सहाग्नीनामाधानात् ॥८२॥८३॥

अथ सपत्नीकस्य पुनः परिणये मतान्तरेण विशेषमाह।

---

* तयैव,—इति क॰ ङ॰ पुस्तकयो पाठ।

---

(१) विशेषमाह,—इति भवितुमुचितम्।

पुनः परिणयेऽग्नीनामुत्पत्तावीदृशोविधिः ।

पुनः इति। पुनः परिणये स्वस्य पुनर्विवाहे कृते द्वितीयाया-अपि आधानसंस्कारसंस्कार्यताऽर्हत्वात्, अग्नीनां चेताग्नीनामुत्पत्ता-वीदृशोवक्ष्यमाणोविधिः प्रयोगविधिः कर्त्तव्य इति शेषः ॥

तत्रादौ पुनः परिणये हेतुमाह ।

आहिताग्निः प्रजाहीनां योषाऽपत्यां मृतप्रजाम् ॥८४॥
दशमे द्वादशे पञ्चदशे संवत्सरे स्त्रियम् ।
त्यक्त्वाऽन्यामुद्वहेत् कन्यां सद्यस्त्वप्रियभाषिणीम् ॥ ८५ ॥

आहितेति । आहिताग्निरग्नय आहितायेनासावाहिताग्निः । वाऽऽहिताग्न्यादिषु परमिति सूत्रात् पूर्वनिपातः । प्रजाहीनां केव-लवन्ध्यां योषाऽपत्यां कन्याप्रसूं मृतप्रजां मृतापत्यां स्त्रियमनुक्र-मेण दशमे द्वादशे पञ्चदशे संवत्सरेऽप्रियभाषीं तु सद्यस्त्यक्त्वाऽन्यां कन्यामुद्वहेत् पुनर्विवाहं कुर्यादित्यर्थः । कन्यापदमक्षतयोनिपाणि-ग्रहणार्थम् । स्मर्यते विंशतिप्रसूताया: पुनर्विवाहः ।

"यदा विंशतिधाऽपत्यं प्रसूयेताङ्गनाजनः ।
पुनर्विवाहं तस्यास्तु कुर्यात् स्वकुलशान्तये" इति ।

दशमवर्षादिग्रहणं परीक्षार्थम् । न हि विज्ञायतेऽकस्माद-न्ध्येति * ॥८४॥८५॥

विधिमाह ।

---

* न हि मन्ध्या विज्ञायतेऽकस्मादन्ध्येति,– इति ख० घ० पुस्तकयोः पाठः । न हि मन्ध्या विज्ञायते कस्मादन्ध्येति,– इति क० पुस्तके ।

आरोप्याग्नीनरण्योः स्वानुद्वस्येत्सहाग्निभिः* ।
उद्वासनेष्टिङ्कृत्वाऽथ समारोप्य हविर्भुजम् ॥ ८६ ॥
कृत्वा ब्रह्मौदनाग्निञ्च तथौपासनपावकम् ।
ब्रह्मौदनादिकं सिद्धं कृत्वाऽग्न्याधिं विधानतः ॥ ८७ ॥
पवित्रेष्टिं तन्तुमतीं वैधातव्यां क्रमाद्यजेत् ।
ऐन्द्राग्नेनैव पशुना यष्टव्यं केवलेन वा ॥ ८८ ॥

अरण्योः स्वान् पूर्वभार्यया सहाहितानग्नीनारोप्य समारोप्याग्निभिरग्न्यधिकरणीभूतारणीभ्यां सहोद्वसेत् । अत्रोत्पूर्वकोवसतिर्देशान्तरवचकः । तत्र विहरणादिकं कृत्वा उद्वासनेष्टिं कुर्यात् । ततोहविर्भुजमग्निं समारोप्य । तथा, पूर्ववदौपासनपावकमौपासनाग्निमेकदेशेन साकल्येन वा ब्रह्मौदनाग्निकृत्वा तस्मिन् ब्रह्मौदनादिकं सिद्धङ्कृत्वा, विधानतः पूर्वोक्तेन विधानेन । सार्वविभक्तिकस्तस् । अग्न्याधिं आधानं कुर्यात् । तदुत्तरं क्रमादनुक्रमेण पवित्रेष्टिं तन्तुमतीं वैधातव्येष्टिं यजेत् कुर्यादित्यर्थः । वेत्यथवा । इष्टित्रयस्थाने ऐन्द्राग्नेन पशुना केवलेनैव एकेनैव यष्टव्यम् ॥८६॥८७॥८८॥

मतभेदेनाह ।

अथवा पुनराधानमेवाचेष्टं न चेतरत् ।
शिष्यगां गुरुगां गर्भहन्त्रीं † त्यक्त्वैतदाचरेत् ॥ ८९ ॥

---

* सहाग्निभिः, — इति ङ॰ पुस्तके पाठः ।

† गर्भघ्नीं, — इति ग॰ पुस्तके पाठः ।

धर्मप्रजासमृद्धेषु दारेषु यदि कामतः ।
अन्यान् समुद्वहेद्दारांस्तदा पूर्वोदितं विधिम् ॥ ९० ॥
अनुष्ठाय मृगारेष्ट्या यजेतात्मविशुद्धये ।

अथवाऽत्र पुनः परिणये पुनराधानमेवेष्टमेतरत् । पवित्रेष्ट्यादिकं न भवतीति भावः । एवमेवाप्रियभाषिणीवन्ध्याव्यभिचारिणीं गुरुगामिनीं गर्भघ्नीं यद्यत्यक्ता एतत् पूर्वोक्तमाचरेत् । यदि दारेषु धर्मप्रजासमृद्धेषु पातिव्रत्यधर्मेण प्रजाभिः समृद्धेषु सत्सु कामतः कामार्थमेव अन्यान् दारान् समुद्वहेत् ,पुनर्विवाहं कुर्यात्, तदा पूर्वोदितं विधिं अनुष्ठायात्मविशुद्धये स्वपावित्र्यार्थं मृगारेष्ट्या यजेत सकृत् । एकविंशतिवारमावृत्येति बौधायनसूत्रे ॥८९॥ ९०॥

पक्षान्तरमाह ।

नादध्याद्वा मृगारेष्टिं पूर्वपत्न्या सहाचरेत्* ॥ ९१ ॥

नादध्यादिति । वा नादध्यात् पूर्वोक्तविधिनाऽऽधानं न कुर्यात् । आत्मविशुद्धये पूर्वपत्न्या सह मृगारेष्टिमाचमाचरेत् ॥९१॥

यदा कनिष्ठया सहाधानं न कृतं, तत्पक्षे विशेषमाह ।

नित्याग्निहोत्रं प्रेतायै न स्त्रियै दातुमर्हति ।
नाप्यादधीत पूर्वाग्निप्रग्निहोत्रं समाचरेत् ॥ ९२ ॥

---

* समाचरेत्, — इति ग॰ पुस्तके पाठः ।

नित्याग्निहोत्रं, नित्यमग्निहोत्रं क्रियते यस्मिन् तन्नित्याग्निहोत्र-मग्निमिति यावत् । पूर्वप्रेतायै कनिष्ठस्त्रियै दातुं नार्हति । इमे प्रेताग्नय इति बुद्धिलेखेन नापि आदधीत पुनराधानमपिन कुर्यात् । किन्तु पूर्वाग्निषु अग्निहोत्रं समाचरेत् कुर्यात् । अग्नि-होत्रपदं प्रकृतिविकृत्युपलक्षकम् । अविशेषात् ॥८२॥

यथा प्रेताऽग्नीन्नार्हति तथा जीवन्त्यपि कनिष्ठाऽऽधानाग्रहकृता सती कर्मजन्यफलभाक् नेत्याह ।

ज्येष्ठायां विद्यमानायां कनिष्ठायै स्वयोषिते ॥
काम्यं नित्याग्निहोत्रं वा न कथञ्चित् प्रयच्छति ॥८३॥

ज्येष्ठेति । ज्येष्ठायां ज्येष्ठपत्न्यां विद्यमानायां सत्यां कनिष्ठायै स्वयोषिते, काम्यं कर्म नित्याग्निहोत्रमुभयजन्यमदृष्टमिति यावत् । कथञ्चित् किमपि न प्रयच्छति । नादृष्टभाग्भवतीति भावः ॥ ८३॥

मतभेदेनाह ।

स्त्रीमात्रमविशेषेण दग्ध्वाऽन्ये वैदिकाग्निभिः ।
विवाह्याऽऽदधते यद्वाऽऽधानमेवास्ति चेद्वधूः ॥ ८४ ॥

अन्ये आचार्याः स्त्रीमात्रं अविशेषेण ज्येष्ठत्वादिविशेषमन्तरा वैदिकाग्निभिर्दग्ध्वा विवाह्य पुनर्विवाहकृत्वाऽऽदधते । यद्वा वध्व-न्तरमस्ति तदाऽऽधानमेव । अग्नीनां प्रेतार्थे दत्तत्वात् ॥८४॥

यदि न स्याद्विवाहस्तदा किमित्याह ।

एकाकी वाऽऽदधीताग्नीन् विवाहश्चेन्न सिध्यति।
नित्येष्ट्याग्रयणान्यग्निहोत्रं कर्मास्य नेतरत् ॥ ६५ ॥

एकाकीति। चेद्यदि विवाहो न सिध्यति न भवेत्, तर्हि एकाकी वाऽग्नीनादधीत। एतेन कुशपत्न्यादिकल्पनां विनैव विधुराग्निहोत्रं सिद्धम्। तत्र किं सिद्धमित्याह। अस्य विधुराग्निहोत्रिणः तेष्वग्निषु नित्येष्ट्याग्रयणानि। नित्येष्टी दर्शपूर्णमासौ। यद्यप्येतयोर्जीवननिमित्तेन नैमित्तिकत्वं प्रतिभाति, तथापि साधितं नित्यत्वं सिद्धान्ते। यद्वा, नैमित्तिकमपि नित्यमेव। यतोऽस्याकरणे प्रत्यवायजनकत्वमुत्पद्यमानदुरितप्रतिबन्धकत्वञ्चाप्नोतीति दिक्। इष्टिग्रहणात्पश्वादिकं न भवति। नित्योपादानात्काम्येष्वनधिकारः। आग्रयणं अग्रस्यायनं प्राप्तिरिति बह्वृचब्राह्मणभाष्यम्। अतस्तद्यवश्यं कर्त्तव्यमन्यथा जीवनविरोधात्। स्मर्यन्ते च तद्विनाऽन्नाशने बहवो दोषाः।

"अनिष्ट्वा तु नवैः सस्यैः देवानथ कृताग्रने।
प्राणानेवात्तुमिच्छन्ति येऽश्नन्ति काममोहिताः" इति।

तदत्र सस्यग्रहणात्सर्वेषां यागसाधनार्थत्वप्राप्तौ, व्रीहीन् यवान् वा हवींषि, व्रीहिभिर्यजेत यवैर्वा यजेतेति सूत्राभ्यामुभयोरेव यागसाधनत्वावगमादुभाभ्यामनुष्ठाने तत्तत्प्रभावजनितसस्यानामनुग्रहे पैत्रवार्षिकसस्यानुग्रहार्थं श्यामाकवेणवानामपि सङ्ग्रहः। न त्वाग्रयणात्पूर्वं नूतनगुल्मलतादीनां तत्तत्कालीनानामभक्ष्याणामिग्रभियुक्ताः। सस्यानामेवेत्यन्ये। व्रीहियवानामित्यपरे। अग्नौ हूयते

यत्, तदग्निहोत्रं पयः* तद्यत्र साधनत्वेन विद्यते, तदग्निहोत्रं कर्मनामधेयम् । तत्सदृशं कर्म भवतीति इतरत् चातुर्मास्यादिकं न ॥८५॥

मतान्तरमाह ।

एकाक्याधानपक्षस्तु† कर्मदीपे निराकृतः ।
जुह्वन्त्यन्ये मृतस्त्रीकाः कुशपत्नीसमन्विताः ॥ ८६ ॥
जुहोति न मृतस्त्रीक एकाकी पूर्ववह्निषु ।
भरद्वाजमतञ्चैतत् कर्मदीपे निरूपितम् ॥ ८७ ॥

एकाकीति । एकाक्याधानपक्ष एकाकिनोविधुरस्याधानपक्षः पूर्वोक्तः कर्मदीपे छन्दोगपरिशिष्टे निराकृतः कात्यायनेनेति भावः । कर्मण्युभयसाकाङ्क्षत्वात्पदार्थानाम् । कुशपत्नीविधानमाह । अन्ये आचार्याः मृतस्त्रीकाः कुशपत्नीसमन्विताः सन्तः जुह्वन्ति । ब्रह्म-ब्राह्मणाभावयोरिव श्रौतादिकर्मश्राद्धयोः । अत्रैव भरद्वाजमतमाह । मृतस्त्रीक एकाकी पूर्ववह्निषु न जुहोति । एतद्भरद्वाजमतं कर्मदीपे निरूपितम् । तेनैतन्मते पूर्वपदग्रहणात् पूर्व एवाग्न्यो-नाधानम् ॥८६॥८७॥

मृतपत्नीकस्य विवाहोत्तरं पुनराधानमेव स्वमतेनाह ।

आहिताग्निर्मृतस्त्रीक आदधानोऽन्यया सह ।
कृतारम्भादिधर्मोऽपि कृतसोममखोऽपि वा ॥ ८८ ॥

---

* अग्निहोत्रं पय, – इत्येतावन्मात्रपाठ ख० घ० ङ० पुस्तकेषु ।

† एकाक्याधानपक्षस्तु, – इति ग० पुस्तके पाठः ।

अक्षतारम्भसोमेज्यां भार्यामेवानुमन्यते* ।
नास्ति माहेन्द्रसान्नाय्यं सन्ति सारस्वतादयः ॥ ९९ ॥

आहिताग्निरिति । मृतस्त्रीको मृतपूर्वपत्नीक आहिताग्निरन्यया परिणीतया सह आदधान अपूर्वाधानं कुर्वाणः क्षता अनुष्ठिता आरम्भधर्माः सारस्वतहोमाद्यायेन तथाभूतः, क्षतः समादितः सोममखोयेनैवम्भूतोपि सन् । अक्षते आरम्भसोमेज्ये यया एवम्भूताम् । पूर्वमस्या अविद्यमानत्वात् । भार्यां पत्नीमेवानुवर्त्तते अनुलक्षीकरोति । अपूर्वाधानमेव भवतीति भावः । अतः माहेन्द्रसान्नाय्यं नास्ति न भवति । क्षतसोमवतो यजमानस्यैव तत्राधिकारात् । यजमानत्वञ्च व्यासज्यवृत्ति । उक्तञ्चैतत् चौमे वसामावग्निमादधीयातामित्यत्र ।

"कर्तृरूपस्य चैकोऽपि तदधिष्ठानभेदतः ।
युक्तन्द्विवचनं यद्वदग्नीषोमौ हि देवते" इति ॥

अतएवोक्तं तुल्य एवाधिकार इति । सारस्वतादयः शाखाविशेषेणाभिहितास्तत्संज्ञका होमास्तेऽपि भवन्ति अपूर्वत्वादेतस्याः ॥ ९८॥९९॥

मतान्तरमाह ।

केचित्पत्युः प्रधानत्वान्नाद्रियन्ते तु योषितम् ।
तेनेष्टौ स्यान्महेन्द्रेज्या न स्युः सारस्वतादयः ॥ १०० ॥
आहिताग्नेर्मृतस्त्रीकस्याधानं सन्न्यसिष्यतः ।
सन्न्यासं वारयन्त्यन्ये यावज्जीवाग्निहोत्रिणः ॥ १०१ ॥

---

* भार्यामेवानुवर्त्तते, – इति टीकासम्मतः पाठः ।

. केचिदिति । केचिदाचार्याः पत्युः पुरुषस्य प्रधानत्वात् साक्षादङ्गत्वात् योषितं पत्नीं पुरुषाङ्गत्वादप्रधानत्वाच्छ्रियन्ते आदरं न कुर्वन्ति । पुनराधानमेव कुर्वन्तीति भावः * । तदुक्तं रामाण्डरभाष्ये । यज्ञपात्राणीव पत्नी न यज्ञाङ्गमिति । किन्तु यज्वाङ्गम् । अतः पत्न्यनधिकारेऽपि † न निवर्तते भार्यम् ‡ । स्त्रीणां पतिप्रयुक्ताधिकारोपजीवनात् । तथाच चयिायाः अग्नीषोमीये नाधिकारदर्शनमप्रधानत्वाच्च । यदा चाङ्गेन विधुरतां नीयादिति यजमानस्याङ्गं पत्नीति दर्शनात् । अतएवेयमभियुक्तोक्तिः सङ्गच्छते । यदा हि पत्युः पत्न्याश्च आहवनीयादिकामनयाऽऽधानेऽधिकारः सिद्धस्तदा कृतविद्यैव कर्मनिर्वाहे तस्या अकृतविद्यापरिकल्पनपरिजिहीर्षया सहाधिकार उपपद्यते । तस्या आहवनीयाद्यकामनायास्तु न सहाधिकारः भर्त्रधिकारे केवलाज्यावेक्षणादौ कर्तृत्वमात्रं तस्याः । ऋत्विगादेरिव सोमादौ । एवमाहवनीयादिसाध्येषु दर्शपूर्णमासादिष्वपि पत्न्याः फलकामनायां सहाधिकारः। तदभावे तु पत्युरेवाधिकारः। पत्न्यास्तु केवलमाज्यावेक्षणादौ कर्तृत्वमात्रं नाधिकार इति । अतएवावोचत् ।

"रजोदोषे समुत्पन्ने नित्यं नैमित्तिकं कार्यम्"—इति ।

काम्यमपीष्यते केचित् । तेन कारणेनेष्टौ प्रकृतौ महेन्द्रेज्या

---

* च्यादरं न कुर्वन्तीति भाव,—इति क० पुस्तके पाठः ।

† पत्न्यधिकारेऽपि,—इति ख० घ० पुस्तकयोः पाठः ।

‡ साध्यं,—इति क० पुस्तके पाठ । साम्नाय्यं,—इति तु प्रतिभाति ।

स्यात् सन्न्यासं भवति । सारस्वतादयो होमाः प्रारम्भकालीया न स्युः कृतप्रारम्भसोमेज्यावत्त्वाद् यजमानस्य । पत्न्यास्तु यजमानपदानभिधेयत्वात् ।

आश्रमादाश्रमान्तरं गच्छेदिति क्रमप्राप्तस्यानुवादमाह । मृतपत्नीकस्याहिताग्नेः सन्न्यसिष्यतः सन्न्यासं कर्तुमिच्छतः पुरुषस्याधानं नेत्यनुषङ्गः । भरद्वाजेनैकाकिन आधानस्य निराकृतत्वात् । मतान्तरमाह । अन्ये यावज्जीवाग्निहोत्रिणः सन्न्यासं वारयन्ति निषेधयन्ति । यतोहि यावज्जीवमग्निहोत्रसम्बन्धस्य विवक्षितत्वात् । आगूः कृत्वा न क्रियते स पापी भवतीत्यर्थश्रवणाच्च * ॥ १०१ ॥

कर्मलोपे नैमित्तिकमाह ।

हुतेषु पञ्चहोमेषु पञ्चत्रयमनन्तरम् ।
कर्त्तव्यं पुनराधेयं मथ्यमानो हुताशनः ॥ १०२ ॥
दृष्टमात्रोऽनुगच्छेच्चेत्तत्र तस्य विनाशनम् ।
शतशोऽनुगमे चान्यैः पुनर्निर्मथ्य जप्यते † ॥ १०३ ॥
नष्टे मथितमात्रे वा समारोपयजुर्जपेत् ।
पुनर्निर्मथ्य जप्तव्यं यजुस्तूपावरोहणम् ॥ १०४ ॥

पञ्चाणामन्त्यं पञ्चत्रयं, सन्ततं पञ्चहोमेषु कृतेषु सत्सु अनन्तरं चतुर्थपञ्चेऽपि पञ्चहोमे कृते सत्यनन्तरशब्दार्थः ‡ । पुनराधेयं कर्त्त-

---

* चार्थवादश्रवणाच्च, — इति भवितुमुचितम् ।

† शतशोऽनुगमैर्वान्यैः पुनर्निर्मथ्य जायते, — इति ग॰ पुस्तके पाठः ।

‡ सतीत्यनन्तरशब्दार्थः इति भवितुमुचितम् ।

व्यम् । षडापत्तिरूपितनिमित्ततावच्छेदकावच्छिन्नकारणताककार्यस्य पञ्चहोमस्य तन्निवृत्तिरेव पञ्चहोमप्रयोजिकेत्यन्ये । तेन, आपदेवावधिस्तत्र न पञ्चगणनावधिरिति मन्तव्यम् । एकप्रयोजकत्वप्रसङ्गादाह । मथ्यमानोमथ्यतेऽसौ मथ्यमानः । मन्थनसमानाधिकरणकालोऽञ्छताग्रनोऽग्निः दृश्यमानः सन् अरणिस्थ एव यन्त्रविमोके कृतेऽकृते वा चेदनुगच्छेत्, तत्र तन्निमित्ते तस्याग्नेर्विनाशनम् अग्निनिष्ठसंस्कारनाशः, पुनराधेयमिति यावत् । मतान्तरमाह । अन्यैराचार्यैः शतशोऽनुगमेऽपि अरणिस्थस्याग्नेरेव प्रकृतत्वात् पुनर्निर्मथ्य जप्यते । यस्यां शाखायामग्निजननोत्तरमुपावरोहणजपोऽभिहितोऽस्ति तज्जपः कार्य इत्यर्थः । पक्षान्तरमाह । चेत्यथवा, मथितमात्रे, खरस्थापनात् पूर्वमेवेति मात्रशब्दार्थः । नष्टे सति, समारोपयजुर्जपेत् । समारोपणमन्त्रजपं यत्राग्निरुपशान्तस्तत्स्थानमभिस्पृश्य जपेदित्यर्थः । पुनर्निर्मथ्य उपावरोहणं तत्प्रकाशकं यजुर्मन्त्रं जप्तव्यं जपेदित्यर्थः । विध्यर्थे तव्यत् । तथाच पुनराधेयं नेत्यर्थः ॥१०२॥१०३॥१०४॥

उपघाते नैमित्तिकमाह ।

अन्येन हेतुना वह्निरुपशान्तो यदा भवेत् ।
कर्त्तव्यं पुनराधेयं* यत्रपार्श्वे निरूपितम् ॥ १०५ ॥
तदैव† पुनराधेयमग्नावनुगते सति ।
असमाधाय चेत् स्वामी सीमामुल्लङ्घ्य गच्छति ॥ १०६ ॥

* पुनराधानं,—इति ग॰ पुस्तके पाठः ।

† तदेव,—इति क॰ ख॰ पुस्तकयोः पाठः ।

जलेनेति। जलेन हेतुना जलरूपकारणेन वह्निर्यदोपशाम्यः सामग्र्यैकदेशेन वा, तदा यज्ञपार्श्वोक्तं पुनराधानं कर्त्तव्यम्। एतत्सर्वसम्मतम्। पुनराधेयनिमित्तमाह। अग्नाविति। अग्नौ अनुगते सति चेद्यदि असमाधाय मन्थनेन अग्न्युत्पादनपूर्वकमुपसमाधानमकृत्वा स्वामी यद्वा पत्नी वा, उभयोरपि स्वामित्वात्साम्येन, सीमामुल्लङ्घ्य अग्रे किञ्चिदपि गच्छति। तदैव पुनराधेयं, भवतीति शेषः॥१०५॥१०६॥

उपघाते नैमित्तिकमाह।

सूकररासभकाकसृगालैः
कुक्कुरकुक्कुटमर्कटशूद्रैः *।
अन्त्यजपातकिभिः कुणपैर्वा
सूतिकयाऽपि रजस्वलया वा॥१०७॥
रेतोमूत्रपुरीषैर्वा पूयाश्रुश्लेष्मशोणितैः।
दूषास्थिमांसमज्जाभिरन्यैर्वाऽपि जुगुप्सितैः॥१०८॥
आरोपितारणीस्पर्शे कृतेऽग्नेः † स्पर्शनेऽपि वा।
आत्मारूढेषु मज्जेद्वा वदेद्वा पतितादिभिः॥१०९॥
अथ वा योषितं गच्छेदन्तौ काममोहितः।
वदन्त्येषु निमित्तेषु केचिदग्निविनाशनम्॥११०॥

---

* कुक्कुटमर्कटशूद्रे,—इति द्वितीयचरणपाठः क० ख० पुस्तकयोः। टीकासम्मतोऽप्ययं पाठः।

† कृतेऽग्नौ,—इति क० ख० पुस्तकयः पाठः।

सूकरेति। सूकरोद्विविधोऽपि वराहः। रासभकाकौ प्रसिद्धौ। शृगालः क्रोष्टा। कुक्कुटस्ताम्रचूडः। मर्कटोऽनेकजातीयो वानरः। उपलक्षणया श्वाऽपि सङ्गृह्यते। श्वसूकरेत्यपि पाठः। शूद्रः सच्छूद्रो-ऽसच्छूद्रः तत्सदृशाश्च समानन्यायात्। अन्त्यजः सप्तविधः।

"रजकश्चर्मकारश्चैव नटोबुरुड एव च* ।

कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥

पातकिन उपपातकिव्यतिरिक्ताः। सर्वेषामपि अतद्विनाभावित्वात्। कुणपं शवम्। सूतिकया दशरात्रादर्वाक्। तदुत्तरं सूतिकाऽव्यवहारात्। रजःस्वलया पुष्पवत्याऽऽचतुर्थाहः। तदुत्तरमतद्व्यवहारात्। रेतसा पुंसः स्त्रियो वा, रेतःसामान्यात्। मूत्रपुरीषमणुभयोः, सामान्यात्। पूयः मलविशेषः क्षतादिजन्यः। अश्रु आर्त्यनार्त्तिभेदाद्द्विविधमपि। श्लेष्मा नासिकामलः कफश्च। इदं लालाया उपलक्षणम्। अतएव, मुखविप्रुषपातभयाद्गमने नलिकादिकं धार्यम्। शोणितं प्रसिद्धम्। एतज्जीवमात्रस्य। अस्थि जीवजातस्य, होमातिरिक्तम्। मांसमपि तथैव। मज्जा धातुविशेषः शुभ्रं घनं जलम्। जीवमात्रस्यैतत्। एतैः सूकरादिभिस्तथा अन्यैः उक्तेभ्योऽतिरिक्तैर्जुगुप्सितैर्निन्द्यैर्वसाघर्मकर्णमलादिभिरारोपितारणीस्पर्शे समारूढारणिस्पर्शे। वेत्यथवा, अग्नेरसमारोपितस्वरस्याग्नेः स्पर्शने कृते। तथा, आत्मारोपितेषु मज्जेद्गङ्गादिषु मज्जनं कुर्यात्। तच्च सशिरस्कम्। अशिरस्कन्तु कार्यमेव, स्नानस्याधिकारिविशेषणत्वात्। पतितादिभिः, आदिपदादन्य-

---

* नटोवरुड एव च,—इति ग्रन्थान्तरधृतः पाठः।

जादिभिश्च, सान्निध्यात् । तथा, काममोहितः, सन् ऋतुव्यतिरि-
क्तकाले योषितं खस्त्रीमपि गच्छेत् * एषु पूर्वोक्तेषु निमित्तेषु सत्सु
केचिदाचार्या अग्निविनाशनमिच्छन्ति । अग्रे पक्षान्तरस्य वक्ष्यमाण-
त्वात् केचिदित्युक्तम् । तत्रात्मारोपणपक्षे मज्जनादिकं निमित्तम् ।
असमारूढारणिसमारूढपक्षे तु जुगुप्सितान्तानि निमित्तानि ।
तत्रार्तवमैथुनस्य, ऋतुस्नातान्तु यो भार्यामित्यादिधर्मसंहिताभिर्चो-
दितत्वान्न दोषः ॥१०७॥१०८॥१०९॥११०॥

तत्र विशेषमाह ।

तत्रारणीगते वह्नौ नष्टे† स्यात् पुनराहितिः ।
इतरेषु निमित्तेषु त्वग्न्याधेयं प्रचक्षते ॥ १११ ॥

तत्रेति । तत्र तेषु निमित्तेषु अरणिगते वह्नौ अर्थात् समा-
रोपितारण्योर्जातेषु सत्सु अग्नौ नष्टे पुनराहितिः पुनराधानम् ।
यद्वा, नष्टे इति वह्निविशेषणम् । इतरेषु प्रत्यक्षात्मारोपितेष्वग्निषु,
निमित्तेषु जातेषु अग्न्याधेयं पुनराधेयं प्रचक्षते ॥१११॥

पक्षान्तरमाह ।

यदा सर्वोपघातेषु पुनस्त्वेति समिन्धनम् ।
द्रव्यस्याग्न्युपघाते च‡ द्रव्यशुद्धिसमिन्धने ॥ ११२ ॥

* खस्त्रीमभिगच्छेत्, — इति घ० पुस्तके पाठः ।

† दुष्टे, — इति ग० पुस्तके पाठः ।

‡ द्रव्यस्याग्न्युपघातेषु, — इति ग० पुस्तके पाठः ।

. यद्वेति । सर्वोपघातेषु पूर्वोक्तेषु, पुनस्त्वेति मन्त्रेण समिन्धनं समिदाधानम् । समृद्धस्याग्नेः पुनः समिन्प्रक्षेपेण प्रदीप्ततरकरण-मित्यापस्तम्बीयात् ।

प्रसङ्गादाह ।

द्रव्यस्येति । द्रव्यस्याग्न्युपघाते, द्रव्यस्वरूपापाचादिभ्योऽग्निस्तदुप-घाते, यथोक्ता द्रव्यशुद्धिः पात्रशुद्धिः समिन्धनं पूर्वोक्तं भवति । यथा तप्तचरुपात्रे श्वादिस्पृष्टे सति भस्मादिना पात्रशुद्धिः तद्-दृत्त्यग्न्यवधवस्पर्शः समिन्धनञ्च ॥११२॥

अरणीसमारोपप्रसङ्गादाह उपघात प्रसङ्गादाह ।

आरोपितारणी चोभे एका वा यदि नश्यति ।
तत्राग्न्याधेयमिच्छन्ति पुनराधानमेव वा ॥ ११३ ॥

आरोपितेति। आरोपितारणी कृतसमारोपारणी उभे द्वे वा अथ वा एका यदि चेन्नश्यति । तस्मिन् निमित्ते पुनराधेयं पुन-राधानमेव वा भवति। इच्छाविकल्पोऽयम् ॥११३॥

बौधायनमतेनाह ।

एकारण्यां विनष्टायामस्ति चेदितराऽरणिः ।
तां छित्वा मन्थनं प्रोक्तं भाष्ये बौधायनीयके ॥ ११४ ॥

एकेति । एकारण्यां एकस्यामधरोत्तरयोरन्यतरस्यामरण्यां वि-नष्टायां सत्यामितराऽन्यतराऽरणिरस्ति चेत्। तामदुष्टामेकारणिमेव छित्वा भागद्वयं कल्पयित्वा मन्थनं कार्यं यथोक्तम्। इति बौधाय-

जादिभिश्च, सान्निध्यात् । तथा, कामसोहितः, सन् ऋतुव्यतिरि-क्तकाले योषितं स्वस्त्रीमपि गच्छेत् * एषु पूर्वोक्तेषु निमित्तेषु सत्सु केचिदाचार्या अग्निविनाशनमिच्छन्ति । अग्रे पक्षान्तरस्य वक्ष्यमाण-त्वात् केचिदित्युक्तम् । तत्रात्मारोपणपक्षे मज्जनादिकं निमित्तम् । असमारूढारणिसमारूढपक्षे तु जुगुप्सितान्तानि निमित्तानि । तत्रार्त्तवमैथुनस्य, ऋतुस्नातान्तु यो भार्यामित्यादिधर्मसंहिताभिश्चो-दितत्वान्न दोषः ॥१०७॥१०८॥१०९॥११०॥

तत्र विशेषमाह ।

तत्रारणीगते वह्नौ नष्टे † स्यात् पुनराहितिः ।
इतरेषु निमित्तेषु त्वग्न्याधेयं प्रचक्षते ॥ १११ ॥

तत्रेति । तत्र तेषु निमित्तेषु अरणिगते वह्नौ अर्थात् समा-रोपितारण्योर्जातेषु सत्सु अग्नौ नष्टे पुनराहितिः पुनराधानम् । यद्वा, नष्टे इति वह्निविशेषणम् । इतरेषु सत्यचात्मारोपितेष्वग्निषु, निमित्तेषु जातेषु अग्न्याधेयं पुनराधेयं प्रचक्षते ॥१११॥

पक्षान्तरमाह ।

यद्वा सर्वोपघातेषु पुनस्त्वेति समिन्धनम् ।
द्रव्यस्याग्न्युपघाते च ‡ द्रव्यशुद्धिसमिन्धने ॥ ११२ ॥

---

* स्वस्त्रीमपिगच्छेत्, — इति घ० पुस्तके पाठः ।

† दुष्टे, — इति ग० पुस्तके पाठः ।

‡ द्रव्यस्याग्न्युपघातेषु, — इति ग० पुस्तके पाठः ।

नीयके, बौधायनेन प्रोक्तं बौधायनीयं तदेव बौधायनीकं, स्वार्थे कप् । एवम्भूते भाष्ये भाष्यन्ते वेदार्था येन तद्भाष्यं सूत्रं, तस्मिन् प्रोक्तम् ॥११४॥

एतस्य बह्वृचादिसम्मतत्या प्रामाण्यमाह ।

एतदङ्गीकरोतीह भवनागोऽपि बह्वृचः ।
नष्टायाः प्रतिपत्तिः स्यादुभयारणिनाशवत् ॥ ११५ ॥

बह्वृचः भवनागोऽपि इहास्मिन् एतत् पूर्वोक्तं बौधायनीकं अङ्गीकरोति । नष्टाया अन्यतरारण्याः प्रतिपत्तिः उभयारणिनाशे वक्ष्यमाणा या प्रतिपत्तिः तद्वत् कार्येतिशेषः । भवतन्न इति मन्त्रेण नष्टामेकामप्सु निमज्जयेदित्यर्थः ॥११५॥

प्रसङ्गादप्रकृतमप्याह ।

अरणी मन्थनाशक्ते जन्तुभिर्मन्थनेन वा ।
स्यातांश्चेदरणी नूभे ग्राह्ये शास्त्रोक्तलक्षणे ॥ ११६ ॥

अरणी इति । अरणी उभे अपि मन्थनाशक्ते जन्तुभिः कीटैर्मन्थनेन वा हेतुना च्यवशान्मन्थनाक्षमे स्यातांश्चेत्, तदा तु पुनः शास्त्रोक्तलक्षणे तूले नूतने ग्राह्ये। अत्र हेत्वर्थकतृतीयोपान्तकीटपदोपादानात् मन्थनेऽशक्तौ हेतुभूतकठिनलग्रन्थिमत्त्वसुषिरत्वादीनामप्युपलक्षणया सामान्यप्रत्यासत्त्या सङ्ग्रहः। यथा काकेभ्योदधिरक्ष्यतामित्यादिषु ॥११६॥

तद्विधिमाह ।

श्वोभूतेऽनुष्ठिते दर्शे तस्मिन् जीर्णारणिद्वयम् ।
शकलीकृत्य पाश्चात्ये वह्नौ निःक्षिप्य दीपयेत् ॥ ११७ ॥
ते उभे अरणी तत्र दीप्तेऽग्नौ धारयन् जपेत् ।
उद्बुध्यस्वाग्नइत्येतदयन्ते योनिरित्यपि ॥ ११८ ॥
ततो दक्षिणहस्तेन नूतनामुत्तरारणिम् ।
गृहीत्वा सव्यहस्तेन गृहीत्वा चाधरारणिम्* ॥ ११९ ॥

श्वोभूत इति । प्रातरनुष्ठीयमानदर्शयागात्पूर्वदिनेऽमायां प्रातरग्निहोत्रं कृत्वा अश्वत्थाद्धव्यवाहेत्यादिमन्त्राभ्यामाहरणं पूर्ववदुपयोक्तायामविस्तारयोर्निजारण्योरिति श्वोभूतपदेन व्यज्यते । अत्र दर्शग्रहणात्पौर्णमास्यां न भवति । दर्शपूर्णमासयोरेककर्मत्वादाह । तस्मिन् प्रारब्धे दर्शे अनुष्ठिते सति यागे जीर्णारणिद्वयं मन्थनाशक्तं पूर्वारणिद्वयं शकलीकृत्य खण्डशः कृत्वा, अभूततद्भावे च्विः, पाश्चात्ये वह्नौ गार्हपत्ये निःक्षिप्य दीपयेत् ॥

ततस्तदनन्तरं दक्षिणहस्तेन नूतनामुत्तरारणिं गृहीत्वा, परिशेषाद्वामेनाधरारणिमित्यध्याहारः । ते नूतने उभे अरणी तस्मिन्निति तत्र दीप्तेऽग्नौ धारयन् सन् जपेत् ॥

किं जपेदित्याह । उद्बुध्येति । उद्बुध्यस्वाग्न इति प्रकारेण एतद्यजुः, अयन्ते योनिरित्यपि यजुः, जपेदित्यन्वयः ॥ ११७ ॥ ११८ ॥ ११९ ॥

* सर्वेषामेकरूपत्वात्मन्त्रस्वरूपमाह ।

---

* एतदर्द्धं ग॰ पुस्तकातिरिक्तपुस्तकेषु नास्ति । नापि टीकासमतम् । परन्तु सङ्गतत्वात् ग॰ पुस्तकानुसारेण निवेशितम् ।

उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यां वोढवे जातवेदः । अरण्योररणीमनुसङ्क्रमस्व जीर्णान्तनुमजीर्णया निर्णुदस्वेति प्रथमोमन्त्रः ।

उद्बुध्यस्वाग्ने इत्यादि निर्णुदस्वेत्यन्तोमन्त्रः ।

ततः किं कुर्यादित्याह ।

मन्थनस्याहृता सम्यङ्मथित्वाऽग्निं विहृत्य च।
विलाप्योत्पूय दर्भाभ्यां स्रुच्याऽऽदाय चतुर्घृतम्॥१२०॥
जुहोत्याहवनीयाग्नौ मनस्वत्या घृतान्तया ।
इष्टिं तन्तुमतीं कुर्याच्छरावं दक्षिणां ददेत् ॥ १२१ ॥

मन्थनस्येति । मन्त्रजपानन्तरं मन्थनस्याहृता इतः प्रथममित्यादि मन्थन कृत्वा ततः सम्यक् मन्थनाहृताऽग्निं मथित्वा प्रकटीकृत्य, विहृत्य विहरणं कृत्वा, विलाप्याज्यस्याज्यमाज्यनिर्वापं कृत्वा, दर्भाभ्यामुत्पूय, स्रुचि जुह्वां चतुर्वारं घृतं चतुर्घृतं आदाय, घृतान्तया घृत इति शब्दान्तया मनस्वत्या ऋचा आहवनीये अग्नौ जुहोति । शाखान्तरे अन्यथा श्रवणात् घृतान्तयेत्युक्तम् । ततस्तन्तुमती तत्संज्ञकामिष्टिं कुर्यात् । शरावं दक्षिणां दद्यात् । अन्वाहार्य्येण समुच्चित्य दद्यात् । शाखान्तरे तु केवलं शरावं दद्यात् । तल्लक्षणन्तु,

वृत्तं प्रादेशमात्रन्तु शरावं निगमोदितम्,—इति ।
तन्तु धान्यपूर्णं दद्यादित्येके ॥१२०॥१२१॥

इत्यनारोपितारण्योः क्षये ग्राह्ये नवे पुनः ।
तदलाभे यदोद्दायेत् तदा स्यात् पुनराहितिः ॥ १२२ ॥

इति अमुना प्रकारेण अनारोपितारण्योः क्षये नाशे अपहार-गृहदाहादिजन्ये जन्वादिमथनाक्षमे वा, पुनः नवे नूतने ग्राह्ये स्वीकार्य्ये। यदि नूतने न लभ्येते, तदा किमित्यत आह। तदिति। तदलाभे नूतनारण्योरलाभे यदा उद्दायेदनुगच्छेत्, तदा पुनराधानं स्यात्तत् पूर्व्वोक्तोविधिः। अरण्योरपहारादौ यावदग्नि-रक्षणं तावन्न पुनराधानम्, मध्यएव नूतनारणिस्वीकारे नाधानम्, अलाभे च तस्मिन्नग्न्युपशमे आधानमिति ॥१२२॥

प्रसङ्गादरणीनाशनिमित्तान्याह ।

शूद्रोदक्यान्त्यकाकश्वपतितामेध्यरासभैः ।
अनारूढारणिस्पर्शे ते विहायान्ययोर्ग्रहः ॥ १२३ ॥

शूद्रेति। शूद्राश्चरमवर्णाः प्रतिलोमजाश्च। उदक्या रजस्वला। अन्यथा अन्त्यजाः पूर्व्वोक्ताः। काकश्वानौ प्रसिद्धौ। पतिताः पातित्य-प्रसङ्गकर्म्मकारिणः। अमेध्यं मूत्रादि। रासभश्चक्रीवान्। एतैरना-रूढारणिस्पर्शे ते विहायान्ययोररण्योर्यथोक्तयोर्ग्रहः स्वीकारः पूर्व्वोक्तः कार्य्य इति ॥ १२३॥

नष्टारणिप्रतिपत्तिमाह ।

भवतन्नः समेत्यप्सु मज्जयेद् दूषितारणी ।
एकाऽरण्येव दुष्टा चेत्तामेवाप्सु निमज्जयेत् ॥ १२४ ॥

भवतं न इति। भवत नः समनसेति मन्त्रेण अप्सु दूषिता-

रणी युगपन्मज्जयेत् । सिंहावलोकनन्यायेन पूर्वोक्तमेवानुवदति । एकारण्येव दुष्टा दोषयुक्ता चेत्, तामेव दुष्टामेव अप्सु निमज्जयेत्, न तु माहार्य्यादुभे ॥१२४॥

अथान्यारणिलाभात् प्रागुद्दाते* पुनराहितिः ।
काष्ठशुद्ध्या विशोध्ये वा त्यजेद्दोषेऽतिसन्तते ॥ १२५ ॥
अल्पदोषे शुद्धिरेव त्यजेद्दोषेऽपि नारणी† ।

---

* तथान्यारणिलाभात् प्रागुद्दाने, – इति ग० पुस्तके पाठः ।

† एतस्मात् परं ग० पुस्तके योऽधिकः पाठोऽस्ति, स इह प्रदर्श्यते, –

उद्दाने पुनराधानं छन्दोगपरिशिष्टतः । आत्मारोपे शरीरस्य नाशे नश्यति पावकः । शवदेहे विनष्टेऽपि दक्षिणः पाणिरस्ति चेत् । लोकाग्नौ स्थापयित्वाऽस्य पाणिं पुत्रो जपेद्यजुः । उपावरोह जातेति तूष्णीमग्निं नमेत्ततः । द्वादशोपात्तेनाज्येन तूष्णीकं जुहुयात् स्रुचा । इष्ट स्नातः प्रपद्येत प्रेते मात्याऽऽहुतिक्रियाम् । सकले कुणपे लब्धे एष एव विधिर्भवेत् । अभावरण्योरारूढे प्रमीयेत पतिर्यदि । प्रेतं स्पृष्ट्वा मथित्वाऽग्निं अस्मा चोपावरोहणम् । हुतं च द्वादशोपात्तं तूष्णीं कृत्वा शवक्रियाम् । उपारोह जातवेद इमं स्वर्गाय लोकाय नय प्रजानन् । आयुः प्रजां रयिमस्मासु धेहि प्रेताहुतीश्चास्य जुषस्व स्वाहा । इत्युपारोहमन्त्रपाठभेदः । विच्छिन्नवह्निमुत्सृष्टपावकं विधुरानलम् । आहिताग्निं मृतं दग्धुं त्रेताऽग्न्युत्पत्तिसिद्धये । भरद्वाजादयः प्राहुः प्रेताधानविधिं पृथक् । प्राचीनावीतवानुद्धृत्यावोद्ध्यायतनान्यथ । प्रेतं स्वाम्यालये छित्त्वा मथ्नीयात् स्वालयेऽरणी । सन्निधायानलं मन्थेद् यस्त्वेति यजुषाऽनलः । यस्यामयो जुह्वतो मांसकामाः सङ्कल्पयन्ते यजमानमांसम् । जायन्तु ते हविषस्तद्धिताय स्वर्गं लोकमिमं प्रेतं

अथास्मिन् निमित्ते सति क्षिप्रं नूतनारणिस्वीकार उचितः। यदि विलम्बयेत्, तदा अन्यारणिलाभात् स्वीकारात् प्राक् पूर्व्व उद्दाते अग्नौ पुनराहितिः। तदुक्तम्,

नष्टायामरणौ यावदग्निस्तिष्ठति वेश्मनि।
तावद्धोमादिकं कृत्वा तन्नाशे पुनराहरेत्॥

इति देवयाज्ञिकग्रन्थे। स्वसूत्रानुरोधेनैव पक्षान्तरमाह। काष्ठशुद्धेति। पूर्व्वपक्षनिरासार्थो वा शब्दः। वेत्यथवा, काष्ठशुद्ध्या विशोध्य, न पुनराधानम्। काष्ठशुद्धिः स्मृत्यन्तरादौ प्रसिद्धा तक्षणादिः। इयञ्च शुद्धिः सकृद्दोषविषया। अतिसन्तते दोषे त्यजेदेव। सर्व्वं वाक्यं सावधारणमिति न्यायात्। अल्पदोषे तु शुद्धिरेव। महद्दोषे अरणौ न त्यजेत्, मूले सन्ततग्रहणात्॥१२५॥

क्रियालोपस्वरूपान्तरमाह।

प्रागादित्योदयाद्धोमं सङ्कल्प्य न जुहोति चेत्॥१२६॥
अग्न्याधिः पुनराधिर्वा नोभयं स्वामिसन्निधौ।

मयन्तु। इति मन्थनमन्त्रः। प्रणीय पावकं तूष्णीं दारप्रोयात्तसमिधा। तूष्णीं कृत्वा तत कुर्य्यात् प्रेते मात्राऽऽहुतिक्रियाम्। नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत्। आदद्यादरणीद्वन्द्वमाधानोक्तविधानतः। तद्यथा। तदेवाग्निमग्न्यास्तन्मन्त्राभ्यां विनिर्दिशेत्। निर्मन्थ्ये पावके यदीयासमार्थे तदस्ति चेत्। ततोऽग्निरन्यप्रेतोक्तमन्थनादि प्रपद्यते। यत्तु यस्यामयो शुक्लेत्यादिमन्त्रकर्मोदितम्।
अयमग्र पुस्तकान्तरेषु पूर्व्वमेव गतः।

आदित्योदयात् प्राक् होमं सङ्कल्प्य चेत्, स, जुहोति। तदाऽऽधानमाधेयं वा भवति । स्वामिनो यजमानस्यासन्निधौ तु नोभयम् । अनुदितहोमपरिग्रहं कृत्वा यदि निमित्तं विना उदिते जुहोति तदा पुनराधानं न तु सति निमित्ते। दैवात् मानुषाद्वाऽपराधादनुदितहोमिनोऽपि गौणकाले होमाम्नानात्। स्वाम्यसन्निधौ तु वचनान्न भवति । यद्वा । निमित्तसद्भावपरतया न व्याख्येयम् । अनुदिते होमपरिग्रहिणा उदयात् पूर्वमकृते होमे पुनराधानमेव। गौणकालकथनं तु यजमानासन्निधाने । स्वामिसन्निधाविति पाठे तु, यजमानासन्निधाने न गौणकालविधानम् । किन्तु स्वामिसन्निधाने गौणकाल इत्यर्थः समायाति ॥१२६॥

क्रियालोपस्यैव स्वरूपान्तरमाह ।

अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकम् ॥ १२७ ॥
प्रायश्चित्तमसौ स्मार्त्तं कृत्वाऽग्नीनादधीत च ।

यष्टरि प्रवसितरि अमृतं यष्टारं मृतमाकर्ण्य पुत्रादिना यस्य यष्टुरौर्ध्वदेहिकं पर्णशरविधिना कृतम् । पश्चात् क्रियता कालेनागतेन यष्ट्रा किं कार्यमत आह ।

प्रायश्चित्तेति । असौ स्मार्त्तं प्रायश्चित्तं कृत्वा अग्नीन् पुनरादधीत च ॥१२७॥

बौधायनोक्तं निमित्तान्तरमाह ।

नाशापहारावग्नीनां यद्वाऽऽरूढारण्योर्यदा ॥ १२८॥

तदात्मारोपमार्गेण* लौकाग्नावववरोहणम् ।
कुर्यान्न पुनराधानमिति बौधायनोऽब्रवीत् ॥ १२९ ॥
अत्यन्तसङ्कटे क्वापि पक्षोऽयमुपयोक्ष्यते ।
तच्चैतेषु निमित्तेषु नष्टानां पुनराहितिः ॥ १३० ॥
स्थितानुत्सृज्य चान्येषु पुनराधानमिष्यते ।
तचोत्सर्गनिमित्तेषु यदाऽग्नीनां विनाशनम् ॥ १३१ ॥
नष्टेपूत्सर्गहेतुषाधायोत्सृज्याहितिस्तदा ।

अग्नीनां यदा आरूढारणेः समारोपितारणेरित्यर्थकत्वमविवक्षितम्। नाशापहारौ यदा स्यातां, तदा आत्मारोपणप्रकारेण लौकाग्नौ अवरोहणं कुर्यात् न पुनराधानमिति बौधायनोऽब्रवीत् । अयं पक्षः अत्यन्तसङ्कटे महापदि कदाचित् उपयोगाय भवति न सर्वदा । उपसंहरति । तच्चेति । तच्च सर्वनिमित्तेषु मध्ये एतेषु पूर्वोक्तेषु निमित्तेषु सत्सु नष्टानां पुनराहितिः । अन्येषु उत्सर्गपूर्वकपुनराधाननिमित्तेषु जातेषु, स्थितान् स्वरे विद्यमानान् अग्नीनुत्सृज्य पुनराधानमिष्यते । तचोत्तरार्द्धे स्थितमुत्सर्गनिमित्तेष्विति पदमन्येष्वित्यनेन विशेषणीयम् । तच्चेति । तत्रापि उत्सर्गहेतुषु उत्सर्गपूर्वकपुनराधेयनिमित्तेषु केषु चिज्जातेषु, नष्टेषु सत्सु अग्निष्विति शेषः। तदा आधायोत्सृज्य पुनराधेयम् । यथा, पुनराधेयमाधानप्रतिज्ञातस्य राजयक्ष्मामयेत्युपक्रम्य चिरायावरमग्नीनुत्सृज्येति उत्सर्ग आम्नातः। तत्राग्नयः स्थितायेत्तदा स्थितानामेवाग्नी-

* तदात्मारोपमार्गेण, — इति सटीकपुस्तकेषु पाठः ।

नामुत्सर्गपूर्वकमाधेयम् । यदा तु केनचिन्निमित्तेनाग्निनाशे जाते अनुत्सर्गविशिष्टाधेये आधाने वा प्रसक्ते आधानाप्रतिज्ञात इत्यादिना उत्सर्गविशिष्टाधेये च प्रसक्ते तदा भ्रष्टानग्नीनाधेयेनाधानेन वा समाधोत्सृज्य पुनराधेयमिति भावः ॥१२८॥१२९॥१३०॥
१३१॥

तथा येषु निमित्तेषु सर्वैर्नाशोऽभिधीयते ॥ १३२ ॥
नष्ट एव भवेत्तत्र येषु नाशो विगीयते ।
तत्र किन्तु* भवेत्तावद्विकल्पो न हि सम्भवेत् ॥ १३३ ॥

पूर्वोक्तेषु येषु निमित्तेषु सर्वैर्नाशः अभिधीयते, तत्र तस्मिन् निमित्ते नष्ट एव भवेत् । पक्षान्तरश्रवणाभावात् । येषु निमित्तेषु नाशो विगीयते परैर्निन्दितो भवति तत्र किन्तु भवेदिति प्रश्नः ।

तत्र पक्षान्तरे सत्यपि तदाश्रयणं न कार्यमित्याह तावदादौ। विकल्पो न हि सम्भवेत् । यथा

ज्येष्ठा चेत् बहुभार्यस्य ह्यतिचारेण गच्छति ।
पुनराधानमत्रैक इच्छन्ति न तु सूरयः ।

इत्यादावभिहितस्याग्निनाशस्य, न तु सूरय इत्यनेनापवादः कृतः । तत्र किमनुष्ठेयमिति विषये विकल्पेन इच्छावशाद् भवितव्यमिति । तदेच्छाविकल्पोन भवति । तस्याष्टदोषदूषितत्वेनानुपादेयतया व्यवस्थाविकल्पं युक्तं वक्तुम्† ॥१३२॥१३३॥

---

* सर्व्वत्रैवं पाठः । किन्तु, — इति तु प्रतिभाति ।

† इत्थमेव सर्व्वत्र पाठः । व्यवस्थितविकल्पो युक्तो वक्तुम्, — इति तु भवितुमुचितम् ।

स यथा ।

विनाशस्याविधेयत्वादत एवं* विवेचनम् ।
आदराद्रक्ष्यमाणस्य सर्वेष्टैरेव नाशनम् ॥ १३४ ॥
न विगीतैरुपेक्षायां विगीतैरपि नाशनम् ।

विनाशस्येति । विनाशस्याविधेयत्वाद्विधेयभिन्नत्वादत एवं विवेचनं विवेकः कार्यः । आदरात्परमभक्त्या रक्ष्यमाणस्य पुंसः सर्वेष्टैः सर्वसम्मतैरेव पुनराधाननिमित्तैर्नाशनमग्नीनामिति शेषः । विगीतैः सापवादकैर्निमित्तैर्न । उपेक्षायान्तु विगीतैरपि सापवादकैरपि निमित्तैर्नश्यति । यथाकालक्रियं सावधानस्य परमश्रद्धावतः पुंसः सर्वसम्मतैरेव पुनराधाननिमित्तैः पुनराधानं, उपेक्षावतो ऽश्रद्धावतश्च येन केनापि निमित्तेन पुनराधानमिति भावः ॥१३४॥

अथ यदहरेवैनं श्रद्धोपगमेदित्युदिना श्रद्धावत्त्वस्याधिकारिविशेषणत्वादसमञ्जसमसुं व्यवस्थां मन्वान आह ।

यद्वा† ऽग्निरक्षणे मार्गो यादृशोऽङ्गीकृतः पुरा ॥ १३५ ॥
तदत्यये विनाशः स्यान्नान्यैः पाक्षिकहेतुभिः ।

यद्वेति । यद्वाशब्दः पूर्वपक्षनिरासार्थः । अग्निरक्षणे मार्गः प्रकारः यादृशः पुराऽङ्गीकृतः, तदत्यये पूर्वाङ्गीकृतपक्षनाशे विनाशः स्यात् । अन्यैः पाक्षिकहेतुभिर्वैकल्पिकपक्षैर्न स्यात् । यथा नदीसीमाति-

---

* एव, — इति क० ख० ङ० पुस्तकेषु पाठः ।

† यदा, — इति पाठः ग० ङ० पुस्तकयोः ।

क्रमेण अग्निसंहरणार्थमग्न्यन्वारम्भे स्वीकृते कदाचित् लौगाक्ष्यादिमतेनाकृते पुनराधानमेव । यदा तु आदित एव लौगाक्ष्युक्तप्रकारेणानुष्ठाने*ऽन्वारम्भणाभावेऽपि न क्षतिरिति ॥ १२५ ॥

अथैतस्यापि रूपमित्यादिप्रदर्शनादपरितुष्यमाणइव व्यवस्थान्तरमाह ।

यद्वाऽग्न्यर्जनशक्तस्य पाक्षिकैरपि नश्यति ॥ १२६ ॥
निमित्तैर्न दरिद्रस्य पाक्षिकैरग्निनाशनम् ।

यद्वेति । यद्वेति पूर्वपक्षापवादार्थं वचनम् । अर्जनशक्तस्य द्रव्यार्जनसमर्थस्य पाक्षिकैरपि निमित्तैर्नश्यति । सर्व्वेण निमित्तमात्रेणापि नश्यतीति भावः । दरिद्रस्य पाक्षिकैरग्निनाशनं नेति भावः ॥ १२६॥

अथैतदपि प्रभुसंमितशब्दोपसंस्टष्टौतानां कर्मणां दरिद्रादरिद्रसाधारण्यात् यत्किञ्चिद्दोषदूषितत्वेनाग्नीनां तेष्वनुष्ठितकर्मणामफलप्रदत्वेन फल्गुतया भग्नचिदुर्बले पुंसि काण्व्यवहाराद्यापेशलं मन्वानआह ।

यद्वाऽग्नीन् जनयेदेव निमित्तैः सर्वसम्मतैः ॥ १२७ ॥
पाक्षिकैर्जनने श्रेयो नैनस्तेष्वेव जुह्वतः ।

यद्वेति । यद्वेति पूर्ववत् । सर्वेषामाचार्याणां संमतैर्निमित्तैर्निर-

---

* इत्थमेव पाठः सर्व्वत्र । यदा तु आदित एव लौगाक्ष्युक्तप्रकारेणानुष्ठानं, तदा, — इति तु भवितुमुचितम् ।

पश्चादकैरिति यावत् । अग्नीन् जनयेदेव पुनराधानं कुर्यादेव । पाक्षिकै र्निमित्तैर्जनने सति श्रेयः अधिकतमफलदातारोऽग्नयोभवेयुः । अथ तेष्वेव जुह्वतो यष्टुरेनो दोषो न । पाक्षिकनिमित्तेन नैमित्तिकेऽनुष्ठिते फलाधिक्यमिति भावः ॥१२७॥

ननु पाक्षिकानुष्ठानकथनं व्यर्थमित्यत आह ।

अनेकाचार्यसिद्धान्ताः सौकर्याय निरूपिताः ॥ १३८ ॥
देशकालवयोऽवस्थाशक्तिभेदाद्व्यवस्थिताः ।

अनेकेत्यादयोये आचार्याः कल्पकृतस्तेषां सिद्धान्ताः, न तु पूर्वपक्षाः । तेषामनुष्ठानानर्हत्वात् सिद्धान्तग्रहणम् । सौकर्याय सुखेन स्वकर्माचरणाय निरूपिता उक्ताः । ननु तर्हि स्वेच्छाविकल्पाः स्युः, इत्यत आह देशेति । देशकालवयोऽवस्थाशक्तिभेदात् व्यवस्थिताः व्यवस्थां प्राप्ताः । तथा च नैतेषां खलेकपोतन्यायेन प्रवृत्तिः । किं तु अधिकारिणमालोच्यैवेति । यथा एकाकिनी पत्नी अग्निभिः सह न यायादित्येकाचार्यसिद्धान्तः । देशोपप्लवे तु तादृशं यानमदुष्टमित्यपराचार्यसिद्धान्तः । अत्र देशकृता व्यवस्था । कालपरत्वेन व्यवस्था, कालाल्पत्वे निर्मथ्यत्यादिष्विव बोध्या ॥१३८॥

पुनरुपसंहरति ।

पुनराधिप्रसङ्गेन किञ्चिदत्र निरूपितम् ॥ १४० ॥
प्रायश्चितान्तरं वक्ष्ये स्वस्थाने बहुविस्तरम् ॥ १४१ ॥

पुनरिति । पुनराधिः पुनराधानं, तत्प्रसङ्गेन प्रसङ्गसङ्गत्या

अस्मिन् पुनराधाननिमित्तनिर्णयाधिकारे किञ्चित्प्रायश्चित्तं समि-न्धनादिरूपं निरूपितम् । एतेनान्यप्रायश्चित्ताकथनान्न्यूनत्वं नाशङ्क-नीयम् । स्वस्थाने प्रायश्चित्तनिर्णयाधिकारे बहुविस्तरो विस्तारो यस्य एवम्भूतं प्रायश्चित्तान्तरं प्रणीतास्कन्दनादि वक्ष्ये वदिष्यामि ॥

इति श्रीवादिभटमुद्गरकुठार श्रीकुमारस्वामिसूरिसुत-
त्रिकाण्डमण्डनभास्करमिश्रसोमयाजिकृतापस्तम्ब-
सूत्रध्वनितार्थकारिकासु पुनराधेयनिमित्त-
निर्णयो नाम तृतीयकाण्डम् ॥

तृतीयादि पूर्ववद्व्याख्येयम् ॥
इति त्रिकाण्डमण्डनविवरणे पुनराधेयनिर्णयं नाम
तृतीयं काण्डम् ॥

• प्रकीर्णककाण्डम्।

गौर्य्यद्रिरिजाजानिं गिरिजामातरं परम्।
यत्प्रसादाद्गजोजालवत्तीर्विघ्नैः पलायते॥

अथोक्तानामेव सर्वधर्माणां प्रायश आवश्यकेऽपि समावाल्कि-
ञ्चिदवशिष्टं केवलावश्यविषयकमेव वक्तुमुपक्रमते।

सकृत् करणमिच्छन्ति पाकयज्ञेषु केचन।
आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिस्तु सम्मता॥ १॥

सकृदिति। पाकयज्ञेषु पाकसंस्थासु केचन सकृत् करणमि-
च्छन्ति। केचिदावृत्तिमिच्छन्ति। स्वमतमाह। तत्रोभयपक्षमध्ये
आवृत्तिः सम्मता॥१॥

तत्र हेतुमाह।

यस्मात् विधिविशेषेण फलमप्यतिरिच्यते।
अष्टकानान्तु नावृत्तिः संस्कारः स हि निश्चितम्॥२॥

यस्मादिति। यस्मात् कारणाद्विधिविशेषेण, विधीयते अनेनेति
विधिः लिङादिस्तद्विशेषेण विशेषानुष्ठानेन फलमप्यतिरिच्यते
अधिकं भवति। यथा, आधानं प्रकृत्य शाखान्तरेऽभिहितं, षट्
दक्षिणा प्रतिविभज्य ददाति द्वादश चतुर्विंशतिर्वा भूयसीश्च
यथाश्रद्धमित्यादिषु दक्षिणादिविकल्पे विधिविशेषस्य चतुर्विंशति-
गोदानपक्षस्य दानेऽतिरिक्तं फलं, तथेहापीति भावः। एककर्मणि
गुणविशेषे फलविशेष इति कात्यायनाचार्योक्तेः। प्रकृतेऽपि सकृत्-

पश्चात् विधिविशेषरूपेऽसकृदनुष्ठाने कृते फलातिशय इति.न दृष्टान्तदार्ष्टान्तयोर्वैय्यधिकरण्यम् । पाकसंस्थास्तु चतुर्विधाहुतादि-भेदात् । तदुक्तं पारस्कराचार्यैः । चत्वारः पाकयज्ञाहुतोऽहुतः प्रहुतः प्राशित इति। एतल्लक्षणानि च विस्तरभीत्या नोच्यन्त इति सङ्क्षेपः ।

अष्टकानामप्यावृत्तौ प्राप्तायामाह ।

अष्टकानामिति । अष्टकानान्तु एतत्संज्ञकानां कर्मणां नावृत्तिः ।

हेतुमाह ।

हि यस्मात् कारणात् स अष्टकारूपकर्मविशेषोनिश्चितं सर्व-सम्मतं संस्कारः । आत्मसंस्कार इत्यर्थः । एकदा संस्कृतः पुरुषः सर्वोपयोगाय भवतीत्युक्तत्वात्। यथोपनयनादेः * आत्मसंस्काराणाम्। पार्वणादीनां तु नित्यत्वश्रवणादावृत्तिः ॥२॥

सकृत्करणेऽपि अधिकारिणमाह ।

अन्वष्टक्यं भवेत्कर्म यदि माता न जीवति ।
जीवत्पितृकविप्रस्य पिण्डयज्ञोभवेन्न वा ॥ ३ ॥

यदीति। यदि माता न जीवति तदैव भवतीत्यर्थः ।

प्रसङ्गादाह ।

जीवत्पितृकस्य तु पिण्डयज्ञो भवेन्न वा भवेत् । उभयस्या-प्याम्नातत्वात् । तथाहि सूत्रम् । होमान्तमनारम्भोवेति ॥३॥

---

* इत्यमेव पाठः सर्वत्र । उपनयनादीनां, — इति तु भवितुमुचितम् ।

एवमाभ्युदयिकेऽपि विकल्पः स्यादत आह।

पित्रोस्तु जीवतोः कुर्यात् पुनः पाणिग्रहं तदा।
पितुर्नान्दीमुखं श्राद्धं न तु स्वस्य मनीषिभिः॥ ४॥

पित्रोरिति। पित्रोर्जीवतोः पाणिग्रहं यदा कुर्यात् तदा स्वस्य पितुर्नान्दीमुखं नान्दीमुखदेवताकं पुनः श्राद्धं कुर्यान्न तु स्वस्य। इति मनीषिभिः प्रोक्तमिति शेषः।

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकमिति वचनात्।

पाणिग्रहपदमात्मसंस्कारोपलक्षणम्। जीवत्पितुः सुतसंस्कारेषु तत्तद्वर्गपरित्यागेनोचितत्वाभिधानात्। जीवद्वर्गत्रयस्य तु लोपस्यैवाभिहितत्वाच्च। अत्र बहु वक्तव्यमस्ति, विस्तरभियोपरम्यते॥४॥

शाखान्तरविषयमाह।

नोद्धरेदावसथ्याग्निमेकाग्नित्वादनाहितः।
वैश्वदेवादिकं कर्म तस्मात्तत्स्थे हविर्भुजि॥ ५॥
उद्धृतो भूरिपाकार्थे यदि किञ्चित् तनूनपात।
पूर्वेण योजयित्वा तु वैश्वदेवो विधीयते॥ ६॥

अनाहितः साग्निकः एकाग्नित्वादावसथ्याग्निं पाकार्थं नोद्धरेत्। यत एक एवाग्निरस्ति। आहिताग्निस्तु पाकाद्यर्थं उद्धरणं कुर्यादेव। यदि नोद्धरेत्तदा लौकिकाग्निसिद्धपाकेनैव तत्स्थे हविर्भुजि गृह्याग्नौ, वैश्वदेवादिकं कर्म कार्यम्। आदिपदादग्नौकरणादिक-

पश्चात् विधिविशेषरूपेऽमक्तदनुष्ठाने कृते फलातिशय इति न दृष्टान्तदार्ष्टान्तयोर्वैयधिकरण्यम् । पाकसंस्थास्तु चतुर्विधाहुतादिभेदात् । तदुक्तं पारस्कराचार्यैः । चत्वारः पाकयज्ञाहुतोऽहुतः प्रहुतः प्राशित इति । एतल्लक्षणानि च विस्तरभीत्या नोच्यन्त इति सङ्क्षेपः ।

अष्टकानामथावृत्तौ प्राप्तायामाह ।

अष्टकानामिति । अष्टकानान्तु एतत्संज्ञकानां कर्मणां नावृत्तिः ।

हेतुमाह ।

हि यस्मात् कारणात् स अष्टकारूपकर्मविशेषोनिश्चितं सर्वसम्मतं संस्कारः । आत्मसंस्कार इत्यर्थः । एकदा संस्कृतः पुरुषः सर्वोपयोगाय भवतीत्युक्तत्वात् । यथोपनयनादेः * आत्मसंस्काराणाम् । पार्वणादीनां तु नित्यत्वश्रवणादावृत्तिः ॥२॥

सकृत्करणेऽपि अधिकारिणमाह ।

अन्वष्टक्यं भवेत्कर्म यदि माता न जीवति ।
जीवत्पितृकविप्रस्य पिण्डयज्ञोभवेन्न वा ॥ ३ ॥

यदीति । यदि माता न जीवति तदैव भवतीत्यर्थः ।

प्रसङ्गादाह ।

जीवत्पितृकस्य तु पिण्डयज्ञो भवेन्न वा भवेत् । उभयस्याप्याम्नातत्वात् । तथाहि सूत्रम् । होमान्तमनारम्भोवेति ॥३॥

---

* इत्यमेव पाठः सर्व्वत्र । उपनयनादीनां, — इति तु भवितुमुचितम् ।

एवमाभ्युदयिकेऽपि विकल्पः स्यादत आह।

पित्रोस्तु जीवतोः कुर्यात् पुनः पाणिग्रहं तदा।
पितुर्नान्दीमुखं श्राद्धं न तु स्वस्य मनीषिभिः॥ ४॥

पित्रोरिति। पित्रोर्जीवतोः पाणिग्रहं यदा कुर्यात् तदा स्वस्य पितुर्नान्दीमुखं नान्दीमुखदेवताकं पुनः श्राद्धं कुर्यान्न तु स्वस्य। इति मनीषिभिः प्रोक्तमिति शेषः।

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।

अत ऊर्द्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकमिति वचनात्। पाणिग्रहपदमात्मसंस्कारोपलक्षणम्। जीवत्पितुः सुतसंस्कारेषु तत्तद्वर्गपरित्यागेनोचितत्वाभिधानात्। जीवद्वर्गत्रयस्य तु लोपस्यैवाभिहितत्वाच्च। अत्र बहु वक्तव्यमस्ति, विस्तरभियोपरम्यते॥४॥

शाखान्तरविषयमाह।

नोद्धरेदावसथ्याग्निमेकाग्नित्वादनाहितः।
वैश्वदेवादिकं कर्म तस्मात्तत्स्थे हविर्भुजि॥ ५॥
उद्धृतो भूरिपाकार्थे यदि किञ्चित् तनूनपात्।
पूर्वेण योजयित्वा तु वैश्वदेवो विधीयते॥ ६॥

अनाहितः साग्निकः एकाग्नित्वादावसथ्याग्निं पाकार्थं नोद्धरेत्। यत एक एवास्याग्निः। आहिताग्निस्तु पाकाद्यर्थं उद्धरणं कुर्यादेव। यदि नोद्धरेत्तदा लौकिकाग्निसिद्धपाकेनैव तत्स्थे हविर्भुजि स्वस्याग्नौ, वैश्वदेवादिकं कर्म कार्यम्। आदिपदादग्नौकरणादिक-

मपि। यदि चोद्धरेत्तदा भरिपाकार्थे यदि किञ्चिदेकदेशेन तनून-पादुद्धृतस्तदोद्धृतैकदेशगङ्गारस्याग्निना योजयित्वा वैश्वदेवः कार्य-इति ॥५॥६॥

स्मार्तानुगमे स्थापनप्रकारमाह ।

प्रमादादग्निनाशश्चेन् मन्थनादरणेस्ततः ।
पञ्चभूसंस्कृतिं कृत्वा स्थापयेदग्निमेधितम् ॥ ७ ॥

प्रमादेति । प्रमादादग्निनाशश्चेत्, ततोऽरणेर्मन्थनादेधितं मन्ट-ङ्कमग्निं पञ्चभूसंस्कृतिं परिसमूहनादिकां कृत्वा खरे स्थापयेत्। नात्र प्रायश्चित्तमिति ॥७॥

प्रमादान्नित्याकरणे विशेषमाह ।

कालातिक्रमणे कृत्वा प्रायश्चित्तं विधानतः ।
ततो होमादिकं कर्म कुर्यान्नित्यं विचक्षणः ॥ ८ ॥

कालेति। कालातिक्रमणे मुख्यकालातिक्रमणे विधानतः यथा-विध्युक्तं प्रायश्चित्तं कृत्वा होमादिकं नित्यं कर्म गौणकालेऽपि कुर्यात् । तदुत्तरं प्रायश्चित्तमात्रं न कर्म। वैश्वदेवस्य तु रात्रेः प्रथमयामपर्यन्तं गौण एव ।

दिवोदितानि कर्माणि प्रमादादकृतानि चेत् ।
रात्रेः प्रहरपर्यन्तं कर्तव्यान्येव सर्वथा ।
महायज्ञश्च सौरश्च वर्जयित्वाविशेषत इत्युक्तेः ॥८॥

एवञ्च सति सायं होमात् प्रागेव भवति, न तदनन्तरमित्याह।

अकृते वैश्वदेवे चेदस्तमेति गभस्तिमान्।
वैश्वदेवं ततः कृत्वा सायं होमं समाचरेत्॥ ९॥

अकृतेति। स्पष्टार्थम्॥९॥

एवमेव सर्वत्र साधारणन्यायमाह।

कालातीतेषु कार्येषु प्राप्तवत्स्वपरेषु च।
कालातीतानि कृत्वैव विदध्यादुत्तराणि तु॥१०॥

कालातीतेष्विति। कालातीतं कर्म कृत्वोत्तरं कार्यम्। न तु मुख्यकाललोभेन कालातीतात् प्रागनुष्ठानम्। तच्च प्रायश्चित्तमकृत्वा कृत्वा वा कार्यमित्यन्यत्र विस्तरः॥१०॥

प्रायश्चित्तं कृत्वैव कार्यमित्येवं पचोज्यायान्, अत आह।

पक्षादिः पिण्डयज्ञश्च प्रमादादकृतं यदि।
प्रायश्चित्तं ततोहुत्वा कर्त्तव्यं तद्दिनान्तरे॥ ११॥

पक्षादिरिति। पक्षादिः स्थालीपाकः, पिण्डयज्ञश्च, यदि प्रमादादकृतः, तदा प्रायश्चित्तं ततोऽकृत्वा तत्पक्षादिकर्म दिनान्तरे कर्त्तव्यम्। आगामिपक्षादिकर्मणः प्राक्। प्रायश्चित्तस्य तु नानात्वालोकम्। तत्र गौणकाले पथिकृत्पूर्वकं भवतीति केचित्, परे तु गौणातिक्रमे दार्शपौर्णमासिकोभयपक्षादिकर्म्मलोपे तत्स्थाने पथिकृदित्यन्यत्र विस्तरः। पिण्डयज्ञस्य गौणकालोनास्तीति भाष्यकृतः। तल्लोपे वैश्वानरस्यरुरेव भवति। रामाण्डारभाष्ये तु स्वकालादुत्तरो गौण इति वचनादागामिदर्शेऽनुष्ठानं प्रायश्चित्तपूर्वकं पिण्डयज्ञस्येत्युक्तम्॥११॥

सर्वथैव नित्यकर्मलोपो न कार्य इत्याशयेनाह ।

लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विनिर्दिशेत् ।
प्रायश्चित्ते हुते पश्चात् नित्यं कर्म विधीयते ॥ १२ ॥

लुप्तेति । स्पष्टार्थम् ॥१२॥

श्रौतारणिवत् स्मार्तारण्योः श्वादीनां स्पर्शे त्यागः पूर्ववद्भवतीत्यनुवदति ।

श्वशूद्रपतितोदक्याकाकवानररासभैः ।
स्पृष्टा मूत्रपुरीषेण नाशमेत्यरणिः स्फुटम् ॥ १३ ॥

श्वशूद्रेति । व्याख्यातपूर्वम् ॥१३॥

अरणीनाशोत्तरं नूतनारणिस्वीकारोऽविशेषेण विधेयः। अन्यथा अभ्युपगमे पुनराधानं प्रसज्येत । अत आह ।

नष्टायामरणौ यावदग्निस्तिष्ठति वेश्मनि ।
तावद्धोमादि तत्र स्यात्तन्नाशे पुनराहरेत् ॥१४॥

नष्टायामिति। जीर्णारणिप्रतिपत्तिस्तु पूर्वोक्ता ॥१४॥

जीवत्पत्नीकस्य द्वितीयविवाहादौ वैवाहिकहोमाधिकरणाग्निमाह ।

भार्यायां विद्यमानायां द्वितीयामुद्वहेद् यदि ।
तदा वैवाहिकं कर्म कुर्यादावसथेऽग्निमान् ॥ १५ ॥

भार्यायामिति ॥१५॥

अपूर्वाधानप्रथममन्थनेऽरणिखरूपमाह।

उत्ताना प्राक्शिरा वेदिर्यथा वेदिस्तथाऽरणिः।
अध्वर्युः प्राङ्मुखोमन्थेत् प्रत्यक् सुचरणा हि सा॥१६॥

उत्तानेति। यथा वेदिस्तथारणिरिति वक्तव्ये प्रथमं वेदिखरूपमाह।

उत्ताना प्राक्शिरा वेदिः। तद्वदरणिखरूपं ध्येयम्। अध्वर्युः प्राङ्मुखोमन्थेत्। हि यस्मात् सा ऽरणिः प्रत्यक् सुचरणा अस्ति॥ १६॥

प्राङ्मुखेनैव मन्थनं कार्यमिति निदर्शनान्तराण्याह।

प्राङ्मुखोविततो यज्ञः प्राङ्मुखेनैव हूयते।
प्राक् प्रणीतादिपात्राणि पश्चादग्निस्तु मथ्यते॥१७॥
हव्यवाड्वरुणं दृष्ट्वा भीतः प्रत्यगुदद्रवत्।
तमिच्छेत् पुनराधातुं तस्मात् प्रत्यङ् मथीत वै॥१८॥
अनुलोमा भवेद्योनेः पार्श्वभेदैन भिद्यते।
अनुलोमेन मथितः सर्वान् कामान् प्रयच्छति॥१९॥

प्राङ्मुख इति। यज्ञः प्राङ्मुखः विततः। तथाविधेनैव हूयते। प्रणीतादिपात्राणि प्राक् प्राक्संस्थानि। तस्मादग्निः पश्चात् मथ्यते। तथा च सति मन्थनमपि प्राङ्मुखेनैव भवतीत्यभिप्रायः। हव्यवाट् प्रत्यक् वरुणं दृष्ट्वा भीतः सन् उदद्रुवत् पलायते, तं पलायमानमग्निं पुनराधातुं स्थिरीकर्तुं इच्छेत्। तस्मात् प्रत्यङ् पश्चात्

स्थिला मयीत । वै इति निश्चयेन । अग्निवरुणयोर्मध्ये जवनिका-रूपोऽध्वर्युर्भवतीति भावः ।

किञ्च । यः प्राङ्मुखोमन्थेत्स योनेरनुलोमा भवति । पार्श्वभेदेन भिद्यतेऽरणिरिति शेषः । अनुलोममन्थने फलमाह ।

अनुलोमेनेति । स्पष्टम् ॥१७॥१८॥१९॥

योनिस्वरूपमाह ।

मूलादष्टाङ्गुलान् त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।

मूलेति ।

अग्निविच्छेदे प्रायश्चित्तमाह ।

अग्निहोत्र्युपविध्याग्नीन् ब्राह्मणः कामकारितः ॥ २० ॥
चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् * ।

अग्निहोत्रीति । आहिताग्निर्ब्राह्मणः कामकारितो न तु निमित्तेन । अग्नीनुपविध्य विच्छिन्नान् कृत्वा, मासे अतीते चान्द्रायणञ्चरेत् । हेतुः । हि यस्मात्तद्वीरहत्यासमं प्रोक्तम् । एतेनेच्छया-ऽग्नित्यागे यावन्तोमासा अतीतास्तावन्ति चान्द्रायणानि कुर्यादित्युक्तं भवति । ततश्च सायं प्रातश्च दिवसगणनया यावतीराहुतीः परि-सङ्ख्याय तावत्पर्याप्तं धान्यं धनमन्यद्वा घृतादि द्विजातिभ्यो दद्यात् । अत्र द्विजातिपदेन ब्राह्मणा एवोच्यन्ते । त्रैवर्णिकग्रहणे वाक्य-भेदापत्तेः । शेषं यावदब्दान्यतीतानीत्युक्तं कृच्छ्रं प्रायश्चित्तमपि आचरेत् ॥२०॥

* अत्र क्रियापदमपि ग्रन्थस्त्रुटित इति टीकापर्य्यालोचनया सम्भाव्यते ।

ऋत्विगात्मा अन्नं जाया शुद्धं यस्य चतुष्टयमित्याद्युक्तस्यार्थ-शौचस्य प्राशस्त्यमाह ।

सर्वेषामपि शौचानामर्थशौचं परं स्मृतम् ॥ २१ ॥

सर्वेषामिति । स्पष्टार्थम् ॥२१॥

यद्दरि प्रवसिते गृहे ऋत्विगादिना होतव्यमित्याह ।

अग्निहोत्रं हुतं स्वामी प्रोषितो मन्यते यदा ॥
अपोऽश्नीयादिति कठैर्होमः स्पष्टमनूदितः ॥ २२ ॥

अग्निहोत्रमिति । प्रोषितोयष्टा अग्निहोत्रकाले सायंप्रातः अग्नि-होत्रं कृतं यदा मन्यते, तदा अपोऽश्नीयात्, न तु तदानीमेव । कुतः । सर्वथैव नाप्युदकवर्जनमाम्नातमस्ति । तन्निरुक्तिः श्रुताव-भिहिता । एषा वै नौ स्वर्गस्येति । कठैः कठशाखिभिर्होमः स्पष्टमनूदितः प्रोक्तः ॥२२॥

पञ्चहोमे हुते गृहे सता प्रवसता वा द्रव्यत्यागः कार्य एवेत्याह ।

सर्वेषु पञ्चहोमेषु द्रव्यत्यागोऽस्ति सर्वदा ॥
कर्मान्यदस्तु वा मा भू ज्जपोवा स्यान्न सोऽस्ति वा ॥२३॥

सर्वेष्विति । सर्वेषु पञ्चहोमेषु सर्वदा द्रव्यत्यागं कुर्यात् अन्यत् कर्म मन्त्रग्रहणादि अस्तु वा मा भूज्जपः उपस्थानादिः स्यात् । सोऽपि वा नास्ति ॥२३॥

हेतुमाह ।

त्यागाभावाद्धुतं न स्यात् समस्तमपि केवलम् ।
अतोहोमानुवादेन त्यागोऽस्त्येवेति कल्प्यते ॥ २४ ॥

त्यागेति । केवलं त्यागहीनं प्रक्षिप्तमपि कृतं न स्यात् ; अतो होमानुवादेन कठाद्युक्तेन सर्वदा त्यागोऽस्त्येवेति कल्प्यते । असन्निधौ पत्न्यप्यधिकारिणी ।

असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिका ।

इत्युक्तेः । प्रमवादिषु अध्वर्युरपि ॥२४॥

आढ्यत्वस्य अधिकारितावच्छेदकत्वमित्याह ।

पुण्यान्यन्यानि कुर्वीत* श्रद्दधानो जितेन्द्रियः ।
न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथञ्चन ॥ २५ ॥

पुण्यानीति । श्रद्धधानः यज्ञादिषु श्रद्धावानपि जितेन्द्रियः शुद्धात्मा अन्यानि पुण्यानि तीर्थसेवनादिरूपाणि कुरुते कुर्यात् । लिङर्थे लट् । कुर्वीतेति वा पाठः । परन्तु इह अल्पदक्षिणैर्यज्ञैः कदाचिदपि न यजेत ॥२५॥

हेतुमाह ।

इन्द्रियाणि यशः कीर्त्तिमायुः स्वर्गं प्रजां पशून् ।
हन्त्यल्पदक्षिणो यज्ञो तस्मान्नाल्पधनोयजेत् ॥ २६ ॥

इन्द्रियाणीति । इन्द्रियाणि यशः स्वर्गं आयुः कीर्त्तिं प्रजां पशून् अल्पदक्षिणो ऽयथोक्तदक्षिणो यज्ञोहन्ति। तस्मादाढ्यएवाधिकारीति । दानादिजन्यं यशः । त्यागादिजन्या कीर्त्तिः ।

अर्थहीनोदहेद्राष्ट्रं मन्त्रहीनस्तथर्त्विजम् ।
आत्मानं दक्षिणाहीनोनास्ति यज्ञसमोरिपुरिति ॥

---

* कुरुते,—इति टीकासम्मत: पाठ: ।

माल्ये दोषसङ्गाच्च । इदञ्च काम्ययज्ञविषयम् ।

यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च ।
विप्रघ्नपि न स स्वर्गं गच्छेत्तु पतितो हि स इति ॥
तस्मात् कन्दैः फलैर्मूलैर्मधुनाऽऽज्यरसेन वा ।
नित्यं नित्यानि कुर्वीत न तु नित्यानि लोपयेदिति च।

बौधायनवचोभ्यां विज्ञायते। श्रूयते च। यदि व्रीहीन्न विन्देरन् केन जुहुयादित्यादि । ब्राह्मणस्य प्रतिग्रहादिना राजन्यस्य जयादिनेत्याद्युपायेनार्जितधनेनाज्यलमपि काम्यपरमेव ।

अश्वोयाप्तोरग्नोयाप्तोयाप्ता चोभयतोमुखी ।
कुरुक्षेत्रे प्रष्टव्यापि यजेतावश्यकैर्मखैः ॥

इत्यादिस्मरणात् । नित्येषु यथाशक्तिन्यायस्य काम्येषु सर्वाङ्गोपसंहारन्यायस्य च षष्ठाध्याये जागरूकत्वाच्चेति दिक् ॥२६॥

धनाद्यर्जनमन्तरा प्रवासो न कार्य इत्याह ।

सर्वाणि तीर्थानि वसन्ति वेश्मं
सर्वे च देवायजतेऽग्निहोत्रे ।
उल्लङ्घ्य तानेकनिषेवणार्थं
व्यर्थं प्रयाणं दुरितञ्च यातुः ॥२७॥

सर्वेति । यतः सर्वाणि तीर्थानि वेश्म वसन्ति, सर्वे च देवाविष्ण्वादयोऽग्निहोत्रे यजते इज्यन्ते । छान्दसं माधुलम् । तथाच आग्नावैष्णवपुरोडाशप्रस्ताविका श्रुतिः । अग्निर्देवानामवमोविष्णुः परम इत्यादिः । अतस्तान् तीर्थानि देवांश्च उल्लङ्घ्य एकनिषेवणार्थं

एकस्य तीर्थस्य देवस्य वा निषेवणार्थं प्रयाणं प्रवासोऽव्यर्थम् ।
तत्तीर्थफलभाक् न भवतीत्यर्थः । न केवलं व्यर्थमपि तु यातु-
र्दुरितश्चेति ॥२७॥

एतादृशमतिविशिष्टमग्निसेवनमिति ध्वनयितुमेतदुक्तम् ।

ब्रह्मव्याकरणं कृत्वा हुत्वा वै पावके हविः ।
शालग्रामशिलां स्पृष्ट्वा शूद्रोगच्छत्यधोगतिम् ॥ २८ ॥

ब्रह्मेति । ब्रह्मवेदः, व्याकरणमुच्चारणङ्कृत्वा । तथा, पावके
हविर्हुत्वा । शालग्रामशिलां स्पृष्ट्वा । शूद्रोऽधोगतिं गच्छति ।
तस्मादेतत्त्रये द्विजातिरेवाधिकारीति भावः ॥२८॥

इमे पञ्च आदौ प्रथमारम्भे ये पञ्चाविहतास्ते सर्वदा यावज्जीवं
स्वस्वकाले अनुष्ठेयाः । तानेवाह ।

रूपं कालोऽनुनिर्वापो देवता श्रपणं तथा ।
आदौ ये विहृताः पञ्चास्त इमे सर्वदा स्मृताः ॥ २९ ॥

रूपमिति । एतेषामुदाहरणानि देवयाज्ञिकादिभिर्भाष्यादिषु
लिखितानि । तान्येवोच्यन्ते । रूपम्, दाक्षायणदर्शपूर्णमासस्वरू-
पादि । काल उदितानुदितादिः । अनुनिर्वापः, वैमृधादित्ये-
ष्यादिः । देवता, इन्द्रमहेन्द्रादिः । श्रपणं, गार्हपत्ये आहवनीये
वा । अत्र सर्वथादिपदेनातिसदृशमेवोपादेयम् । अन्यथा कालशब्देन
मध्याह्नकालपञ्चाह्निकैकाह्निकादिनक्षत्रादीनामपि नियमः प्रपद्येत ।
एवं, रूपमित्यनेन सुसदृशं तत्कार्यकारि ग्राह्यम् । तच्च पूर्वोक्तम् ।
केचिद्रूपोदाहरणं द्यावापृथिवीयस्यैककपालमाज्यमित्याहुः । तच्चि-

न्यम्। कालादिसम्पत्तौ चतमायश्चित्तेष्टेस्तदभावे पूर्णाहुत्यसम्भवापातात्। न चेष्टापत्तिः। व्यवस्थाशास्त्रमसमञ्जसं स्यात्। किञ्च, तत्रापि गव्यत्वादिकमपि परिग्रहीतं सुदुर्लभं स्यात्। समिद्द्रव्यादिष्वपि पर्णमयत्वादीनां पूर्वपरिग्रहापत्तेश्च। तथाच सर्वमग्न्यारम्भणीयञ्च स्यात्। देवतायाः पुनर्विधानाच। न्यायस्य त्वगतिकगतिकत्वात् सर्वेभ्य इत्यत्रैव दध्ना तण्डुलैश्चतैर्वेत्यादिपारस्करगृह्योक्तहोमद्रव्येषु गोभिलोक्तेषु च परिग्रहीतत्वाभेऽपि कादाचित्कत्वं व्याहन्येत। न च सिद्धमिष्टम्।

सायंहोमेषु यद्द्रव्यं प्रातर्होमेषु तद्भवेदिति।

यज्ञपार्श्वीयमण्डनादिधृतवचनानर्थक्यापाताच्चेति दिक्। अन्ये तु रूपमित्यनेन क्रियारूपम्, अग्निष्ट इत्यग्निरभिमृशति सकृत् चिर्वेत्यादि। कालरूपम्, उदितानुदितहोमिनोरपि अपूर्वचणरूपम्। मन्त्ररूपम्, प्रत्यष्टमित्यादि। देशरूपम्, प्राक्संस्थमुदक्संस्थादि। द्रव्यरूपम्, आज्यपुरोडाशादि। बर्हीरूपं, कुशकाशादि। समिद्रूपम्, पलाशोदुम्बरादि। एवमन्यत्सर्वमाचमने प्राङ्मुखोदङ्मुखत्वादिकं वदन्ति। ते परास्ताः। कालादीनां पृथगुपदेशवैयर्थ्यात्। अशक्यानुष्ठानप्रसङ्गाच्च।

पूर्वैव योनिः पूर्वावृत् पुनराधानकर्मणि।

इत्यादि वचनवैयर्थ्याच्चेति सङ्क्षेपः॥

इति त्रिकाण्डमण्डनविवरणे प्रकीर्णकनिरूपणम्॥

नो दृष्टं न च वा श्रुतं न कथितं कैश्चित् कदाचित् क्वचि-
न्नो भूतं न भविष्यतीत्युपकृतेनान्यत् परम्भावुकम् ।
यत्रासौ मदनानलस्य विधुरा श्रीकण्ठवैकुण्ठका.
सूर्याचन्द्रमसौ दधीचिविटपाम्भोजाश्च ते साक्षिणः ॥
